[illegible]

श्री गणेशाय नमः ॥ अथ ध्यानं ॥ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारते ॥ अद्वैतामृतवर्षिणीं भगवतीमष्टा
दशाध्यायिनीमंब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीं ॥ १ ॥ नमोस्तु ते व्यास विशा
लबुद्धे फुल्लारविंदायतपत्रनेत्र ॥ येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः
॥ २ ॥ प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ॥ ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥
॥ ३ ॥ सर्वोपनिषदो गावो दोग्धा गोपालनंदनः ॥ पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृ
तं महत् ॥ ४ ॥ वसुदेवसुतं देवं कंसचाणूरमर्दनं ॥ देवकीपरमानंदं कृष्णं वंदे जगद्गुरुं
॥ ५ ॥ भीष्मद्रोणतटा जयद्रथजला गांधारनीलोत्पला शल्यग्राहवती कृपेण वहनी क
र्णेन वेलाकुला ॥ अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी सोत्तीर्णा खलु
पांडवैः रणनदी कैवर्तकः केशवः ॥ ६ ॥ पाराशर्यवचःसरोजममलं गीतार्थगंधोत्क
टं नानाख्यानककेसरं हरिकथासंबोधनाबोधितं ॥ लोके सज्जनषट्पदैरहरहः पे
पीयमानं मुदा भूयाद्भारतपंकजं कलिमलप्रध्वंसि नः श्रेयसे ॥ ७ ॥ मूकं करोति वाचालं पंगुं ल
ंघयते गिरिं ॥ यत्कृपा तमहं वंदे परमानंदमाधवं ॥ ८ ॥ यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वंति

[illegible]

॥ॐ॥ श्रीगणेशाय नमः॥ ॐ नमः परमात्मने श्रीपुरुषोत्तमाय॥ धृतराष्ट्र उवाच॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता
ता युयुत्सवः॥ मामकाः पांडवाश्चैव किमकुर्वत संजय॥१॥ इह खलु सकललोकहिता
म दतारः परमकारुणिको भगवान् देवकीनंदनः तत्त्वाज्ञानविजृंभितशोकमोहवि
भ्रंसितविवेकतया निजधर्मत्यागपरधर्माभिसंधिपरं अर्जुनं धर्मज्ञानरह
स्योपदेशप्लवेन तस्माच्छोकमोहसागरादुद्दधार। तमेव भगवदुपदिष्टमर्थं भगवान्वे २॥
दव्यासः सप्तभिः श्लोकशतैरुपनिबबंध। तत्र तावत् धर्मक्षेत्र इत्यादिना न विषीदन्निद
[illegible] इत्यंतेन ग्रंथेन श्रीकृष्णार्जुनसंवादप्रस्तावाय कथा निरूप्यते। तत्परं २
[illegible] तयोर्धर्मज्ञानार्थः संवादः। तत्र धर्मक्षेत्र इत्यनेन श्लोकेन धृतराष्ट्र

दास्तिनापुरस्थितः स्वसारथिं समीपस्थं संजयं प्रति कुरुक्षेत्रवृत्तांतं पृष्टे संजयो हस्ति
नापुरस्थितोपि व्यासप्रसादात् लब्धदिव्यचक्षुः कुरुक्षेत्रवृत्तांतं साक्षात् पश्यन् धृतरा
ष्ट्राय निवेदयामास दृष्ट्वा तु पांडवानीकमित्यादिना॥ हे संजय मामकाः दुर्यो
धनादयः चापरं पांडवाः युयु[illegible]या हुकामाः धर्मक्षेत्रे धर्मप्रसवभूमौ समवेता मि
लिताः संतः किं अकुर्वत। किं युद्धमेव कृतवंतः॥१॥ संजय उ० दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्त
दा आचार्यमुपसंगम्य राजा वचनमब्रवीत्॥२॥ तु पुनस्तदा तेषु मिलितेषु सत्सु राजा दुर्यो
धनः अनेकवीरसमुदाये लब्धकीर्तिः दुःखेन योधयितुं अशक्यः आचार्यं धनुर्वेदोपदे
ष्टारं [illegible] उपसंगम्य आचार्यक्षिप्रेण आचार्य[illegible]तेन संगम्य संगतो भूत्वा अ
[illegible] अब्रवीत्। [illegible] किं उक्ता पांडवानीकं पांडवानां युधिष्ठिरा

तां अनीकं सैन्यं व्यूढं चक्रादिव्यूहरचनया संपन्नं दृष्ट्वा अवलोक्य दुर्योध
नः द्रोणं प्रति यद्वचः अवोचत् तदेव नवभिः श्लोकैः संजयः धृतराष्ट्रं प्रत्याह । प
श्यैतां पांडुपुत्राणामाचार्य महतीं चमूं । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता
हे आचार्य एतां पांडुपुत्राणां महतीं अक्षौहिणीपरिमितां चमूं सेनां पश्य । अ
वलोकय । कथंभूतां तव शिष्येण द्रुपदपुत्रेण धृष्टद्युम्नेन धीमता । तव शिष्य
त्वेन सेनाव्यूहविन्यासादिबुद्धिमता व्यूढां व्यूहविन्यासेन स्थापितां तव
शिष्येणेति तवापि पांडवसेनायां कश्चिदनुरागोस्तीति किंचिद्व्यंग्यवचनं दु
र्योधनस्येति । पांडुः पांडुरो धर्मी तत्पुत्रा आरपुत्रा इति सान्त्विप्रायं वचनं दु २
र्योधनस्य ।३ अत्र शूरा महेष्वासा भीमार्जुनसमा युधि । युयुधानो वि

राटश्च द्रुपदश्च महारथः ।४ अत्र अस्यां चम्वां अमी शूराः शौर्येण क्षात्रधर्मेण उपेताः
महेष्वासाः इषवः अस्यंते यैः तानि धनूंषि महांति येषां ते महेष्वासाः । युधि संग्रा
मे भीमार्जुनसमाः । भीमः भियान्नयनमीयते इति वृकोदर एव वीरांतरैः
विलोक्यत इति भीमः । अर्जुनः पशुपतिसंग्रामोपार्जितयशोविभूतिभिः अ
र्जुनं पांडुरं संपादितं विश्वं येन सोऽयमर्जुनः । ताभ्यां समास्तुल्याः । युयुधानः
वीरवरैरेवभिश्रीभावेन युज्यते विष्णुः । युभिश्रण इति धातुपाठात् । विराटः विग
तः विपद्भ्यः तेजोराट् राजा यस्य शत्रुसूदनस्य स विराटः । द्रुपदः द्रुवत् वृक्षव
त् संग्रामे निश्चलौ पादौ यस्य स द्रुपदः । महारथः प्रत्येकं महारथश्च विशेष
णं युयुधानो महारथ इत्यादि ।४ धृष्टकेतुश्चेकितानः काशिराजश्च वीर्य
ऽऽऽऽऽऽऽऽ वान् । पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुं

× धृष्टकेतुः

गवः॥५॥ धृष्टः प्रगल्भः शत्रुवित्रासनः केतुश्चिह्नं ध्वजादिर्यस्य धृष्टो रणे प्रगल्भो
वा केतुर्विनाशक इति वा धृष्टकेतुः। चेकितानः संग्रामकुशलः। काशिराजः काशो ब्र
ह्मतत्त्वप्रकाशो यस्यां निवसतां सुलभः। सा काशी तस्याः राजा स काशिराजः। त्रि
पुरविजयी शत्रुः संग्रामविजयार्दः॥५ युधामन्युश्च विक्रान्त उत्तमौजाश्च
वीर्यवान्। सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः॥६ युधामन्युः चक्ररक्षः वि
क्रान्तः। वीर्यवान् उत्तमौजाः। सौभद्रः। चक्ररक्षः द्रौपदेयाः द्रौपद्यास्तनयाः। एते सर्वे म
हारथा एव। महायुद्धाय समर्थाः ते महारथाः रथः शस्त्रास्त्रादि सम्पन्नो येषां ते महारथाः॥६

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम। नायका मम सैन्यस्य संज्ञार्थं ता
न्ब्रवीमि ते॥७॥ हे द्विजोत्तम तु पुनः ये अस्माकं धार्तराष्ट्राणां विशिष्टाः पाण्डवसे
नावीरेभ्योऽपि श्रेष्ठाः। तान् निबोध अवधारय। मम सैन्यस्य नायकाः नेतारः

तान् ते तुभ्यं संज्ञार्थं अभिज्ञार्थं ब्रवीमि कथयामि॥७॥ भवान् भीष्मश्च कर्णश्च कृप
श्च समितिंजयः। अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च॥८ भवान् द्रोण एव तावत् यस्य
तव युद्धकौशलोपदेशेन भगवान् पशुपतिरपि अर्जुनेन निर्जितः। स च भीष्मः सक
लक्षत्रक्षयकारिचक्रायुधलीलावतारपरशुरामस्यापि रणे जयकरत्वात् भीष्मः। कर्णः
वैरिणां कर्तनात् कर्णः। कृपः शत्रुहिंसनशीलः। कृपया युद्धे समर्थः। अश्नुते व्याप्नोति
अश्नाति वैरिणो भक्षयति वा [illegible] वा अतिरथानां गच्छति येन स्थाम्ना बलेन तत् अश्वं बलप्र
चयं तो वा अश्वशब्दः तत्तादृशं स्थाम बलं यस्य सो अश्वत्थामा। स किल सकललोकोप
संहारदक्षस्य हरस्य चाकलीपतेर्लीलावतारो यस्मात्। विकर्णः यस्य असमानवीरसं
ग्रामो पाण्डितकीर्त्तिमञ्जरी वर्णनायां प्रत्यर्थिनः पार्थिवा विगतकर्णा बधिरा इव उद्भ्रान्ता भवन्तीति

[left margin:]
लाभस्थाम बलं
तु श्मिति दर्शा
युधः

तिविकर्णः। पार्वतीपति

[illegible] विकर्णः। पार्वतीपतिदत्तवरः सोमदत्तिः। तथैव च त्वत्तुल्यो भीष्मश्च। त्रैलोक्यपराजयद्वे सौ
[illegible] तथैव इतमे मदर्थे ॥८॥ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः। नानाशस्त्रप्रहरणाः
[illegible] प्रहरणाः सर्वे युद्धविशारदाः ॥९॥ एतदपरं अन्ये सहायत्वे न समागताः। न ना
[illegible] दत्तशल्यप्रभृतयः बहवः शूराः मदर्थे मम विजयसाधनार्थे
त्यक्तजीविताः। सर्वे युद्धविशारदाः युद्धकुशलाः ॥ एतेन्यद्धृदयपरिकल्पनस्य प्रयोजन
माह। अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं। पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं ॥१०॥
ननु पांडवानां बलं तस्य भीष्मेण सेनापतिना अभिरक्षितं अस्माकं बलं प्रति अप
र्याप्तं अपरिपूर्णं ... सामर्थ्यं ... इदं तु अस्माकं बलं। पुनः एतेषां पांडवानां
भीमाभिरक्षितं बलं प्रति पर्याप्तं परिपूर्णं। यदि अस्माकं बलं अपर्याप्तं भीष्म
स्योभयपक्षपातित्वात्। एतेषां पर्याप्तं भीमस्यैकपक्षपातित्वादिति योजना।

तदा भीष्ममेवाभिरक्षंतु इत्याद्यसंगतं स्यात्। तथा च उभयोः अंतरे भीमस्य एकपक्षपाति
त्वात् पांडवानां बलं समर्थं भाति। भीष्मस्य उभयपक्षपातित्वात् अस्माकं बलं असम
र्थं भाति। इति दुर्योधनस्याभिप्रायः ॥१०॥ अयनेषु च सर्वेषु यथाभागमवस्थिताः। भी
ष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ॥११॥ हि यस्मात् सर्व एव भवंतो यूयं वीर्यप्र
भवंतो वा वीराः सर्वेषु समस्तप्रकारेषु अयनेषु युद्धदुर्गमार्गेषु गोमूत्रिकादि
व्यूहस्थलेषु सर्वेषु यथाभागं व्यूहविभागमनतिक्रम्य अवस्थिताः वर्तमानाः सं
तः भीष्ममेव सेनानायकं अभितः सर्वतो रक्षंतु। स्वस्वव्यूहद्वारा परिपाल
यंतु ॥११॥ द्रोणं प्रति राज्ञा भीष्मस्य बहुमानपुरस्सरं यदुक्तं तच्छ्रुत्वा भीष्मः किमक
रोत् तदाह। तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः। सिंहनादं विनद्योच्चैः
शंखं दध्मौ प्रतापवान् ॥१२॥ कुरुवृद्धः पितामहो गांगेयः तस्य एवं द्रोणं प्रति निरूपणं

कुर्वतो दुर्योधनस्य राज्ञः हर्षं प्रीतिं संजनयन्नुच्चैः सिंहनादं विनद्य सर्वसत्त्वसं
त्रासनं सिंहस्य नादमिव नादं अकृत्वा संरुद्धो शंखं दध्मौ आपूरितवान्॥ प्रतापयुक्तः॥
१२ तदेवं सेनापतेर्भीष्मस्य युद्धोत्सवमालक्ष्य युद्धोत्सवः प्रवृत्त इत्याह॥ ततः शं
खाश्च भेर्यश्च पणवानकगोमुखाः॥ सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत्॥१३॥
ततः भीष्मस्य शंखपूरणानंतरं शंखाश्च अपरे भेर्यः पणवानकगोमुखाः सहसै
व युगपदेव अभ्यहन्यंत आस्फालिताः स शब्दः तुमुलो एकवर्णो विवेचनायोग्यो
ऽभवत्॥१३ ततः पांडवसैन्ये प्रवृत्ते युद्धोत्सवमाह ततः श्वेतैरिति पंचभिः श्लोकैः॥
ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ॥ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्म
तुः॥१४ ततो दुर्योधनसैन्ये वाद्यकोलाहलानंतरं श्वेतैः शुक्लैः कैलाशाचलशि
खरकल्पैः परसैन्योत्कर्षतत्करणसामर्थ्यवद्भिः वाहयैः अतिवेगाति ५

रेकात्स्यंदनवतो वा देशाकाशे यांतीति दयाविशिष्टा अश्वास्तैर्युक्ते संयोजिते महति आदि
त्यमंडलकल्पे प्रज्ञेय स्यंदने संग्रामभूमिप्रद्रवणशीले रथवरे स्थितौ वर्त्तमानौ माध
वः मायाः लक्ष्म्याः धवः पति माधवः कृष्णः। पांडवश्चैव अर्जुनश्चापि दिव्यौ दिव्यवि अप्रा
कृतौ शंखौ प्रदध्मतुः प्रकर्षेण परकीयवाद्यकोलाहलाभिभवसंपादनेन दध्मतुः
आपूरितवंतौ॥१४ तादेव विभागेन प्रदर्शनमाह पांचजन्यं हृषीकेशो देवदत्तं धनंज
यः॥ पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः॥१५ हृषीकेशः हृषीकाणां इंद्रियाणां
ईशो अधिष्ठाता लीलागृहीतदेहो भगवान् विष्णुः पांचजन्यं पंचजनाख्य दैत्यदेहो
द्भवं। धनंजयः देवदत्तं। वृकोदरः भीमकर्मा महाशंखं पौंड्रं दध्मौ आपूरितवान्॥१५
अनंतविजयमित्यादि युग्मं पूर्वश्लोकक्रियया संबध्यतो अनंतविजयं राजा कुंती

पुत्रो युधिष्ठिरः। नकुलः सहदेवश्च सुघोषमणिपुष्पकौ॥१६ कुंतीपुत्रो युधिष्ठिरो राजा पां
डवानां स्वामी अनंतविजयं महाशंखं दध्मौ। यस्य आपूरणात् अनंतः संततो विजयो
भवतीति अनंतविजयः। नकुलः सहदेवश्च क्रमेण सुघोषमणिपुष्पकौ शंखौ प्रदध्मतुः
१६॥ ॥काश्यश्च परमेष्वासः शिखंडी च महारथः। धृष्टद्युम्नो विराटश्च सात्यकिश्चापरा
जितः॥१७ च अपरं काश्यः काशिराजः परमेष्वासः परमः उत्कृष्टः इष्वासो धनुर्यस्य सः। धु
नः। शिखंडी च महारथः शिखंडवान् सकलसुरासुराजेयभीष्मवधार्थमुत्पन्नः॥ धापो
कषेय शिखा युक्तः। च अपरं धृष्टद्युम्नः विराटः सात्यकिः एव च अपराजितः। अजेयः। ए
ते सर्वे पृथक् पृथक् शंखान् दध्मुः वादयां चक्रुरिति परेण संबंधः॥१७ द्रुपदो द्रौपदेया
श्च सर्वशः पृथिवीपते। सौभद्रश्च महाबाहुः शंखान् दध्मुः पृथक् पृथक्॥१८ हे पृथि ६
वीपते द्रुपदः च अपरं द्रौपदेयाः द्रौपदी पुत्राः च अपरं महाबाहुः सौभद्रः एते स

र्वेशः पृथक् प्रत्येकं शंखान् दध्मुः॥१८ तत्र स्वशंखनादस्य धार्तराष्ट्रान् प्रति संजयः भयजन
कत्वमाह। स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्। नभश्च पृथिवीं चैव तुमुलो व्यनुनादयत्॥१९
दारयन्॥१९ स तुमुलो घोरः पांडवसेनापतीनां शंखादिजन्यो घोषः धार्तराष्ट्राणां हृद
यानि व्यदारयत्। किं कुर्वन्। नभः आकाशं पृथिवीं च व्यनुनादयन्। प्रतिशब्दैः कारय
न्॥१९ तस्मिन् समये श्रीकृष्णं प्रति अर्जुनेन यदुक्तं तत् चतुर्भिः श्लोकैः संजयः आ
ह। अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः। प्रवृत्ते शस्त्रसंपाते धनुरुद्य
म्य पांडवः॥२० अथ शंखपूरणानंतरं कपिध्वजः पांडवः व्यवस्थितान् विशेषेण उत्साहे
न अवस्थितान् स्वशंखनादात् घोरतरादपि अपरित्रस्तान् धार्तराष्ट्रान् दृष्ट्वा श
स्त्रसंपाते उत्साहफले च धार्तराष्ट्राणां प्रवृत्ते सति धनुः उद्यम्य सज्जीकृत्य॥२०
हृषीकेशं तदा वाक्यमिदमाह महीपते। सेनयोरुभयोर्मध्ये रथं स्था

पयमेऽच्युत हे महीपते तदा हृषीकेशं इदं वाक्यमाह। किमिति हे अच्युत मे मम रथं उभ-
यो: सेनयोर्मध्ये स्थापय॥२१ यावदेतान्निरीक्षेऽहं। यावद्युद्धकामान वस्थितान्। कैर्मया सह यो-
द्धव्यमस्मिन्रणसमुद्यमे॥२२ अहं यावत् एतान् प्रधानवीरान् योद्धुकामान् अवस्थि-
तान् निरीक्षे। निरीक्षणपूर्वकं परीक्षां करोमि। अस्मिन्रणसमुद्यमे मया कैः सह योद्ध-
व्यं युद्धं कर्त्तव्यमित्यर्थः॥२२ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः। धार्त्तराष्ट्रस्य दुर्बुद्धेर्यु-
द्धे प्रियचिकीर्षवः॥२३ अहं योत्स्यमानान् अग्रे युद्धं करिष्यतः अवेक्षे निरीक्षयामि। य
एते अत्र मम तव च समागमे दुर्बुद्धेः अविचारकारिणो धार्त्तराष्ट्रस्य दुर्योधनस्य युद्धे
युद्धस्थले प्रियचिकीर्षवः प्रियं विजयं कर्त्तुकामाः समागताः। आगत्यातिरेकेण सम्यक्
वीरोचितसमारम्भेण आगताः। ये पृथु विचारकारिण इत्यर्थः॥२३ ततः किं वृत्तमित्यपेक्षाया- ७
माह॥ संजय उवाच। एवमुक्तो हृषीकेशो गुडाकेशेन भारत। सेनयोरुभयो-

र्मध्ये स्थापयित्वा रथोत्तमं॥२४ हे भारत गुडाकेशेन अर्जुनेन एवं यथावर्णितं उक्तो हृषीकेशः
उभयोः सेनयोर्मध्ये रथोत्तमं स्थापयित्वा॥२४ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां। उवाच
पार्थ पश्यैतान् समवेतान् कुरूनिति॥२५ भीष्मद्रोणयोः सम्मुखे अग्रे द्रोणः द्राक् संयु-
द्धे पलायनं वा दिनिमित्तं तया ऊनो रक्षितः इति द्रोणः। तथा सर्वेषां च महीक्षितां भूमण्डला-
धिपानां राज्ञां योधवराणां अग्रे इति उवाच। इतीति किं हे पार्थ एतान् समवेतान् तव द्र-
ष्टुं भीष्मान् कुरून् पश्येति। भगवानुवाच॥२५ ततः किं वृत्तमित्यत आह। तत्रापश्यत् स्थि-
तान् पार्थः पितॄनथ पितामहान्। आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्स-
खींस्तथा॥२६ अथानन्तरं पार्थोऽर्जुनः उभयोः सेनयोः स्थितान् पितॄन् अपश्यत् इति
कुर्वंति लालयंत इत पर्यायः। तत्रस्थपथ्यानीति पितरः। तान् पितॄन्। अत्र च पितृ-
कल्पाः पितृव्यादयः। पितामहान् गांगेयादीन्। आचार्यान् द्रोणादीन्। मातुलान्

मात्राउनन्यासामग्र्याः यषां ते मातुलाः। भ्रातॄन् सोदरान्। पुत्रान् पुन्नाम्नो नरकात् पितॄणां त्राः
तान्। पौत्रान्। सखीन् मित्राणि अपश्यत्। २६ श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि।
तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान्। २७ पुनः श्वशुरान् सुहृदश्च अपश्य
त्। ततः किं कृतवान् अत आह। तानिति। स कौन्तेयः अर्जुनः सर्वान् अविशेषेण बन्धून् बध्नंतिपरस्परं
स्नेहपाशेनेति बन्धवः। तान् अवस्थितान् समीक्ष्य। २७ कृपया परयाविष्टो विषीदन्निदम
ब्रवीत्। दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्। २८ कृपया करुणया परया अतिशयतया
आविष्टो युक्तः विषीदन् विशेषेण सीदन् अवसादं गृह्णन् वर्तमानः। इदं अनंतरं वक्ष्यमा
णं अब्रवीत्। इदं किमिति। किमब्रवीदित्यपेक्षायामाह। दृष्ट्वेममित्यादिना यावदध्यायपरिस
माप्तिः। हे कृष्ण भक्तानां संसारक्लेशविलेखनात् कृष्णः। इमं स्वजनं युयुत्सुं योद्धुका
मं संतं समुपस्थितं दृष्ट्वा। २८ सीदन्ति मम गात्राणि मुखं च परिशुष्यति। वेपथुश्च शरीरे मे ८

रोमहर्षश्च जायते। २९ मम गात्राणि अंगानि सीदंति विशीर्णानि शिथिलानि अनुत्साहानि भवं
ति। पुनः मुखं परितः समंतात् शुष्यति निर्द्रवीभवति। मम शरीरे वेपथुश्च कंपश्च। तथा
रोमहर्षश्च जायते। २९ गांडीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते। न च शक्नोम्यव
स्थातुं भ्रमतीव च मे मनः। ३० मे मम हस्तात् गांडीवं स्रंसते अधः पतति। त्वक् च परि
दह्यते अंतरशोकज्वलनेन संतप्यते। च अपरं मे मम मनः कर्तव्याकर्तव्यबो
धसाधनं अंतःकरणं भ्रमतीव भ्रमं गच्छति निर्धारणं कर्तुं न शक्नोति। च पुनः अव
स्थातुं स्थितिं कर्तुं न शक्नोति। ३० निमित्तानि च पश्यामि विपरीतानि केशव। न च श्रे
योऽनुपश्यामि हत्वा स्वजनमाहवे। ३१ हे केशव च पुनः विपरीतानि अहितसूच
कानि निमित्तानि भाविसूचकानि चिह्नानि पश्यामि। च पुनः आहवे स्वजनं
हत्वा श्रेयः कल्याणं न अनुपश्यामि अनु पश्चात् उत्तरकाले पश्यामि। ३१ ननु विजयादि

कं श्रेयः। वर्त्तमाने किं न पश्यसि इति चेत् तत्राह।। न कांक्षे विजयं कृष्ण न च राज्यं सु-
खानि च। किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा।।३२।। हे कृष्ण अहं विजयं विशिष्टं ज-
यं संग्रामे उत्कर्षं न कांक्षे न प्रार्थये। च पुनः राज्यं राज्ञः आधिपत्यं। सुखानि च विषय-
जन्यान् प्रमोदान् न प्रार्थये। हे गोविंद नोऽस्माकं राज्येन किं। भोगैर्विषयसुखैः किं।
जीवितेनापि किं। गोविंदो गोभिः श्रुतिभिः वेदांतवाक्यैः विद्यते परमार्थरूपेण लभ्यत
इति गोविंदः।।३२।। येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च। त इमेऽवस्थिता युद्धे
प्राणांस्त्यक्त्वा धनानि च।। येषां स्वजनानां अर्थे प्रयोजनाय नोऽस्माकं भोगाः सुखा-
नि एतत्सर्वं कांक्षितं। कांक्षितं त इमे युद्धे युद्धनिमित्तं प्राणान् अंतरस्थान् बाह्यप्राणां-
श्च त्यक्त्वा अवस्थिताः।।३३।। आचार्याः पितरः पुत्रास्तथैव च पितामहाः। मातुलाः श्वशुराः
पौत्राः श्यालाः संबंधिनस्तथा।।३४।। आचार्यादयो यथायोग्याः स्थिताः। पितरः पुत्राः

तथा पितामहाः। मातुलाः। श्वशुराः। पौत्राः। श्यालाः। पत्न्याः भ्रातरः। संबंधिनः विवाहादि-
संबंधवंतः।।३४।। यदि त्वं एतान्हंतुं इच्छसि तर्हि त्वामेव राज्यलोभेन एते हनिष्यंति अतः
त्वमेव एतान्हत्वा राज्यं भुंक्ष्वेति तत्राह।। एतान्न हंतुमिच्छामि घ्नतोऽपि मधुसूदन।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते।।३५।। हे मधुसूदन एतान् आचार्यादीन् घ्न-
तोऽपि मारयतोऽपि त्रैलोक्यराज्यस्यापि हेतोः हंतुं न इच्छामि। महीकृते पृथिवीरा-
ज्यार्थं पुनः किं वक्तव्यं।। निहत्य धार्त्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन। पापमेवाश्र-
येदस्मान्हत्वैतानाततायिनः।।३६।। हे जनार्दन जनान् देवविपक्षान् दैत्यान् असुरादी-
न् अर्दयति पीडयतीति।। अथवा जनैः अधिकारिपुरुषैः अभ्युदयादिकं अर्द्य-
याच्यते इति जनार्दनः। हे जनार्दन धार्त्तराष्ट्रान् निहत्य नः अस्माकं का प्रीतिः स्यात्
किं सुखं स्यात् न किमपि प्रीतिः।। ननु आततायिनामेषां वधो विहितत्वात् युक्तः

इत्येतामाशंक्य धर्मशास्त्रस्य अर्थशास्त्राद्बलवत्त्वेन परिहरति पापमेवेति। न केवलं इह
लोके सुखं नास्ति परलोकेपि तन्नास्ति यस्मात् एतान् आततायिनो हत्वा अस्मान् पापमे
व नरकादिदुःखकारणं आश्रयेत्॥ ३६ तस्मान्नार्हा वयं हंतुं धार्त्तराष्ट्रान् सबांधवान्। स्वज
नं हि कथं हत्वा सुखिनः स्याम माधव॥ ३७ यस्मात् एतेषां हनने लोकद्वयेपि अकल्याणमेव
तस्मात् सबांधवान् धार्त्तराष्ट्रान् हंतुं वयं अर्हा न। एतेषां वधस्य अन्याय्यत्वात् अधर्मत्वा
त् न केवलं अस्माकं परलोके किं सुखं न भवति। इहापि किमपि न भवतीत्याह। स्वजनं ही
ति हे माधव। हि यस्मात् स्वजनं हत्वा वयं सुखिनः कथं स्यामः॥ ३७ ननु चैतेषामपि बं
धुवधदोषे समाने सति यथैव ते बंधुवधं अंगीकृत्यापि युद्धे प्रवर्त्तंते तथैव भवानपि
प्रवर्त्ततां। किमनेन विषादेनेत्याशंक्य। अविवेकित्वेन परिहरति॥ ॥यद्य १०
प्येते न पश्यंति लोभोपहतचेतसः। कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं॥ ३८ यद्यपि एते

विजयानीकथ

धार्त्तराष्ट्राः लोभोपहतचेतसः। लोभः परद्रव्याभिलाषः। लुनाति उभयं लोकद्वयं प्राणि
नामिति लोभः। तेन उपहतचेतसः तिरस्कृत कर्त्तव्याकर्त्तव्यविवेकविज्ञानाः संतः कुलक्ष
यकृतं गोत्रवधनिमित्तं दोषं मित्रद्रोहे च पातकं न पश्यंति॥ ३८ कथं न ज्ञेयमस्माभिः
पापादस्मान्निवर्त्तितुं। कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन॥ ३९ हे जनार्द
न तथापि अस्माभिः कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्मात् पापात् निवर्त्तितुं कथं न ज्ञेयं न य
त्नः कर्त्तव्यः। इत्यर्थः॥ ३९ कुलक्षये कृते ये दोषास्ते उत्पद्यते तं दर्शयति। कुलक्षये प्रणश्यंति
कुलधर्माः सनातनाः। धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत॥ ४० इदानीं कुलक्षयस्य
पारंपर्येण नरकप्राप्तिकारणत्वं दर्शयति। कुलक्षये गोत्रपुरुषाणां विनाशे सनातनाः
पारंपर्यागताः चिरंतनाः कुलधर्माः प्रणश्यंति धर्मे नष्टे धर्मेषु नष्टेषु कृत्स्नमपि कुलं अ
धर्मो अभिभवति तिरस्करोति। उत अपि। अधर्मो अभिभव[illegible]निवारक धर्मस्या

भावादित्यर्थः ॥४०॥ अधर्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः । स्त्रीषु दुष्टासु वार्ष्णेय जायते व
र्णसंकरः ॥४१॥ हे कृष्ण गोपिकामनःकर्षणशील । अधर्माभिभवात् कुलस्त्रियः विशुद्धवंशो
द्भवाः प्रदुष्यन्ति स्वैरिण्यो भवन्ति । तासु स्त्रीषु दुष्टासु सु । हे वार्ष्णेय वृष्णिवंशोद्भव वर्ण
संकरो जायते वर्णस्य वर्णान्तरमिश्रीकरणं वर्णसंकरः ॥४०॥ संकरो नरकायैव कुल
घ्नानां कुलस्य च । पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥४२॥ संकरो जातिसंकरः
एषां कुलघ्नानां च अपरं कुलघ्नकुलस्य नरकायैव भवति । हि यस्मात् एषां कुलघ्ना
नां स्वर्गस्थाः पितरः लुप्तपिण्डोदकक्रियाः सन्तः नरके पतन्ति । पिण्डादिदातॄणां विशु
द्धापत्यानां अभावात् लुप्तपिण्डाः लुप्तोदकक्रियाश्च सन्तः पतन्तीत्यर्थः ॥४२॥ उक्तं दोषं
उपसंहरति । दोषैरेतैरिति द्वाभ्याम् ॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः । ११
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥४३॥ एतैः धर्मनाशकैः अधर्माभि

भवादिलक्षणैः वर्णसंकरकारकैः दोषैः कुलघ्नानां जातिधर्माः क्षत्रियत्वजातिप्रयुक्ता ध
र्माः तथा शाश्वताः कुलधर्माः पारंपर्यागता वंशधर्माश्च उत्साद्यन्ते लुप्यन्ते तेषामाचरणं न भ
वतीत्यर्थः । चकारात् आश्रमधर्मादयो गृह्यन्ते ॥४३॥ उत्सन्नकुलधर्माणां मनुष्याणां ज
नार्दन । नरके नियतं वासो भवतीत्यनुशुश्रुम ॥४४॥ हे जनार्दन उत्सन्नकुलधर्माणां
विनष्टकुलवर्णाश्रमादिधर्माणां नरके नियमेन वासो भवति । इति वयं अनुशुश्रुम । अनु
वारं वारं व्यासादिभ्यः श्रुतवन्तो वयं ॥४४॥ बंधुवधव्यवसायेन संतप्यमान आह । अहो बत महत्पा
पं कर्तुं व्यवसिता वयं । यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥४५॥ अहो बत कष्टं यत् पर
मेश्वरस्य संनिधानेऽपि वयं महत्पापं कर्तुं व्यवसिताः । व्यवसायं निश्चयं गताः । किं तत् म
हत्पापं यत् राज्यसुखलोभेन स्वजनं हन्तुं उद्यताः । इति । उत् अतिशयेन यताः यत्नवन्तः

ॐ ना॥४५ एवं संतप्त: सन्नू नृपक्रमेव आशासान आह॥ अर्जुन:॥ यदि मामप्रतीकारमशस्त्रं
शस्त्रपाणय:॥ धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥४६ यदि शस्त्रपाणय: धार्तराष्ट्रा: अप्रतीका
रं प्रति युद्धमकुर्वाणं मां अशस्त्रं रणे संग्रामे हन्यु:॥ मां हनिष्यंति तर्हि तद्धननं मम क्षेमतरं
पापस्यानुपपत्ते: हेतो: इन्यत् हितंतरं भवतु॥४६ तत: किं वृत्तमित्यपेक्षायामाह॥ संज
य उवाच॥ एवमुक्त्वार्जुन: संख्ये रथोपस्थ उपाविशत्॥ विसृज्य सशरं चापं शोकसंविग्न
मानस:॥४७ अर्जुन: एवं उक्त्वा संख्ये संग्रामे रथोपस्थे रथस्योपरिपश्चाद्भागे सशरं चापं वि
सृज्य उपाविशत् उपविष्ट:॥ शोकसंविग्नमानस:॥ शोकेन संविग्नं खेदं तं मानसं यस्य स:॥
एवंविध: सन्नू उपविष्ट इत्यर्थ:॥४७ इति श्रीमहाभारते शतसाहस्र्यां संहितायां भगवद्गी १२
तासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे विवरणे श्रीकृष्णार्जुनसंवादे अर्जुनविषादो ना
म प्रथमोऽध्याय:॥ श्रीरस्तु॥ शुभं भवतु॥ श्री:॥ श्री:॥

४ तदेव वाक्यं दर्शयति। कुत इति द्वाभ्यां॥४ श्लो॥४
तत: किं वृत्तमित्यपेक्षायामाह॥ संजय उ॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं॥ विषीदं
तमिदं वाक्यमुवाच मधुसूदन:॥ मधुसूदन: तं अर्जुनं तथा तेन प्रकारेण कृपया आविष्टं
अश्रुपूर्णाकुलेक्षणं। विषीदंतं पूर्वोक्तप्रकारेण विषादं प्राप्नुवंतं प्रति इदं वक्ष्यमाणं वाक्यं
उवाच॥ श्रीभगवानुवाच। कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं। अनार्यजुष्टमस्वर्ग्यम
कीर्तिकरमर्जुन॥२॥ हे अर्जुन इदं कश्मलं मोहं कालुष्यं विषमे संकटे त्वां कुतो हेतो: स
मुपस्थितं। अनार्यजुष्टं आर्यैरसेवितं अस्वर्ग्यं स्वर्गस्य असाधनं। अकीर्तिकरं अय
शस्करं॥२ तस्मात् यत्कर्तव्यं तदाह॥ क्लैब्यं मा स्म गम: पार्थ नैतत्त्वय्युपपद्यते। क्षुद्रं
हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप॥३ हे पार्थ। क्लैब्यं मा स्म गम:॥ कातर्यं मा प्राप्नुहि। त्वयि
विषये एतत् न उपपद्यते। युक्तं न भवति। हे परंतप। क्षुद्रं तुच्छं हृदयदौर्बल्यं कात
र्यं त्यक्त्वा उत्तिष्ठ॥ अहं न कातरत्वेन युद्धादुपरतोऽस्मि किं तु युद्धस्य अन्याय्य

त्वादिति॥ अर्जुन उवाच॥ कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन॥ इषुभिः प्रतियोत्स्या
मि पूजार्हावरिसूदन॥४ हे मधुसूदन अहं संख्ये संग्रामे भीष्मं च पुनः द्रोणं इषुभिः
कथं प्रतियोत्स्यामि॥ यो भीष्मद्रोणौ प्रति वाचापि योत्स्यामीति वक्तुं अनुचितौ तौ प्रति इ
षुभिः कथं प्रतियोत्स्यामीत्यर्थः॥ यतस्तौ पूजार्हौ॥४ तर्हि तव देहस्थितिरपि न स्यात् इ
ति चेत्तत्राह॥ गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके॥ हत्वा
र्थकामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिरप्रदिग्धान्॥५ हि यस्मात् गुरून् अह
त्वा गुरवः शास्त्रार्थोपदेष्टारः मुख्यया वृत्त्या अन्येपि तत्तुल्या जनकादयः स्तेपि गुर
वः तान् महानुभावान् द्रोणादीन् गुरून् अहत्वा परलोकविरुद्धं गुरुवधं अकृत्वा इ १३
ह लोके भैक्ष्यं भिक्षान्नमपि भोक्तुं श्रेयः उचितं न केवलं परत्र दुःखं इहापि नरक
दुःखं अनुभवितव्यमित्याह॥ हत्वेति॥ पुनः तान् अर्थ कामान् अर्थाभिलाषान्

गुरून् हत्वा इह अस्मिन्नेव गुरूणां रुधिरेण प्रदिग्धान् प्रकर्षेण लिप्तान् अर्थकामात्मका
न् मरणोत्तरं नरके भोक्तव्यान् भोगान् तान् हा कष्टं भुंजीय भोक्ष्यामीत्यर्थः॥५ किंच यदि
अधर्ममपि अंगीकरिष्यामः तथापि अस्माकं जयः पराजयो वा भवेदिति न ज्ञायते अनुचा
तयोः कतरत् श्रेयः इति अपि न ज्ञायते इत्याह॥ न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम
यदि वा नो जयेयुः॥ यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः॥६ च पुनः
एतत् वयं न विद्मः नोऽस्माकं कतरत् किं नाम गुरूणां हननं अहननं वा गरीयः अधिक
तरं भविष्यतीति न विद्मः॥ किंच अस्माकं [illegible] जयोपि फलतः पराजय एवेत्याह॥ या
नेवेति॥ किंच जयपक्षेपि जयप्रवृत्तिरस्माकं न युक्ता यस्मात् यानेव धार्तराष्ट्रान्
हत्वा वयं न जिजीविषाम एवं न जीवितुमिच्छामः राज्यादिभोगस्य शंकापि का॥ त एव
धार्तराष्ट्राः प्रमुखे अग्रे युद्धार्थमवस्थिता वर्त्तन्ते॥६ तस्मात् संशयानो निर्णेतुं पृच्छति॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः। यच्छ्रेयः स्यान्निश्चितं ब्रूहि त
न्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नं॥७॥ एतान् हत्वा कथं जीविष्याम इति कार्पण्यं। दोषश्च कुल
क्षयकृतः। ताभ्यां उपहतः अभिभूतः स्वभावः शौर्यलक्षणो यस्य सोऽहं कार्पण्यदोषो
पहतस्वभावः। अथवा कृपणस्य भावः कार्पण्यं दैन्यं। अज्ञाननिमित्तत्वात् तदेव
दोषस्तेनोपहतः स्वभाववान् त्वां पृच्छामि कथं धर्मसंमूढचेताः। धर्मे संमूढं चेतो य
स्य विवेकविज्ञानाभावात्। अथवा धर्मसंमूढं युद्धं त्यक्त्वा भिक्षाटनमपि ह्यत्र यस्य
धर्मो वेति संदिग्धं चित्तं यस्य सोऽहं धर्मसंमूढचेताः। अतो यन्मे श्रेयः हितं स्यात् तत्
निश्चितं ब्रूहि। किंच ते तव अहं शिष्यः शासनार्हः। अतस्त्वां प्रपन्नं शरणमागतं मां शाधि
शिक्षय॥७॥ त्वमेव विचार्य यदुचितं तत्कुर्विति चेत् तत्राह। न हि प्रपश्यामि ममापनुद्या
द्यच्छोकमुच्छोषणमिन्द्रियाणां। अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधि १४
पत्यं॥८॥ क्षत्रियाणां युद्धं स्वधर्मः। इति तदेव निश्चयेन कर्तुं प्रभवितुं भगवदु

पदेशं स्वयमेवाशंक्याह। युद्धे क्रियमाणे उभयस्तावत् पाह्निकः। निश्चयपक्षेऽपि युद्धफलं भू
मौ राज्यं वा असपत्नं ऋद्धं वा तत् अवाप्यापि न हि प्रपश्यामि यत् मम शोकं अपनुद्यात्।
किंविशिष्टं शोकं इन्द्रियाणां उच्छोषणं अतिशोषकरं। न केवलं भूमौ राज्यं शोकविच्छेदकं
न भवति सुराणामपि आधिपत्यं॥८॥ युद्धे मरणपक्षे प्राप्तं इति उत्तरतोऽपि स्वजनवधनि
मित्तशोकशांतिं न पश्यामीत्यर्थः। भूमौ असपत्नं ऋद्धं राज्यं च अपरं सुराणामपि
चाधिपत्यं अवाप्य यत् कर्मभूतं सत् मम इन्द्रियाणां उच्छोषणं शोकं अपनुद्यात् अ
पनयेत्। तन्न हि प्रपश्यामीत्यन्वयः॥८॥ एवमुक्त्वार्जुनः किं कृतवानित्यपेक्षायां
संजय उवाच। संजय उवाच। एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप। न योत्स्य इति
गोविंदमुक्त्वा तूष्णीं बभूव ह॥ एवं गुडाकेशोऽर्जुनः हृषीकेशं श्रीकृष्णं प्रति एवं

एवं कृष्णकारेण कथं भीष्ममहं संख्ये योत्स्यामीत्यादि। वदंतं पदे धृतराष्ट्र अद्यं न
योत्स्ये युद्धं न करिष्यामीति गोविंदं प्रति उक्त्वा तूष्णीं बभूव मौनमाश्रितवान्।९। ततः
किं वृत्तमित्याह॥ तमुवाच हृषीकेशः प्रहसन्निव भारत। सेनयोरुभया
मध्ये विषीदंतमिदं वचः॥१०॥ हे भारत हृषीकेशः श्री नारायणः प्रहसन्निव प्रसन्न
वदनः सन् उभयोः सेनयोर्मध्ये विषीदंतं विषादं कुर्वंतं अर्जुनं प्रति इदं वक्ष्य
माणं वचः वाक्यं उवाच।१०। नारायणः परोऽव्यक्तादंडमव्यक्तसंभवं। अंडस्यांत
स्त्विमे लोकाः सप्तद्वीपा च मेदिनी। स भगवान् सृष्ट्वेदं जगत् तस्य च स्थितिं चिकीर्षुर्म
रीच्यादीनग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तं। ततोऽन्यां १५
श्च सनकसनंदनादीनुत्पाद्य निवृत्तिधर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास। द्वि वि

धो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च। जगतः स्थितिकारणं प्राणिनाम
भ्युदयनिःश्रेयसहेतुर्यः स धर्मो ब्राह्मणाद्यैर्वर्णिभिराश्रमिभिश्चानुष्ठीयमानो
दीर्घेण कालेनानुष्ठातॄणां कामोद्भवाद्धीयमानविवेकविज्ञानहेतुकेनाधर्मेणाभिभूय
माने धर्मे। प्रवर्धमाने चाधर्मे जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता नारायणाख्यो
विष्णुर्भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवादंशेन किल संबभूव। ब्रा
ह्मणत्वस्य हि रक्षणेन रक्षितः स्याद्वैदिको धर्मः। तदधीनत्वात् वर्णाश्रमभेदानां। स च भगवा
न् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिश्च सदा संपन्नः त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूल
प्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् माय
या देहवानिव जात इव च लोकानुग्रहं कुर्वन् लक्ष्यते स्वप्रयोजनाभावेऽपि भू
तानुजिघृक्षया वैदिकं धर्मद्वयमर्जुनाय शोकमोहमहोदधौ निमग्नाय

पदिदेश। गुणाधिकैर्हि गृहीतो निष्ठीयमानश्च धर्मः प्रचयं गमिष्यतीति। तं धर्मं भगवता
यथोपदिष्टं भगवान् वेदव्यासः सर्वज्ञो गीताख्यैः श्लोकशतैरुपनिबद्धवान्। तदिदं
गीताशास्त्रं समस्तवेदार्थसंग्रहभूतं दुर्विज्ञेयं। सप्तभिः। र्थं तदर्थाविष्करणायाने
कैर्विवृतपदपदार्थवाक्यार्थन्यायमपि अत्यन्तविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाण
मुपलभ्याहं विवेकतोऽर्थनिर्द्धारणार्थं संक्षेपतो विवरणं करिष्यामीति श्रीशंकराचा
र्यः प्रतिजानीते। तस्यास्य शास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य सं
सारस्यात्यन्तोपरमलक्षणं। तच्च सर्वकर्मसंन्यासपूर्वकात् आत्मज्ञाननिष्ठारूपात्
धर्माद्भवति। तथेममेव गीतार्थं धर्ममुद्दिश्य भगवतैवोक्तं। स हि धर्मः सुपर्याप्तो ब्र १६
ह्मणः पदवेदने इत्यनुगीतासु। किं चान्यदपि तत्रैवोक्तं। नैव धर्मी न चाधर्मी न चैव हि
शुभाशुभी। यः स्यादेकासने लीनस्तूष्णीं किंचिदचिंतयन्निति ज्ञानं संन्यासलक्ष

णमिति चांते चोक्तमर्जुनाय। सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति। अभ्यु
दयार्थोऽपि प्रवृत्तिलक्षणो धर्मो वर्णाश्रमानुद्दिश्य विहितः स देवादिस्थानप्राप्तिहेतुरपि
सन्नीश्वरार्पणबुद्ध्यानुष्ठीयमानः फलाभिसंधिवर्जितः सत्त्वशुद्धये भवति। शुद्धसत्त्व
स्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन निःश्रेयसहेतुत्वमपि प्र
तिपद्यते। तथा चेनमर्थमभिसंधाय वक्ष्यति। ब्रह्मण्याधाय कर्माणि
योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये इति। इमं द्विप्रकारं धर्मं निःश्रेयसप्र
योजनं परमार्थतत्त्वं च वासुदेवाख्यं परं ब्रह्माभिधेयभूतं विशेषतोऽभिव्यं
जयद्विशिष्टप्रयोजनसंबंधाभिधेयवत् गीताशास्त्रं। यतस्तदर्थविज्ञाने
समस्तपुरुषार्थसिद्धिरित्यतस्तद्विवरणे यत्नः क्रियते मया। तत्र च धृतराष्ट्र उ
= पांडवानीकमित्यारभ्य न योत्स्य इति गोविंदमु

× वेनर

क्त्वा तूष्णीं बभूव ह इत्येतदंतः प्राणिनां शोकमोहादिसंसारबीजभूतदोषोद्भवकारण
प्रदर्शनार्थत्वेन व्याख्येयो ग्रंथः। तथाह्यर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसंबंधिबांधवे
ष्वहमेषां ममेत इत्येवं प्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तावात्मनः शोकमोहौ प्रद
र्शितौ कथं भीष्ममहं संख्य इत्यादिना शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः।
स्वत एव क्षत्रधर्मे युद्धे प्रवृत्तोपि तस्माद्युद्धादुपरराम। परधर्मं च भिक्षाजीवनादिकं
कर्तुं प्रववृते। तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्टचेतसां स्वभावत एव
स्वधर्मपरित्यागः प्रतिषिद्धसेवा च स्यात्। स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मनःका
यानां प्रवृत्तिः फलाभिसंधिपूर्विकैव साहंकारा च भवति। तत्रैवं सति धर्माधर्मोपच १७
यात् इष्टानिष्टजन्मसुखदुःखसंप्राप्तिलक्षणः संसारोऽनुपरतो भवति। इत्यतः
संसारबीजभूतौ शोकमोहौ तयोश्च तत्प्रसूतसंसारादिनाद्यशा

मूलस्तंभोऽयमहंकारस्तदभीष्णत्रयाणां सर्वसंन्यासादात्मज्ञानान्नान्यतो निवृ
त्तिरिति तदुपदिदिक्षुः लोकानुग्रहार्थं अर्जुनं निमित्तीकृत्य भगवान् वासुदेवो
ऽशोच्यानित्यादि। तत्र संमूढचेतसो महति शोकसागरे निमग्नस्यार्जुनस्यान्यत्रात्म
ज्ञानादुद्धरणमपश्यन् भगवान् वासुदेवस्ततोऽर्जुनमुद्दिधारयिषुरात्मज्ञाना
यावतारयन्नाह। अशोच्यानिति॥ ॥देहात्मनोरविवेकात् अहंकारपूर्वकौ शो
कमोहौ संजातौ अर्जुनस्य इष्टा आत्मज्ञानमंतरेण तयोर्निवृत्तिर्न भवतीति देहादि
भ्यो भेदेन आत्मानं दर्शयितुमाह। अशोच्यानिति॥ श्रीभगवानुवाच। अशो
च्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे। गतासूनगतासूंश्च नानुशोचंति पंडि
ताः॥११ हे अर्जुन त्वं अशोच्यान् सद्वृत्तान् परमार्थस्वरूपेण नित्यान् अतप

× स्व

व अशोच्यान् भीष्मद्रोणादीन् अन्वशोचः। अनुशोचितवानसि। ते भीष्मद्रोणाद
यः मन्निमित्तं म्रियंते तैर्विना अहं राज्यसुखादिना किं करिष्यामीति। च पुनः प्र
ज्ञावादान् बुद्धिमतां वचनानि भाषसे। तदेतन्मौढ्यं पांडित्यं च विरुद्धमात्मनि दर्शय
स्युन्मत्त एवेत्यभिप्रायः। यस्मात् पंडिताः आत्मज्ञाः गतासून् गतप्राणान् अगतासू
न् अगतप्राणान् न अनुशोचंति। यतस्ते पंडिताः गतासुत्वे अगतासुत्वे वा आत्मनो अन्य
था भावं न पश्यंतीत्यर्थः। परमार्थतस्तु ते नित्याः अशोच्याः तान् त्वं अनुशोचसि। अ
तो मूढोसि। त ... ते अशोच्याः यतो नित्याः कथमित्याह। ११ कालत्रयस्थत्वाभिनिरू
पणेन आत्मनो नित्यत्वं साधयति॥ न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परं॥ पुनः जातु कदाचित् अहं न नासं।
किंतु आसमेव। अतीतेषु देहोत्पत्तिविनाशेषु नित्य एव आसमित्यर्थः। तथा न त्वं १८
नासीः। किंतु ... आसीरेव। तथा न इमे जनाधिपाः नासन्। किंतु आस

न्नेव। तथा च वयं सर्वे अतः अस्मात् देहपातात् परं उत्तरकालेपि न भविष्यामः। किंतु
भविष्याम एव। आत्मस्वरूपेण त्रिष्वपि कालेषु वयं सर्वे नित्या एव। अत्र वयं सर्वे
इत्यत्र देहभेदानुवृत्त्या बहुवचनं नात्मभेदाभिप्रायेण तत्र कथमिव नित्य आत्मे
ति दृष्टांतं वदन्नाह। १२ परमात्मनो नित्यत्वेपि जीवानां जन्ममरणयोः प्रसिद्धत्वात् कथं
नित्यत्वमित्याशंक्याह दृष्टांतेन आत्मनो नित्यत्वं साधयति॥ देहिनोस्मिन् यथा
देहे कौमारं यौवनं जरा। तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति॥ देहिनो देह
वतः आत्मनः अस्मिन् वर्तमाने देहे यथा येन प्रकारेण कौमारं बाल्यावस्था यौवनं मध्य
मावस्था जरा जीर्णावस्था। इति एतास्तिस्रः अवस्थाः अन्योन्यविलक्षणाः अविकृत
स्यैव आत्मनो भवंति पूर्वावस्थानाशे यथा आत्मनो न नाशः उत्तरावस्थोप
त्तेनो आत्मनः उत्पत्तिः तथा तद्वदेव वर्तमानात् देहात् देहांतरप्राप्तिः

अपि किं यस्य आत्मनः भवति तत्र एवं सति धीरो ज्ञानी मोहं नापद्यते। १३ यद्यपि आत्मा नि
त्य इति जानतः आत्मनाश निमित्तौ शोकमोहौ न भवतः तथापि तदेहवियोगज सुख
वियोगदुःखसंयोगनिमित्तौ शोकमोहौ संभवत इति अर्जुनस्य वचनमाशंक्याह।
॥ मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः। आगमापायिनोऽनित्यास्तांस्ति
तिक्षस्व भारत। १४ मीयंते शब्दादयो विषया याभिः ताः मात्राः श्रोत्रादीनी इंद्रियाणि
स्पृश्यंत इति स्पर्शाः शब्दादयो विषयाः। मात्रा च स्पर्शाश्च मात्रास्पर्शाः। अथवा मा
त्राणां इंद्रियाणां स्पर्शाः शब्दादिभिः संयोगाः। ते मात्रास्पर्शाः शीतोष्णसुखदुःखदाः
शीतं उष्णं सुखं दुःखं प्रयच्छंतीति। आगमापायिनः उत्पत्तिविनाशशीलाः अतएव १९
व अनित्याः तस्मात् तान् तितिक्षस्व सहस्व हे भारत तेषु हर्षं विषादं मा कार्षीः॥
हे कौंतेय उ पुनः मात्रास्पर्शाः शीतोष्णसुखदुःखदाः आगमापायिनः अनित्याः॥

अतएव हे भारत तान् तितिक्षस्व। १४ तत्प्रतीकारप्रयत्नादपि तत्सहनमेव उचितं यतः
तत्सहने निरतिशयं फलमित्याह॥ यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ। समदुःख
सुखं धीरं सोऽमृतत्वाय कल्पते। १५ हे पुरुषर्षभ हि यस्मात् एते शीतोष्णादयः विषयाः
इंद्रियाणि च यं आत्मदर्शिनं समदुःखसुखं। समे दुःखसुखे यस्य सः तं। सुखदुःख
प्राप्तौ हर्षविषादरहितं धीरं धीमंतं पुरुषं न व्यथयंति। सः ज्ञानी हि द्वंद्वसहिष्णुः अमृतत्वा
य मोक्षाय कल्पते समर्थो भवति। १५ तत्त्वविचारतोऽपि शोकमोहौ अनुचितौ शीतो
ष्णादिसहनं च युक्तमित्याह॥ नासतो विद्यते भावो नाभावो विद्यते सतः। उभयो ×
रपि दृष्टोऽंतस्त्वनयोस्तत्त्वदर्शिभिः। १६ असतः शीतोष्णादेः सकारणस्य अविद्या
सहितस्य भावः सत्ता न विद्यते तथा सतः आत्मनः अभावः अविद्यमानता न
विद्यते उ पुनः तत्त्वदर्शिभिः ब्रह्मणो याथात्म्यदर्शनशीलैः उभयोरपि अन

योः सदसतोः आत्मानात्मनोः अंतो निर्णयो दृष्टः ।१६ यत् स्वत् स्वभावं अविना
शि वस्तु अपि विशेषेणोक्तं । तद्विशेषतो दर्शयति ॥ अविनाशि तु तद्विद्धि येन सर्व
मिदं ततं । विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ।१७ पुनः येन इदं सर्वं जगत्
ततं व्याप्तं तत् सत् अविनाशि विद्धि । कश्चिदपि पुमान् अस्य अव्ययस्यात्मनः विनाशं अभावं
कर्तुं न अर्हति ।१७ यत् असत् स्वरूपं स्वात्मसत्तायां व्यभिचारि सामान्येनोक्तं तदपि वि
शेषतो दर्शयति ॥ अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः । अनाशिनोऽप्रमेयस्य त
स्माद्युध्यस्व भारत ।१८ हे भारत इमे देहाः नित्यस्य अविक्रियस्य अविनाशिनो विना
शरहितस्य अप्रमेयस्य प्रमाणातीतस्य शरीरिणः आत्मनः अंतवंतः । अंतो ना
शो येषां ते अंतवंतः नाशशीला उक्ता विद्वद्भिः यथा देहो भस्मीभूतो अदर्शनं गतो न २०
ष्ट उच्यते । विद्यमानोऽपि यथा अन्यथा परिणतो व्याध्यादियुक्तो नष्ट उच्यते । अ

त्र अस्य आत्मनः अनाशिनः नित्यस्य द्विविधेनापि नाशेन संबंधो नास्ति ।१८ यच्च आ
त्मनो हंतृत्वनिमित्तं भीष्मादीनां हन्यमाननिमित्तं दुःखमुक्तं एतान्न हंतुमिच्छामि इत्यादि
ना तदपि आत्मविनाशादिहेतुकशोकमोहवह्निमूलमेवेत्याह । य एनं वेत्ति हंतारं
यश्चैनं मन्यते हतं । उभौ तौ न विजानीतो नायं हंति न हन्यते ।१९ यः पुमान् एनं देहिनं हंता
रं हननक्रियायाः कर्तारं वेत्ति जानाति । च पुनः यः पुमान् एनं देहिनं ह तं ह
ननक्रियायाः कर्मभूतं मन्यते । तावुभावपि न विजानीतः । देहेंद्रियादिसंघा
त एव हंता हन्यते च इति तौ नावबुध्येते । विवेकेनात्मानं हंता अहं हतोऽहं इति दे
हहनने आत्मानं अहं प्रत्ययविषयं यो विजानीतः तौ आत्मस्वरूपानभिज्ञा
वित्यर्थः । यस्मात् नायं आत्मा हंति न हननक्रियायाः कर्ता न च हन्यते न च
कर्मभवतीत्यर्थः । अविक्रियत्वात् । कथमविक्रिय आत्मेति द्वितीयो मंत्रः ।२०

अविक्रियत्वात् हननक्रियायाः कर्त्ता कर्म्म च न भवतीत्युक्तं पूर्वस्मिन् मंत्रे तदेव अवि
क्रियत्वं हेतुभूतं षड्भावविकाररहितत्वेन साधयति॥ ॥न जायते म्रियते वा कदा
चिन्नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमा
ने शरीरे॥२०॥ अयं आत्मा कदाचित् नोत्पद्यते वा कदाचित् न म्रियते वा अथवा अयं आ
त्मा भूत्वा भूयः अभविता न न जायते यस्मादेवं तस्मादजः। न जायत इति अनेन
षड्भावविकाररहित्यमुक्तं जायते अस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्य
ति इति षड्भावविकाराः। न जायते न म्रियते इति आद्यौ तौ विकारौ निरस्तौ शाश्वतः निरवयव
त्वात् न स्वरूपेण अपक्षीयते निर्गुणत्वात् न गुणक्षयेण अपक्षीयते इति अपक्षयरहितः
पुराणः निरवयवत्वात् अवयवोपचय लक्षणा वृद्धिर्नास्ति अत एव पुराणः। नूतनत्वाभावात्
पुराणः। एतेन वृद्धिलक्षणविकाररहितः न हन्यते न विपरिणम्यते हन्ति स्वविपरिणा २१
मार्थः। एतेन विपरिणामलक्षणा विक्रिया निषिद्धा ततो जन्मनिमित्ता अस्तिता नास्ति तेन

षड्भावविकाररहितः। य एनं वेत्ति हन्तारं मित्यनेन आत्मनो हननक्रियां प्रति कर्मत्वक
र्तृत्वाभावं प्रतिज्ञाय न जायत इत्यनेन अविक्रियत्वं ...... साधयित्वा प्रतिज्ञातार्थमुपसं
हरति। वेदाविनाशिनं नित्यं य एनमजमव्ययं। कथं स पुरुषः पार्थ कं घातयति हन्ति कं॥
२१॥ यः पुमान् एनं आत्मानं अविनाशिनं नित्यं अजं अव्ययं वेद जानाति हे पार्थ स
पुरुषः कथं केन प्रकारेण कं पुरुषं घातयति कं पुरुषं हन्ति हिनस्ति आत्मनः षड्भाव
विकाररहितत्वात् हन्तुं न शक्यते॥२१॥ आत्मनः पूर्वं प्रतिपादितमविनाशित्वं दृष्टां
तेन द्रढयति। वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा एवं शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥२२॥ नरः पुरुषः
यथा येन प्रकारेण लोके जीर्णानि दुर्बलतां गतानि वासांसि वस्त्राणि विहाय परि

ज्या
त्यज्य अपराणि अन्यानि नवानि नूतनानि गृह्णाति। उपादत्ते। देही आत्मा तथा तेन प्र
कारेण जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति। देही आत्मा पुरुषवत् अवि
क्रिय एवेत्यर्थः। २२ विनाशादेवत्वात् अपि अविनाशी स्याद। नैनं छिंदंति शस्त्राणि
नैनं दहति पावकः। न चैनं क्लेदयंत्यापो न शोषयति मारुतः। २३ शस्त्राणि असया
दीनि एनं आत्मानं न छिंदंति। निरवयवत्वात्। अवयवविनाशं न कुर्वंति। तथा
पावकोऽग्निरपि एनं आत्मानं न दहति। न भस्मीकरोति। च पुनः आपः एनं आ
त्मानं न क्लेदयंति। आर्द्रीभावेन न शीर्णयंति। अपां हि सावयवस्य वस्तुनः आ
र्द्रीभावकरणेनावयवविश्लेषापादने सामर्थ्यं। न तत् निरवयवे आत्मनि सं २२
भवति। मारुतः वायुरपि एनं आत्मानं न शोषयति। २३ विनाशहेत्वभावे सा
धितं सिद्धमविनाशित्वमनुवदति॥ ॥अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्य एव च।

नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥ २४ अयं आत्मा अच्छेद्यः छेत्तुमशक्यः। अयं आत्मा
अदाह्यः दग्धुमशक्यः। अक्लेद्यः आर्द्रीभावेन शीर्णयितुमशक्यः। च पुनः अशोष्यः शोषयि
तुमशक्यः। नित्यः अविनाशी। सर्वगतः सर्वव्यापी। स्थाणुः स्थिरः। अचल नरहितः स्थिरः सनातनः। २४ अ
हित
व्यक्तोयमचिंत्योयमविकार्योऽयमुच्यते। तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥ यस्मा
दयं आत्मा अव्यक्तः इंद्रियैः न अभिव्यज्यते। अचिंत्यः बुद्धींद्रियागोचरः। निरवयवत्वात् अ
संगत्वात्। अविकार्यः विक्रियारहितः। अविनाशित्वेन पाठं शोकाभावं उपसंहरति। तस्मादेवमि
ति। तस्मादेतमात्मानं। अच्छेद्यं अदाह्यं अक्लेद्यं अशोष्यं नित्यं सर्वव्यापिनं स्थिरं अचलं
सनातनं अव्यक्तं अचिंत्यं अविकार्यं एवंविधं विदित्वा शोचितुं न अर्हसि। २५ देहादीनां विनाशे
पि आत्मनः अविनाशित्वात् शोकमोहो न कार्यो इत्युक्तं। इदानीं देहविनाशेन आत्म
नापि विनाशं अंगीकृत्य आह॥ ॥अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं। तथा

पि त्वं महाबाहो नैवं शोचितुमर्हसि। २६ अथ च। एतदंगीकारे पुनं आत्मानं नित्यजातं शरीरे
ण सह सर्वदा जायमानं। अथवा नित्यं मृतं मन्यसे तथापि हे महाबाहो त्वं एवं आत्मानं शोचि
तुं न अर्हसि। २६ तत्रापि हेतुमाह। जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। तस्मादपरिहार्ये
ऽर्थे न त्वं शोचितुमर्हसि। २७ यस्मात् जातस्य लब्धजन्मनः ध्रुवः अव्यभिचारी मृत्युः। च पुनः
मृतस्य ध्रुवं अव्यभिचारि जन्म। तस्मात् त्वं अपरिहार्ये अर्थे अनिराकरणीये अर्थे एनं आ
त्मानं शोचितुं न अर्हसि। २७ यद्यपि आत्मनि शोको न युक्तः। तथापि द। देहादिभूत
संघातमुद्दिश्य शोको युक्त इत्याह। अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अ
व्यक्तनिधनान्येव तत्र का परिदेवना। २८ हे भारत भूतानि अव्यक्तादीनि। अव्यक्तं
अदर्शनं आदिर्येषां तानि अव्यक्तादीनि। व्यक्तमध्यानि स्पष्टमध्यानि। अव्यक्त २३
निधनानि मरणादनंतरं अदृश्यानि। तत्र का परिदेवना। का प्रलापः कः। २८ न के
वलं त्वं विदुषामपि आत्मापरिज्ञानात् शोकमोहो भवतः आत्मापरिज्ञा

नं चात्र दुर्विज्ञेयत्वादात्मनः इत्यभिप्रायेण दुर्विज्ञेयत्वमात्मन आह। आश्चर्यवत्पश्यति क
श्चिदेनमाश्चर्यवद्वदति तथैव चान्यः। आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं
वेद न चैव कश्चित्। २९ कश्चित् एनं आत्मानं आश्चर्यवत्। अदृष्टपूर्वं विस्मयकारि वस्तु
तद्वत् पश्यति। च पुनः अन्यः तथैव आश्चर्यवत् अनुक्तपूर्वं अद्भुतं उच्यमानं यथा तद्वत् प
प्रपति। च पुनः एनं आत्मानं अन्यः आश्चर्यवत् अश्रुतपूर्वं अद्भुतं श्रूयमाणं यथा तद्वत् शृ
णोति। दृष्ट्वा उक्त्वा श्रुत्वापि एनं आत्मानं कश्चिन्न वेद। २९ तस्मादात्मनो दुर्विज्ञेयत्वात् आत्मा
ज्ञानकृतौ सर्वस्य शोकमोहौ निर्मूलौ विवेकिनां न कर्तव्यौ इत्यभिप्रायेण अशोच्यान् इत्या
दि प्रकरणप्रतिपादितमर्थमुपसंहरति॥ देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि। हे भारत अयं देही सर्वस्य देहे हन्यमाने
ऽपि नित्यं अवध्यः। तस्मात् सर्वाणि भीष्मद्रोणादीनि भूतानि उद्दिश्य शोचितुं न अ
र्हसि। ३० न केवलं परमार्थं दृष्ट्वा शोको न युक्तः। स्वधर्मं दृष्ट्वापि

श्रेयोऽ

श्लो० कोन युक्त इत्यादौ। स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि। धर्म्याद्धि युद्धात् श्रेयोऽन्यत्
क्षत्रियस्य न विद्यते॥ ३१ ॥ स्वधर्ममपि क्षत्रियस्य स्वकीयं युद्धलक्षणं धर्मं अवेक्ष्य वि
चार्य विकंपितुं प्रचलितुं न अर्हसि हि यस्मात् क्षत्रियस्य धर्म्यात् युद्धात् धर्मादनपेतात् सं
ग्रामात् अन्यत् श्रेयः न विद्यते॥ स्वधर्मे लक्षणे युद्धकरणे कारणांतरमाह। यदृच्छया चो
पपन्नं स्वर्गद्वारमपावृतं। सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशं॥ ३२ ॥ हे पार्थ ईदृशं
युद्धं सुखिनः पुण्यवंतः क्षत्रिया लभंते। कीदृशं अपावृतं स्वर्गद्वारं उद्घाटितं स्वर्गद्वारमि
त्यर्थः। पुनः यदृच्छया उपपन्नं अप्रार्थितमागतं॥ ३२ ॥ स्वधर्माकरणे दोषमाह॥ अथ
चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि। ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥ ३३ ॥ हे अर्जुन
अथ चेत् त्वं इमं धर्म्यं धर्मादनपेतं संग्रामं युद्धं न करिष्यसि ततः स्वधर्मं क्षत्रियधर्मं पु २४
नः कीर्तिं [illegible] महादेवादिसमागमनिमित्तां ख्यातिं हित्वा पापं अधर्मं अपकीर्तिं च प्राप्स्यसि॥ ३३ ॥

× संभावितस्य च

न केवलं स्वधर्मत्याग एव भवेत् अकीर्तिरपि स्यादित्याह। अकीर्तिं चापि भूतानि कथयिष्यं
ति तेऽव्ययां। संभावितस्य चाकीर्तिर्मरणादतिरिच्यते॥ ३४ ॥ च अपरं भूतान्यपि ते तव अव्ययां दी
र्घकालीं अकीर्तिं कथयिष्यंति। पुनः धर्मात्मा शूरः इत्येवमादिभिर्गुणैः प्रसिद्धस्य तव अकीर्तिः
मरणात् अतिरिच्यते अधिका भवति॥ ३४ ॥ तदेव विवृणोति। भयाद्रणादुपरतं मंस्यंते त्वां महार
थाः। येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं॥ ३५ ॥ महारथाः दुर्योधनकर्णादयः त्वां रणात् यु
द्धात् भयात् उपरतं निवृत्तं मंस्यंते चिंतयिष्यंति। पुनः येषां दुर्योधनादीनां बहुमतो भूत्वा बहु
भिर्गुणैर्युक्तः इत्येवं मतो भूत्वा लाघवं लघुतां यास्यसि प्राप्स्यसि॥ ३५ ॥ अवाच्यवादांश्च
बहून् वदिष्यंति तवाहिताः। निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं॥ ३६ ॥ च अपरं तव अहिताः तव
अरयः बहून् अनेकप्रकारान् अवाच्यवादान् अवक्तव्यवादान् वदिष्यंति। किं कुर्वंतः। तव सा
मर्थ्यं निंदंतः कुत्सयंतः। ततो निंदादुःखात् नु इति प्रश्ने किमन्यद्दुःखतरं॥ ३६ ॥ युद्धे च क्रिय

मालोः जयेपराजयेपि संदिग्धानस्य प्रवृत्तिसिद्ध्यर्थं जयपरजयलाभमाह॥ हतोवाप्राप्स्यसिस्व
र्गं जित्वावाभोक्ष्यसेमहीं॥ तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः॥३७॥ हेअर्जुनवाअथवात्वंह
तःसन्स्वर्गंप्राप्स्यसि वा अरीन्शत्रून्मारयिष्यामि इति निश्चयं कृत्वा युद्धाय उत्तिष्ठ॥ गु
र्वादीनामपि वधे यथा पापसंबंधो न भवति तं प्रकारमाह॥ सुखदुःखे समे कृत्वा लाभाला
भौ जयाजयौ॥ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥३८॥ सुखदुःखे तथा लाभालाभौ
जयाजयौ समौ तुल्यौ कृत्वा तत्र रागद्वेषौ अकृत्वा ततो युद्धाय युज्यस्व। एवं पापं न अ
वाप्स्यसि सुखे नीरागः दुःखे द्वेषरहितः तथा लाभालाभौ जयपराजयौ समौ कृत्वा एवं युद्धं
कुर्वन् पापफलं न प्राप्स्यसीत्यर्थः॥ ३८ सांख्ययोगेनउपदिष्टं उपसंहरन् तत्साधनं कर्मयो
गं अधिकरोति॥ एषातेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु॥ बुद्ध्यायुक्तो य २५
या पार्थ कर्मबंधं प्रहास्यसि॥३९॥ हे अर्जुन एषा ते तुभ्यं बुद्धिः ज्ञानं सांख्ये परमार्थवस्तुवि

वेकविषये अभिहितं। उ पुनः योगे ईश्वराराधनार्थे कर्मानुष्ठाने इमां वक्ष्यमाणां बुद्धिं शृणु
हे पार्थ यया योगविषयया बुद्ध्या युक्तः कर्मबंधं धर्माधर्मलक्षणं प्रहास्यसि त्यक्ष्यसि॥ तत्
अत्रफलसक्तिसार प्रत्यवायादिकमपि वैगुण्यकृतं न भवतीति कृषियागादिवदित्या
ह॥ नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो
भयात्॥४०॥ इह मोक्षमार्गे कर्मयोगे अभिक्रमः प्रारंभः तस्य कृष्यादिवत् नाशो ना
स्ति। तथा चिकित्सावत् इह मोक्षमार्गे कर्मयोगे प्रत्यवायो न विद्यते नास्ति॥ अस्य यो
गधर्मस्य स्वल्पमपि अनुष्ठितं महतो भयात् संसारभयात् रक्षति॥४०॥ सांख्य
योगबुद्धेः इतरस्याः काम्यकर्मबुद्धेश्च वैलक्षण्यमाह॥ व्यवसायात्मिका बु
द्धिरेकेह कुरुनंदन॥ बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां॥४१॥ हे कुरुनंद
न इह आराधनामार्गे व्यवसायात्मिका निश्चयस्वं

त्मा वा बुद्धिरेकेवा। दियस्मात् अव्यवसायिनां अनिश्चितबुद्धीनां बुद्धयः बहुशाखाः।
बहुभेदभिन्नाः पुनः प्रतिशाखाभेदेन अनंताः॥४१॥ सांख्ययोगबुद्ध्योः प्रवृत्तिनिवृत्तीं
इतरस्यां अकाम्यकर्मसु प्रवर्त्तमानानां सांख्याया यु बुद्धिप्राप्त्यलब्धा वलब्ध
त्वं दोषमाह॥ यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्ती
ति वादिनः॥४१॥ हे पार्थ वेदवादरताः अर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषु रताः।
अविपश्चितः अविवेकिनः यां इमां पुष्पितां पुष्पितवृक्षइव शोभमानां वाचं प्रवदंति। स्वर्ग
पश्वादिफलसाधनेभ्यः कर्मभ्यो अन्यन्नास्तीति वादिनः॥४२ ते च॥ ॥कामात्मानः स्व
र्गपरा जन्मकर्मफलप्रदां॥ क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥४३ कामात्मानः का
मपराः। स्वर्गः परः पुरुषार्थो येषां ते स्वर्गपराः। किंलक्षणां वाचं जन्मकर्मफलप्रदां। २६
जन्मैव कर्मफलं प्रददातीति जन्मकर्मफलप्रदां। स्वर्गपशुपुत्रादिलक्षणा अर्थाय

या वाचा बाहुल्येन प्रकाश्यंते। तासां भोगैश्वर्ययोः प्राप्तिं प्रति साधनभूताः। ते क्रियाविशेषास्
तद्बहुलां वाचं प्रवदंतो मूढाः संसारे परिवर्त्तंत इत्यभिप्रायः॥४३ भोगैश्वर्यप्रसक्तानां तया
पहृतचेतसां। व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥४४ तेषां भोगैश्वर्ययोः प्रीतिम
तां तया पुष्पिताद्यपहृतविवेकबुद्धीनां सांख्ये योगे वा बुद्धिर्व्यवसायात्मिका समाधौ चि
त्तेन विधीयते न जायते॥४४ यदि काम्यकर्मबुद्धेः स्वर्गादिकं परमं फलं न भवति तर्हि
त्वदेः किमिति। तत्साधनतया कर्माणि विधीयंते तत्राह॥ ॥त्रैगुण्यविषया वेदा नि
स्त्रैगुण्यो भवार्जुन। निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥४५ हे अर्जु
न वेदाः त्रैगुण्यविषयाः त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते। संसार
विषयाः। त्वं तु निस्त्रैगुण्यो निष्कामो भव। सुखदुःखद्वंद्वसप्रतिपक्षौ पदार्थौ द्वंद्व
शब्दवाच्यौ। ततो निर्गतो द्वंद्वो भव। सुखदुःखयोः तत्साधनयोः शीतोष्णादिकायाः विक्रियाः र

हितः उभयोरपि समुच्चयार्थः॥ नित्यसत्त्वस्थः सदा सत्त्वगुणाश्रितो भव। तथा निर्यो-
गक्षेमो भव। अनुपात्तस्योपार्जनं योगः। उपात्तस्य रक्षणं क्षेमः। योगक्षेमप्रधानस्य श्रेयसि प्र-
वृत्तिर्दुष्करेत्यतो निर्योगक्षेमो योगक्षेमाभिलाषरहितो भव आत्मवान् अप्रमत्तश्च भव एष तवो-
पदेशः॥४५ स्वधर्ममनुतिष्ठतः सर्वेषु वेदोक्तेषु कर्मसु यान्यनन्तानि फलानि तानि नापेक्षित-
त्वात् ईश्वरार्थमपि कर्म किमर्थमनुष्ठीयत इत्यत्राह॥ यावानर्थ उदपाने सर्वतः सं- निर्वाच्य
प्लुतोदके। तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥४६ यावानर्थ उदपाने वापीकूपतडागादौ
यावानर्थः। यावत्स्नानपानादि तावत्स्नानपानादिकं सर्वतः संप्लुतोदके x
यथा विद्यत एव तत्रान्तर्भवतीत्यर्थः॥ (तथा सर्वेषु वेदेषु वेदोदितं) तस्मात् तेषु वेदोदितं कर्म प्रयोजनं स्वर्गादिसुखं तथा सर्वेषु वेदोदितं॥पाठ२
ब्रह्मविदः फले विद्यते तत्रान्तर्भवतीत्यर्थः॥ तस्मात् ईश्वरार्थं कर्म क्रियमाणं स्वर्गादि-
फलेभ्यः निरतिशयफलज्ञानकं भवतीत्यर्थः॥४६ सर्वकर्मफलं ज्ञानफले अन्तर्भवति- २७
त्वात् तर्हि सर्वे ज्ञानमेव संपादनीयं किं कर्मणा इत्याशंक्याह॥ ॥कर्म-

ण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि॥४७ हे अर्जुन
ते तव कर्मण्येवाधिकारः। न ज्ञाननिष्ठायां कदाचन कस्यांचिदवस्थायां। फलेषु कर्मफ-
लेष्वभ्यासा मा भूत्। कर्मफलहेतुः कर्मफलसाधको मा भूः। ते तव अकर्मणि कर्माकरणे ३०
संगः प्रीतिः मास्तु॥४७ यदि फलयुक्तेन कर्म न कर्तव्यं। कथं तर्हि कर्तव्यं तत्राह॥ ॥यो-
गस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्य-
ते॥४८ हे धनंजय संगं त्यक्त्वा ईश्वरतुष्टिमपि अप्रार्थयन् योगस्थः केवलं ईश्वरार्थं
कर्माणि कुरु। किं कृत्वा सिद्ध्यसिद्ध्योः समो भूत्वा। मनःशुद्धिज्ञानप्राप्तिः सिद्धिः
तद्विपरीता असिद्धिः। तयोः समस्तुल्यो भूत्वा कर्माणि कुरु। सिद्ध्यसिद्ध्योः समत्वं यो-
ग उच्यते॥४८ ~~हे धनंजय~~ यत्पुनः समत्वबुद्धियुक्तं ईश्वराराधनार्थं कर्म एतस्मात् कर्त-
व्यं॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय। बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥

हि यस्मात् हे धनंजय बुद्धियोगात् समत्वबुद्धियुक्तात् कर्मणः सकाशात् फलार्थं क-
र्म दूरेण अतिविप्रकर्षेण अवरं निकृष्टं बुद्धौ परमेश्वरार्पणकर्मबुद्धौ तत्त्वबुद्धौ
वा शरणं रक्षकं आश्रयं अन्विच्छ प्रार्थय त्वं परमार्थज्ञानशरणो भव। फलहेतवः फल-
तृष्णाप्रयुक्ताः कृपणाः दीनाः॥४९॥ समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत्फलं प्रा-
प्नोति तदाह॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते। तस्माद्योगाय युज्य-
स्व योगः कर्मसु कौशलं॥५०॥ बुद्धियुक्तः समत्वविषयया बुद्ध्या युक्तः इह अस्मिन्
लोके उभे सुकृतदुष्कृते पुण्यपापे जहाति परित्यजति। तस्मात् योगाय समत्वबुद्धियो-
गाय युज्यस्व घटस्व। य योगः समत्वबुद्धिः कर्मसु कौशलं बंधकमपि कर्म त्वबु- २८
द्धियुक्तं विमुक्तिहेतुः॥५०॥ कर्मणां मोक्षसाधकत्वप्रकारमाह॥ कर्मजं बुद्धियु-

क्ता हि फलं त्यक्त्वा मनीषिणः। जन्मबंधविनिर्मुक्ताः पदं गच्छन्त्यनामयं॥५१॥ हि यस्मात् बु-
द्धियुक्ताः समत्वबुद्धियुक्ताः कर्मजं कर्मभ्यो जातं इष्टानिष्टदेहप्राप्तिलक्षणं फलं त्यक्त्वा
मनीषिणो ज्ञानिनो भूत्वा जीवंत एव जन्मबंधविनिर्मुक्ताः संतः अनामयं सर्वोप-
द्रवरहितं मोक्षाख्यं पदं विष्णोः परमं पदं गच्छंति॥ योगानुष्ठानजनितसत्त्वशु-
द्धिजा बुद्धिः कदा प्राप्यते इत्याह॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति। तदा
गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥५२॥ यदा ते तव बुद्धिः मोहकलिलं मोहात्मकं
अविवेककालुष्यं व्यतितरिष्यति व्यतिक्रमिष्यति। तदा तस्मिन् काले श्रोतव्यस्य अर्थ-
जातस्य श्रुतस्य अर्थजातस्य निर्वेदं खेदं गंतासि अधीतं ग्रंथीतं च निष्फलं प्रतिज्ञा-
स्यसि। परमात्मा मोहकलिलात्ययद्वारेण लब्धात्मविवेकजप्रज्ञः कदा कर्मयोगफ-

ऊँ फलं परमार्थयोगमवाप्स्यसि तत्कुलो इत्यादः॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्य
ति निश्चला। समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥५३॥ हे अर्जुन श्रुतिविप्रतिपन्ना ते यदा
स्थास्यति निश्चला। समाधावचला बुद्धिस्तदा योगम् अनेकसाध्यसाधनसंबंधप्रकाशनवा
क्यश्रवणैर्विक्षिप्ता सती तेतव बुद्धिर्यदा यस्मिन्काले निश्चला स्थिरीभूता विक्षेपचलन
वर्जिता सती समाधौ आत्मनि अचला तत्रापि विकल्पवर्जिता स्थास्यति तदा योगं वि
वेकप्रज्ञां प्राप्स्यसि॥ प्रश्नबीजं प्रतिलभ्य लब्धसमाधिप्रज्ञस्य लक्षणं बुबुत्सया अ
र्जुन उवाच॥ अर्जुन उवाच॥ स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थि
तधीः किं प्रभाषेत किमासीत व्रजेत किं॥५४॥ अहमस्मि ब्रह्मेति स्थिता प्रतिष्ठिता प्रज्ञा २९
यस्य सः स्थितप्रज्ञः॥ तस्य का भाषा कथमभिधीयते॥ समाधौ आत्मनि स्थितस्य च
का भाषा॥ स्थितधीः स्थितप्रज्ञः किं वदेत्। किमासीत। तस्य आसनं कथं॥ व्रजनं वा कथं॥

५४ यत्र साध्यवातूयानियानियत्र साध्यमनिसाधनानि लभ्यते तानि निवर्त्तंते तानीत्याह भग
वानादौ॥ श्रीभगवानुवाच॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्। आत्मन्येवा
त्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥५५॥ हे पार्थ यदा मुनिः सन्न्यासी मनोगतान्मनसि स्थि
तान्सर्वान्कामान्दुरिच्छान्तेदान्प्रजहाति त्यजति। आत्मन्येव प्रत्यगात्मनि आत्मना
परमात्मदर्शनामृतरसलाभेन तुष्टः॥ तदा स्थितप्रज्ञ उच्यते॥५५॥ दुःखेष्वनुद्विग्नमनाः
सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥५६॥ दुःखेषु आध्यात्मिकादिषु
अनुद्विग्नमनाः अक्षुभितमनाः। सुखेषु प्राप्तेषु विगतस्पृहः। वीतरागभयक्रोधो मुनिः
स्थितधीरुच्यते॥५६॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं। नाभिनंदति न द्वेष्टि त
स्य प्रज्ञा प्रतिष्ठिता॥५७॥ यः सर्वत्र देहजीवनादिष्वपि अनभिस्नेहः अभिस्नेहवर्जितः।

तत्तत् शुभाशुभं प्राप्य न अभिनंदति । न द्वेष्टि । तस्य मुनेः प्रज्ञा विवेकजा बु
द्धिः प्रतिष्ठिता ॥५७॥ यदा संहरते चायं कूर्मोंगानीव सर्वशः । इंद्रियाणींद्रियार्थे
भ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥ च अपरं यदा अयं मुनिः ज्ञाननिष्ठायां प्रवृत्तः सर्वशः सर्वे
भ्यः इंद्रियार्थेभ्यः विषयेभ्यः इंद्रियाणि चक्षुरादीनि संहरते उपसंहरति । क इव । कानीव ।
कूर्मोंगानीव । यथा कूर्मः स्वयात् स्वांगानि सर्वशः सर्वतः उपसंहरते । तस्य प्रज्ञा
विवेकजा बुद्धिः प्रतिष्ठिता स्थिता ॥५८॥ विषया जनाहरतः आतुरस्यापि इंद्रियाणि
निवर्तंते । न तु तद्विषयो रागः स कथं संक्रियते तदाह ॥ विषया विनिवर्तंते
निराहारस्य देहिनः । रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते ॥५९॥ निराहार
स्य अनुपभुज्यमानविषयस्य देहिनः रसवर्जं विषयरागवर्जं विष 30
या विनिवर्तंते । अस्य देहिनः रसोपि रागोपि परं परमार्थतत्त्वं दृष्ट्वा निवर्तते ॥५९॥

आत्मप्रज्ञां चिकीर्षोः इंद्रियाणि नियमने दोषमाह ॥ यततो ह्यपि कौंतेय पुरुषस्य वि
पश्चितः । इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥६०॥ हे कौंतेय हि यस्मात् यततो
पि यत्नं कुर्वतोपि विपश्चितः मेधाविनः पुरुषस्य प्रमाथीनि प्रमथनशीलानि इंद्रि
याणि प्रसभं हठात् मनो हरंति ॥६०॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः । वशे हि
यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥ युक्तः समाहितचेताः तानि सर्वाणि इंद्रियाणि
संयम्य वशीकृत्य मत्परः मत्परायण तिष्ठेत् । हि यस्मात् यस्य इंद्रियाणि वशे । यद
धीनानि वर्तंते तस्य प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता ॥६१॥ ध्यायतो विषयान् पुंसः
संगस्तेषूपजायते । संगात् संजायते कामः कामात् क्रोधोभिजायते ॥६२॥ विषया
न् शब्दादीन् ध्यायतः आलोचयतः पुंसः पुरुषस्य तेषु विषयेषु संगः आसक्ति
: उपजायते । संगात् आसक्तेः प्रीतेः कामः तृष्णा उपजायते । कामात् क्र

भिलाषात् कुतश्चित् प्रतिहतात् क्रोधोऽभिजायते ॥६२॥ क्रोधाद्भवति संमोहः सं
मोहात् स्मृतिविभ्रमः स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥६३॥ क्रोधात्
संमोहः अविवेको भवति । संमोहात् शास्त्र[illegible] संस्कारजनितायाः स्मृतेर्वि
भ्रंशो भ्रंशो भवति । स्मृतिभ्रंशात् कार्याकार्यविषयायाः बुद्धेर्नाशो भवति । बुद्धि
नाशात् प्रणश्यति । विवेकविज्ञानरहितो नष्ट एव भवति ॥६३॥ सर्वानर्थस्य मूलं
विषयाभिध्यानमुक्तं अथेदानीं मोक्षकारणमिदमुच्यते । रागद्वेषवियु
क्तैस्तु विषयानिन्द्रियैश्चरन् । आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥
तु पुनः विधेयात्मा वश्यचित्तः रागद्वेषवियुक्तैः रागद्वेषरहितैः आत्मवश्यैः आत्म ३१
नः वशीभूतैः इंद्रियैः श्रोत्रादिभिः अप्रार्थितान् विषयान् चरन् उपलभमा
नः प्रसादं स्वास्थ्यं अधिगच्छति ॥६४॥ ^ प्रसादे सर्वदुःखानां हानिरस्योपजा
×प्रसादे सति किं स्यादित्याह । पा० ।

यते । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥६५॥ प्रसादे [illegible] चेतसः प्रसादे अस्य
यतेः सर्वदुःखानां आध्यात्मिकादीनां हानिः विनाशः उपजायते । किं चाद्वि यस्मात् प्रसन्न
चेतसः स्वच्छान्तःकरणस्य बुद्धिर्विवेकजा प्रज्ञा आशु शीघ्रं पर्यवतिष्ठते आत्मस्वरूपेणैव
निश्चला भवति ॥६५॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना न चाभावयतः शान्तिरशां
तस्य कुतः सुखं ॥६६॥ अयुक्तस्य योगरहितस्य बुद्धिः आत्मस्वरूपविषया नास्ति । च पुनः ×
अभावयतः आत्मज्ञानाभिनिवेशं अकुर्वतः शान्तिर्न भवति । अशान्तस्य उपशमरहि
तस्य सुखं कुतः । न क्वापि सर्वथा सुखस्य गंधमात्रमपि नोपपद्यते इत्यर्थः ॥६६॥ अयुक्तस्य
कस्मात् बुद्धिर्नास्ति इत्याह ॥ इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते तदस्य हर
ति प्रज्ञां वायुर्नावमिवांभसि ॥६७॥ हि यस्मात् यत् मनः इंद्रियाणां चरतां स्व विषयेषु
प्रवर्त्तमानानां अनुविधीयते । तत् मनः अस्य यतेः इंद्रियविषयविकल्पनेन

वृत्तं सत् प्रज्ञां आत्मा नात्म विवेकजां हरति। किं इव। वायुरिव। यथा वायुः अंभसि उदके जिगमि
षतो मार्गाद् उद्धृत्य उन्मार्गे नावं प्रवर्तयति एवं आत्म विषयां प्रज्ञां हृत्वा मनो विषय विषयां
करोति। ६७ यततो ह्यपीति उपन्यस्यार्थस्य अनेकधा उपपत्तिं उक्त्वा तं अर्थं उपपादयन् उपसं
हरति। तस्माद् यस्य महाबाहो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्त
स्य प्रज्ञा प्रतिष्ठिता। ६८ इंद्रियाणां प्रवृत्तौ दोषः उक्ता दि [illegible] स्मात्। तस्मात् हे महा
बाहो यस्य यतेः इंद्रियाणि सर्वशः इंद्रियार्थेभ्यः विषयेभ्यः लौकिको व्यवहारः स
तु यत्र विवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वाद् अविद्यानिवृत्तौ निवर्तते।
अविद्यायाश्च विद्याविरोधान् निवृत्तिः इत्येतमर्थं स्फुटीकुर्वन्नाह। तथा सविद्याविद्य
या विरोधात् इतो भिन्नविषयत्वमाह॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥ ६९ सर्वभूतानां यस्मिन् परमार्थ तत्त्वे २२

मा हमयी सर्वपदार्थानां अविवेककरी तमः स्वभावा निशा। तस्यां तस्मिन् परमार्थ तत्त्वे
संयमी जागर्ति। यस्यां अविद्यालक्षणायां निशायां भूतानि जाग्रति। परमार्थ तत्त्वं
पश्यतो मुनेः सा निशा। ६९ विदुषस्तु केवलस्य स्थितप्रज्ञस्य यतेरेव मोक्ष प्राप्तिः न तु अ
सन्यासिनः कामकामिनः। इत्येतमर्थं दृष्टांतेन प्रतिपादयिष्यन्नाह॥ आपूर्यमाणम
चलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्। तद्वत् कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न का
मकामी। ७० आपः अद्भिः आपूर्यमाणं अचलप्रतिष्ठं अचलतया अवस्थितं समुद्रं यद्व
द्वत् प्रविशंति। तद्वत् सर्वे कामाः सर्वे मनोरथाः यं यतिं प्रविशंति आत्मन्येव प्रली
यंते। स शांतिं मोक्षं प्राप्नोति। कामकामी विषय कामना युक्तः न प्राप्नोति ७०॥
यस्मादेवं तस्मात्॥ विहाय कामान् यः सर्वान्। पुमांश्चरति निःस्पृहः। निर्ममो निर
हंकारः स शांतिमधिगच्छति। ७१ यः सन्यासी पुमान् सर्वान् का

मान् अशेषान् मनोरथान् विहाय परित्यज्य निस्पृहः शरीरजीवनमात्रेपि निरभि-
लाषः निर्ममः ममतारहितः निरहंकारः अहं अभिमानरहितः सन् चरति जीवनमात्र-
चेष्टाशेषः पर्यटति स शांतिं निर्वाणं अधिगच्छति ७१ सेषा ज्ञाननिष्ठा स्तू-
यते॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामंतकालेपि ब्रह्म निर्वा-
णमृच्छति ७२ हे पार्थ एषा ब्रह्मणि भवा ब्राह्मी यथोक्ता स्थितिः सर्वं संन्यस्य ब्रह्मस्व-
रूपेणैव अवस्थानमित्येतत् तु एनां स्थितिं प्राप्य न मुह्यति मोहं न प्राप्नोति अंतकालेपि अं-
ते वयस्यपि अस्यां यथोक्तायां ब्राह्म्यां स्थितौ स्थित्वा पुमान् ब्रह्मनिर्वाणं मोक्षं ऋच्छ-
ति प्राप्नोति यो ब्रह्मचर्यादेव संन्यस्य यावज्जीवं ब्रह्मण्येवावतिष्ठते स ब्रह्मनिर्वा-
णं गच्छति तत्र किं वक्तव्यं ७२ इति श्रीमहाभारते शतसाहस्र्यां संहितायां भीष्मपर्व- ३३
णि भगवद्गीतासु भाष्ये सांख्ययोगो नाम द्वितीयोऽध्यायः ॥ ननटानविटान
गायनानपरद्रोहनिविष्टबुद्धयः नत्वपसद्म ननाम केवयंस्तन भारानमितानयोजितः १

॥०॥ सांख्ययोगबुद्धी शास्त्रस्य प्रवृत्तिविषयभूते भगवता निर्दिष्टे तत्र प्रजहाति यदा
कामानित्यारभ्य अध्यायपरिसमाप्तेः सांख्यबुद्ध्याश्रितानां संन्यासं कर्त्तव्यमुक्त्वा
एषा ब्राह्मी स्थितिरित्यनेन तन्निष्ठतयैव कृतार्थतोक्ता अर्जुनाय कर्मण्येवाधिकार-
स्ते मा ते संगोऽस्त्वकर्मणि इत्यतियोगबुद्धिमाश्रित्य कर्मैव कर्त्तव्यमुक्तवान् न केवलात्
तत एव श्रेयःप्राप्तिं उक्तवान् तदेतदालक्ष्य पर्याकुलीभूतबुद्धिरर्जुन उवाच॥ अर्जुन
उवाच॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन। तत्किं कर्मणि घोरे मां नियोजयसि केशव॥१
हे जनार्दन चेत् यदि कर्मणः सकाशात् बुद्धिर्ज्ञानं तेन तव ज्यायसी श्रेयसी मता अभी-
ष्टा हे केशव तत् तर्हि घोरे क्रूरे कर्मणि कर्ममार्गे मां कस्मान्नियोजयसि १ किंच॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयां॥२

।हे जनार्दन यामिश्रेण मिश्रितवाक्येनेव मे मम बुद्धिं मोहयसीव। तत् एकं ज्ञानं वा
कर्म वा निश्चित्य वद। येन अहं श्रेयः निर्वाणं आप्नुयां। इत्यधिकारभेदेन विषयव्य
वस्थया उत्तरमाह॥ श्रीभगवानुवाच॥ लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया
नघ। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां। हे अनघ। अस्मिन् लोके म
या पुरा पूर्वं द्विविधा निष्ठा प्रोक्ता। कर्तव्यतातात्पर्यं उक्ता। ज्ञानयोगेन। ज्ञानमेव यो
गः ज्ञानयोगः। तेन ज्ञानयोगेन। सांख्यानां परब्रह्मणि स्थितानां संन्यासिनां उक्ता।
कर्मयोगेन। कर्मैव योगः कर्मयोगः। तेन कर्मयोगेन। योगिनां कर्मनिष्ठानां उ
क्ता। इ ज्ञानकर्मनिष्ठयोः परस्परविरोधात् एकेन पुरुषेण युगपदनुष्ठातुमशक्य ३५
त्वात् अन्योऽन्यनिरपेक्षयोरेव पुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठायाः ज्ञाननिष्ठाप्राप्तिहे

तुत्वेन पुरुषार्थहेतुत्वं न स्वातंत्र्येण ज्ञाननिष्ठा तु कर्मनिष्ठोपायसाध्या सती स्वातंत्र्येण पु
रुषार्थहेतुरित्येतमर्थं प्रदर्शयिष्यन्नाह॥ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति।४ पुरुषः कर्मणां यज्ञादीनां अनारंभात् अक
रणात् नैष्कर्म्यं ज्ञाननिष्ठां न अश्नुते न प्राप्नोति। च पुनः संन्यसनादेव केवलात् ज्ञानरहि
तात् संन्यासादेव सिद्धिं न समधिगच्छति न प्राप्नोति। कस्मात् पुनः कारणात् कर्मसंन्यास
मात्रादेव ज्ञानरहितात् नैष्कर्म्यलक्षणां सिद्धिं पुरुषो नाधिगच्छतीति हेत्वाकांक्षायामा
ह॥ न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म सर्वः प्रकृति
जैर्गुणैः॥५ हि यस्मात् कश्चित् अन्यः जातु कदाचित् क्षणमपि अकर्मकृत् न तिष्ठति।
हि यस्मात् सर्वोऽपि प्रकृतिजैः प्रकृतितो जातैः गुणैः सत्वरजस्तमोभिः अव

शः अस्वतंत्रः कर्म कार्यं ।तो।प ज्ञानरहितस्य कर्मत्यागो निंदामाह॥ कर्मेंद्रियाणि सं
यम्य य आस्ते मनसा स्मरन् इंद्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ६ यः कर्मे
द्रियाणि वाक्पाणिपादपायूपस्थानि नियम्य इंद्रियार्थान् विषयान् मनसा स्मरन् ध्या
यन् आस्ते तिष्ठति । स विमूढात्मा मोहितचेताः मिथ्याचारः पापाचारः उच्यते ६ एतद्
द्विपरीतं कर्मकर्ता श्रेष्ठ इत्याह॥ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन। कर्मे
द्रियैः कर्मयोगमसक्तः स विशिष्यते ७ तु पुनः हे अर्जुन यः इंद्रियाणि बुद्धींद्रियाणि
श्रोत्रत्वक्चक्षूरसनघ्राणानि मनसा नियम्य कर्मेंद्रियैः वाक्पाणिपादपायू
पस्थैः कर्मयोगं परमेश्वरसंबंधि कर्म आरभते करोति स असक्तः फलासक्ति
रहितः मिथ्याचाराद्विशिष्यते ७ यस्मादेवं तस्मात् अज्ञस्य संकल्परहितं कर्म क ३५
रणमेव उचितं इत्याह॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥ हे अर्जुन त्वं नियतं नित्यं विहितं कर्म कुरु
न फलार्थं । हि यस्मात् अकर्मणः कर्मणः अकरणात् कर्मकरणं ज्यायः श्रेष्ठं । च पुनः ते
तव अकर्मणः कर्म अकुर्वतः शरीरयात्रा शरीरस्थितिरपि न प्रसिद्ध्येत् न सेत्स्यति
८ कर्मणो बंधकत्वमाशंक्य यथाकृतं कर्म बंधकं न भवति तत्प्रकारमाह॥ यज्ञार्थात्
कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः। तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ९ यज्ञो वै
विष्णुः तदर्थं कर्म यज्ञार्थं तस्मात् यज्ञार्थात् कर्मणः अन्यत्र अन्येन कर्मणा अयं लो
कः कर्मबंधनः। कर्मैव बंधनं यस्य स कर्मबंधनः। हे कौंतेय मुक्तसंगः फलाकांक्षा
रहितः सन् तदर्थं विष्ण्वर्थं कर्म समाचर ९ प्रजापतिवचनादपि कर्मकरणमपि
श्रेय इत्याह। सहयज्ञा इति चतुर्भिः श्लोकैः॥ सहयज्ञाः प्रजाः सृष्ट्वा पुरो

वाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥१०॥ प्रजापतिः पुरा सर्गादौ
सहयज्ञाः यज्ञसहिताः प्रजाः ब्राह्मणक्षत्रियविशः त्रीन् वर्णान् सृष्ट्वा उवाच। अ
नेन यज्ञेन हे प्रजाः यूयं प्रसविष्यध्वं वृद्धिं कुरुध्वं। एष यज्ञः वो युष्माकं इष्टकाम
धुक् अस्तु। इष्टकामप्रदो भवतु॥१०॥ कथं इष्टकामदो ऽयं यज्ञो भवेदित्याह॥ देवा
न् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥११॥ दे
प्रजाः यूयं अनेन यज्ञेन देवान् भावयत वर्द्धयत। ते देवाः यज्ञभाविताः सन्तः
वो युष्मान् वृष्टिअन्नोत्पत्तिद्वारेण भावयन्तु वर्द्धयन्तु। परस्परं भावयन्तः वर्द्धयन्तः परं
श्रेयः मोक्षं स्वर्गं वा अवाप्स्यथ॥११॥ एतदेव स्पष्टीकुर्वन् कर्माकरणे दोषमाह॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः। तैर्दत्तानप्रदायै ३६
भ्यो यो भुंक्ते स्तेन एव सः॥१२॥ हि यस्मात् देवाः यज्ञभाविताः यज्ञेन
वि

तोषिताः वो युष्मभ्यं इष्टान् वाञ्छितान् भोगान् प्रदास्यन्ते यः तैर्दत्तान् एभ्यो देवेभ्यः अप्रदा
य भुंक्ते। स स्तेन एव। देवस्वापहारी॥१२॥ अतश्च यज्ञं तत एव श्रेष्ठा नेतरे इत्याह॥ यज्ञशि
ष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः। भुंजते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥१३॥ यज्ञशि
ष्टाशिनः देवयज्ञादीन् निर्वर्त्य तच्छेषभोजिनः सन्तः साधवः सर्वकिल्बिषैः मुच्यन्ते। ये तु पुनः
पापाः आत्मकारणात् पचन्ति ते अघं भुंजते॥१३॥ जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्म क
र्तव्यमित्याह॥ ॥अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः। यज्ञाद्भवति पर्जन्यो
यज्ञः कर्मसमुद्भवः॥१४॥ अन्नाद्भुक्तात् अन्नात् लोहितरेतःपरिणतात् भूतानि जायन्ते।
पर्जन्यात् वृष्टेः अन्नसंभवः अन्नोत्पत्तिः। यज्ञात् पर्जन्यो भवति। यज्ञः धर्मलक्षणः
कर्मसमुद्भवः ऋत्विक्यजमानयोर्व्यापारः हवनादिलक्षणं कर्म। तत्समुद्भवः
१४ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं। तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे

प्रतिष्ठितं॥१५ कर्म ब्रह्मोद्भवं वेदा द्भवं विद्धि जानीहि। ब्रह्म वेदः तं अक्षरसमुद्भवं पर
ब्रह्मसमुद्भवं जानीहि। यस्मात् परब्रह्मसमुद्भवो वेदः तस्मात् सर्वगतः। सर्वस्य वाचकः।
नित्यं यज्ञे प्रतिष्ठितं। सर्वदा यज्ञविधिपरायणं॥१५॥ यस्मादेवं परमेश्वरेणेव भूतानां पुरु
षार्थसिद्धये कर्मादिचक्रं प्रवर्त्तितं तस्मादेवं श्रेयः कर्त्तव्यमेवातदकरणे वृथैव जीवितमित्या
ह॥ एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः। अघायुरिन्द्रियारामो मोघं पार्थ स जीवति।
१६ यः कर्माधिकारी इह अस्मिन् लोके एवं ईश्वरेणैव यज्ञपूर्वकं प्रवर्त्तितं जगच्चक्रं यः न
अनुवर्त्तयति नाश्रयते। हे पार्थ सः अघायुः पापजीवनः इन्द्रियारामः आक्रीडा यस्य
स मोघं वृथा जीवति॥१६ न कर्मणामनारंभात् आदित्यादिना अज्ञस्य अन्तःकरणशुद्ध्यर्थं क
र्मयोगः उक्तो ज्ञानिनः कर्मानुपयोगमाह॥ ॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मान ३१
वः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते।१७ उक्तुनः यः आत्मज्ञाननि

×ार्थोनात्मतां यतं ४

ष्ठो मानवः आत्मरतिरेव स्यात्। आत्मन्येव रतिःप्रीतिर्यस्य। न विषयेषु। स आत्मरतिः। च पुनः
आत्मतृप्तः स्वात्मप्रबोधेनैव तृप्तः। न अन्नरसादिना। च पुनः आत्मन्येव आत्मलाभेनैव सं
तुष्टः। न बाह्यार्थेषु वस्त्ररत्नादिलाभेन। तस्य परमार्थरतेः कार्यं कर्माधिकारो न विद्यते।
१७ तत्र हेतुमाह॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्य ×
पाश्रयः॥१८ तस्य परमार्थरतेः इह लोके कृते न कर्मणा अर्थः प्रयोजनं न अस्ति। अकृते
न कर्माकरणेन कश्चिदपि अर्थः प्रत्यवायरूपो नास्ति। न पुनः अस्य परमार्थरतेः स
र्वेषु ब्रह्मादिस्थावरांतेषु कोपि अर्थे मोक्षे साध्ये व्याश्रयणीयो नास्ति।१८ यस्मादेवं
तस्मात्त्वं कर्म कर्तुमिच्छायाह॥ तस्मादसक्तः सततं कार्यं कर्म समाचर। असक्तो
ह्याचरन् कर्म परमाप्नोति पूरुषः।१९ तस्मात् असक्तः संगवर्जितः सततं सर्वदा
: कार्यं कर्म नित्यं कर्म समाचर। हि यस्मात्

असक्तः फलसंगवर्जितः पुरुषः ईश्वरार्थं कर्म आचरन् कुर्वन् परं मोक्षं प्राप्नोति।१९ अत्र
सदाचारं प्रमाणीकुर्वन् उत्तरार्द्धेन ज्ञानिनोपि कर्माचरणमुचितमित्याह।   कर्मणैव हि
संसिद्धिमास्थिता जनकादयः। लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि।२०। हि यस्मा
त् जनकादयो विद्वांसः कर्मणैव यज्ञादिना संसिद्धिमास्थिताः मोक्षं गं प्रवृत्ताः। हे
अर्जुन लोकसंग्रहमपि संपश्यन् उन्मार्गप्रवृत्तिनिराकरणं लोकस्य संग्रहः तमपि प्र
योजनं संपश्यन् कर्तुमेव अर्हसि।२०। लोकसंग्रहं यः कुर्यात् तथा च कुर्यात् तदु
पायमाह।।   यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनु
वर्त्तते।२१। श्रेष्ठः यत् यत् कर्म आचरति इतरो जनः तत्तदेव आचरति। स यत् प्रमाणं ३८
कुरुते। यत् लौकिकं वैदिकं वा प्रमाणं करोति। लोकस्तत्कर्म अनुवर्त्तते।२१। लोकसंग्रह

कर्त्तव्यतायां विप्रतिपत्तिं आत्मदृष्टांतेन परिहरति। न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु
किंचन। नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि।।२२
मम किंचन कर्त्तव्यं नास्ति। न अनवाप्तं अवाप्तं नास्ति। अवाप्तव्यं नास्ति। तथापि नि
त्यनैमित्तिके कर्मणि अहं वर्त्ते एव।२२ अकरणे लोकस्य विनाशहेतुत्वं च यति।।
यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतंद्रितः। मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः।२३
हि निश्चितं अहं अतंद्रितः अनलसः यदि जातु कदाचिदपि कर्मणि नित्यनैमित्ति
के न वर्त्तेयं हे पार्थ सर्वशः सर्वप्रकारैः मनुष्याः मम वर्त्म अनुवर्त्तंते।२३ तमेव
दोषं दर्शयति।   उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं। संकरस्य च कर्त्ता
स्यामुपहन्यामिमाः प्रजाः।२४ चेत् यदि अहं कर्म नित्यनैमित्तिकं न कुर्यां
तर्हि इमे लोकाः स्थितिनिमित्तस्य कर्मणः अभावात् उत्सीदेयुः विनश्येयुः

युः। पुनः संकरस्य वर्णसंकरस्य कर्ता अहमेव स्यां भवामि। इमाः प्रजाः उपहन्यां म-
त्येव उपहताः स्युरित्यर्थः॥२४॥ आत्मविदोपि स्वात्मनः कर्तव्याभावेपि परानुग्र-
हार्थं कर्म कर्तव्यमित्याह। सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं॥२५॥ हे भारत यथा अविद्वांसः
अनात्मज्ञाः कर्मणि सक्ताः कर्मफलेछवः कर्म कुर्वंति। तथा विद्वान् असक्तः कर्मफले
निस्पृहः लोकसंग्रहं चिकीर्षुः लोकानुग्रहं कर्तुमिछन् सन् कर्म कुर्यात्॥२५॥ ननु
आत्मविदा कृपया परस्मा ब्रह्मज्ञानमेवोपदेष्टुं। दुःखात्मके कर्मणि स्वयं प्रवृत्त्या
परस्प्रवर्त्तनेन किं इत्याशंक्याह। अनधिकारित्वान्नेत्याह। न बुद्धिभेदं ३९
जनयेदज्ञानां कर्मसंगिनां। जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥२६

विद्वान् आत्मवित् कर्मसंगिनां कर्मण्यासक्तानां अज्ञानां अनात्मविदां बुद्धिभेदं बुद्धि-
चालनं न जनयेत्। कर्मणि श्रद्धाभंगं न कुर्यात्। विद्वान् आत्मवित् युक्तः योगपरः अस्थिर
सर्वकर्माणि नित्यनैमित्तिकानि समाचरन् सन् तान् अज्ञान् जोषयेत् कर्म कारयेत्॥
२६॥ अविद्वान् कथं कर्मसु सज्जते इत्याह। प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्व-
शः। अहंकारविमूढात्मा कर्ताहमिति मन्यते॥२७॥ अहंकारविमूढात्मा देहे आत्म-
बुद्धिरहंकारः। तेन मोहितचित्तः पुमान् प्रकृतेर्गुणैर्विकारैः देहेंद्रियैः कर्मा-
णि लौकिकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैः क्रियमाणानि अहं कर्ता
इति मन्यते॥२७॥ विद्वांस्तु तथा न मन्यत इत्याह। तत्त्ववित्तु महाबाहो गुणकर्मवि-
भागयोः। गुणा गुणेषु वर्त्तंत इति मत्वा न सज्जते॥२८॥ हे महाबाहो गुणकर्म-
विभागयोः तत्त्ववित् गुणविभागस्य याथात्म्यवेत्ता। गुणाः इंद्रियाणि गु-

णेषु विषयेषु वर्त्तंते प्रवर्त्तंते न आत्मा इति मत्वा न सज्जते अहं करोमीति न मन्यते।२८
न बुद्धिभेदं जनयेदित्युक्तमुपसंहरति॥ प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्म
सु। तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत्।२९ प्रकृतेर्मायायाः गुणैः संमूढाः
गुणैः अतिशयेन मोहिताः गुणकर्मसु देहेंद्रियादीनां व्यापारेषु सज्जंते वयं कुर्म
इति मन्यंते। तान् अकृत्स्नविदः अकृत्स्नं कर्मफलमात्रदर्शिनः कर्मसंगिनः मंदा
न् कृत्स्नवित् आत्मवित् न विचालयेत्। न भ्रंशयेदित्यर्थः।२९ कथं पुनः कर्मा
णि अधिकृतेन अज्ञेन मुमुक्षुणा कर्म कर्त्तव्यमित्यत आह॥ मयि सर्वाणि कर्माणि संन्यस्या
ध्यात्मचेतसा। निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः।३० हे अर्जुन अध्यात्मचेत ४०
सा ईश्वराय भृत्यवत् कर्म करोमीति बुद्ध्या मयि परमेश्वरे सर्वाणि समस्तानि

कर्माणि संन्यस्य निक्षिप्य निराशीः त्यक्तफलेच्छः निर्ममः ममतारहितो भूत्वा विगतज्व
रः विगतशोकः सन् युध्यस्व।३० एवं कर्मानुष्ठाने गुणमाह॥ ये मे मतमिदं नित्यमनु
तिष्ठंति मानवाः। श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः।३१ ये मानवाः मम
इदं मतं ईश्वरार्थं कर्म कर्त्तव्यमित्यनुशासनं नित्यं श्रद्धावंतः अनसूयंतः असूयादि अनु
तारहिताः अनुतिष्ठंति अनुवर्त्तंते। तेऽपि कर्मभिः धर्माधर्माख्यैः मुच्यंते।३१ तद्वि
परीतकरणे दोषमाह॥ ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं। सर्वज्ञानविमू
ढांस्तान् विद्धि नष्टानचेतसः।३२ ये पुनः एतत् मे मम मतं ईश्वरार्थं कर्म कर्त्तव्यमि
त्यनुशासनं। अभ्यसूयंतः द्विषंतः न अनुतिष्ठंति। न अनुवर्त्तंते। तान् सर्वज्ञानवि
मूढान् सर्वेषु ज्ञानेषु विमूढान् अचेतसः अविवेकिनः नष्टान् नाशं प्राप्तान् वि

ष्टि ज्ञानीदि। ३३ ननु कस्मात् पुनः त्वदीयं मतं नानुतिष्ठंतो स्वधर्मं विहाय परधर्मं चानु
वर्त्तंते तत्प्रतिकूलास्तु शासनातिक्रमदोषात् कथं न बिभ्यति इत्यत्र आह।। सदृशं
चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि। प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति।३३ ज्ञान
वानपि पुरुषः स्वस्याः प्रकृतेः प्राचीनकर्मजनितसंस्कारस्य सदृशं चेष्टते करोति।
भूतानि प्राणिनः प्रकृतिं प्राचीनकर्मसंस्कारं यांति अनुसरंति। निग्रहः निवारणं
किं करोति।३३ यदि सर्वो जंतुः स्वकीयप्रकृतिसदृशमेव चेष्टते प्रकृतिश्च अन्यस्य कश्चि
न्नास्ति ततः पुरुषप्रयत्नविषयस्य अभावात् शास्त्रानर्थक्यं प्राप्तं इदमुच्यते॥ ॥
इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ। तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३४
३४ इंद्रियस्य इंद्रियाणां इंद्रियस्यार्थे शब्दादिविषये। रागद्वेषौ। इष्टे रागः अनिष्टे द्वेषः॥
तौ अवस्थितौ। अवश्यंभाविनौ तयोः वशं नागच्छेत्। हि यस्मात् तौ अस्य प

रिपंथिनौ श्रेयोमार्गस्य परिपंथिनौ तस्करौ इति। ३४ परधर्मोपि धर्मत्वात् अनुष्ठेय एव
इति मत्वा ने प्रत्याह।। श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। स्वधर्मे नि
धनं श्रेयः परधर्मो भयावहः ३५ स्वधर्मः स्वो धर्मः विगुणः विगतगुणोपि अनुष्ठीयमानः
परधर्मात् स्वनुष्ठितात् सगुणतया संपादितात् श्रेयान् प्रशिष्टतरः। स्वधर्मे स्थित
स्य निधनं मरणमपि श्रेयः परधर्मो भयावहः। नरकादिलक्षणं भयमावहति।
अथवा स्वधर्मः आत्मज्ञाने विगुणः सत्वादिगुणरहितः परेषां इंद्रियाणां धर्मात् प्र
वृत्तिजनितात् संसारपातहेतोः सकाशात् आत्मज्ञानं श्रेयः मुक्तिहेतुत्वात्
स्वधर्मे आत्मज्ञानधर्मे निधनं श्रेयः अपुनरावृत्तत्वात्। परधर्मः इंद्रियप्रवृत्ति
रूप धर्मः भयहेतुः। संसारहेतुत्वात्। ३५ यद्यपि यतो विषयान् तौ ह्यस्य परिपंथिनाविति

त्यादिना रागद्वेषौ संसारपातहेतुत्वात् अनर्थमूलमित्युक्तं। तथा विदितं अनवधानि
तं च तदुक्तं। इदानीं संदिग्धं निश्चितं त्वदंमे त्वति तदुच्छेदाय ज्ञातुमिच्छन् अर्जुन उवाच॥
अर्जुन उवाच॥ अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः। अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥
३६ अथ अयं पूरुषः केन प्रयुक्तः पापं चरति। हे वार्ष्णेय अनिच्छन्नपि बलादिव नि
योजितः। राज्ञा भृत्य इव बलात्प्रेरितः॥ ३६ सर्वलोकवैरिणं सर्वानर्थहेतुं अर्जुनेन पृ
ष्टं भगवानुवाच॥ श्रीभगवानुवाच॥ काम एष क्रोध एष रजोगुणसमुद्भवः। महा
शनो महापाप्मा विद्ध्येनमिह वैरिणं॥ ३७ एष कामः सर्वलोकशत्रुः। यन्निमित्ता सं
सारप्राप्तिः। एष कामः केनचित्प्रतिहतः क्रोधो भवति। अतः क्रोधोऽपि काम एव। रजोगु ४२
णसमुद्भवः। रजोगुणादुत्पन्नः। रजोगुणस्य वा हेतुः। महाशनः महत् अशनं

यस्य दुःपूरत्वात् स महाशनः। अत एव महापाप्मा। महत्पापहेतुः। इह संसारे एनं वै
रिणं विद्धि॥ ३७ कथं वैरिणं इति दृष्टांतेन प्रत्याययति॥ धूमेनाव्रियते वह्निर्य
थादर्शो मलेन च। यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं। यथा धूमेन वह्निः आव्रि
यते। च पुनः आदर्शः मलेन आव्रियते। यथा उल्बेन गर्भः वेष्टनेन गर्भः आव्रियते। तथा
तेन कामेन इदं आत्मज्ञानं आवृतं। आच्छादितं॥ ३८ किंपुनस्तत् इदं शब्दवाच्यं यत् का
मेनावृतं तदाह॥ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा। कामरूपेण कौंते
य दुःपूरेणानलेन च॥ ३९ हे कौंतेय एतेन कामेन नित्यवैरिणा सर्वदाशत्रुरूपिणा
दुःपूरेण दुःखेन पूरणं यस्य स तेन। अनलेन नास्ति विद्यते अलं परिपूर्णता यस्य सः तेन
कामरूपेण। कामः इच्छारूपं यस्य स कामरूपः। तेन। ज्ञानिनः आत्मज्ञस्य। ज्ञा
नं आत्मज्ञानं आवृतं आच्छादितं। इति॥ कामशत्रोरधिष्ठानमाह॥ ॥
× आत्मज्ञः कामं सर्वदा वैरिणं जानाति अर्थः॥ इत्येशत्रोरधिष्ठाने ज्ञाते शत्रुनिवर्हणं कर्तुं शक्यत इति कामशत्रो टाकं

इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते। एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं॥४०
इंद्रियाणि श्रोत्रादीनि मनः अंतःकरणं बुद्धि ज्ञानं। अस्य कामस्य अधिष्ठानं आश्रयः
उच्यते। एतैः इंद्रियादिभिः एष कामः ज्ञानं आछाद्य देहिनं प्राणिनं मोहयति।४० अधि
ष्ठान निग्रहे कामस्य निग्रहहेतुमाह॥ तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं।४१ हे भरतर्षभ। तस्मात् कारणात् त्वं आ
दौ इंद्रियाणि नियम्य हि यस्मात्। एनं ज्ञानविज्ञाननाशनं। ज्ञानं शास्त्रोपदे
शजनितं विज्ञानं तस्य प्रत्यक्षानुभवः। तयोः विनाशकः। तं पाप्मानं पापिनं प्र
जहि परित्यज।४१ तत्र किमाश्रयः कामं जह्यादित्युच्यते इंद्रियाणीति द्वाभ्यां॥ ३
इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः। मनसस्तु परा बुद्धिर्यो बुद्धेः

परतस्तु सः॥४२ इंद्रियाणि श्रोत्रादीनि बाह्यविषयदेहापेक्षया पराणि उत्कृष्टा
नि आहुः। इंद्रियेभ्यः श्रोत्रादिभ्यः मनः परं। उत्कृष्टं तु पुनः मनसः अंतःकर
णात् बुद्धिर्ज्ञानं उत्कृष्टं। यो बुद्धेः परतः स आत्मा उत्कृष्टः॥४२ एवं बुद्धेः परं बु
द्ध्वा संस्तभ्यात्मानमात्मना। जहि शत्रुं महाबाहो कामरूपं दुरासदं॥४३ एवं बु
द्धेः परं उत्कृष्टं आत्मानं बुद्ध्वा ज्ञात्वा आत्मना आत्मनस्था आत्मानं मनः संस्त
भ्य समाधाय। हे महाबाहो दुरासदं दुर्विज्ञेयानेकविशेषं कामरूपं अ
भिलाषरूपं दुःपूरं शत्रुं वैरिणं जहि परित्यज॥४३ इति श्रीभगवद्गीता ४४
भाष्ये कर्मयोगो नाम तृतीयोऽध्यायः॥ श्री रस्तु॥ शुभं भवतु॥

णणएउं नमः॥ त्यायं योगः कर्मयोगोपायः ससंन्यासः ज्ञाननिष्ठालक्षणो अ
ध्यायद्वयेनोक्तः। तं स एव उत्तरत्र सकलगीतासु प्रपंचनात्। तं सकलगीतार्थपरिस
माप्तं मन्वानो भगवान् वंशकथनेन स्तोति॥ इमं विवस्वत इति त्रिभिः॥ श्रीभगवा
नुवाच॥ इमं विवस्वते योगं प्रोक्तवानहमव्ययं। विवस्वान् मनवे प्राह। मनुरिक्ष्वाकवेऽ
ब्रवीत्॥ अहं इमं अध्यायद्वयेनोक्तं योगं ज्ञाननिष्ठालक्षणं अव्ययं। ... योगफल
स्य मोक्षस्य विनाशाभावात् तं विवस्वते प्रोक्तवान्। विवस्वान् मनवे प्राह। मनुरिक्ष्वाक
वेऽब्रवीत्॥१ एवं परंपराप्राप्तमिमं राजर्षयो विदुः। स कालेनेह महता योगो नष्टः
परंतप॥२ राजर्षयः एवं परंपराप्राप्तं क्षत्रियपरंपराप्राप्तं इमं योगं विदुः। हे परंतप स
योगः इह महता कालेन नष्टः विच्छिन्नसंप्रदायः॥२ स एवायं मयाऽद्य योगः प्रो
× दीर्घेण

क्तः पुरातनः। भक्तोसि मे सखा चेति रहस्यं ह्येतदुत्तमं।३ मया अद्य हे अर्जुन ते तुभ्यं
स एवायं पुरातनो योगः प्रोक्तः। मम भक्तोसि सखा च असि। हि यस्मात् एतत्
योगज्ञानं उत्तमं रहस्यं। इति कारणात् उपदिष्टं। कल्पादौ वर्त्तमानं विवस्वंतं प्रति इदा
नीं वसुदेवगृहे उत्पन्नस्य भगवतः योगोपदेशोनुपपन्नः इत्यभिप्रायेण आक्षि
पति॥ अर्जुन उवाच॥ अपरं भवतो जन्म परं जन्म विवस्वतः। कथमेतद्विजा
नीयां त्वमादौ प्रोक्तवानिति।४ हे कृष्ण त्वं आदौ प्रोक्तवान् इति एतत् अहं कथं विजा
नीयां। भवतो जन्म अपरं अर्वाक् वसुदेवगृहे। विवस्वतः जन्म परं सर्गादौ एत
त् संगतेयुक्तार्थं कथं ज्ञास्यामि॥४ स्वात्मनि अजत्वं सर्वज्ञत्वं ईश्वरत्वं च आविः कु
र्वन् परिहरति॥ श्रीभगवानुवाच॥ बहूनि मे व्यतीतानि जन्मानि तव चार्जुन। तान्य ५५
हं वेद सर्वाणि न त्वं वेत्थ परंतप।५ हे अर्जुन मम तव च बहूनि जन्मानि व्य

तीतानि। अहं अनावृतज्ञानशक्तिः। अतः तानि जानामि। त्वं धर्माधर्मादिप्रतिबद्धज्ञान
शक्तिः अतः तानि न जानासि।५ कथं तर्हि तव [illegible] ईश्वरस्य सर्वज्ञस्य धर्माधर्माभा
वे जन्म इत्यत आह॥ अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन्। प्रकृतिं स्वाम
धिष्ठाय संभवाम्यात्ममायया।६ अजः जन्मरहितः अव्ययात्मा अनश्वरज्ञानश
क्तिस्वभावोपि सन् भूतानां ब्रह्मादिस्तम्बपर्यंतानां ईश्वरोपि सन् अहं स्वां वैष्णवीं
प्रकृतिं मायां त्रिगुणात्मिकां अधिष्ठाय वशीकृत्य आत्ममायया स्वकीयया माय
या संभवामि। न परमार्थतः लोकवत् जन्म कदा इत्यत आह॥ यदा यदा हि धर्म
श्लो२ स्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं।७ हे भारत
हि यस्मात् यदा यदा धर्मस्य वर्णाश्रमादिप्रयुक्तस्य ग्लानिर्भवति॥ अधर्मस्य
धर्मविपरीताचरणस्य अभ्युत्थानं उत्पत्तिर्भवति तदा अहं आत्मानं सृजामि। हे

हवान्संभवामि। अतः जन्मकिमर्थमित्याह॥ परित्राणाय साधूनां विनाशाय च
दुष्कृतां। धर्मसंस्थापनार्थाय संभवामि युगे युगे॥८॥ हे अर्जुन अहं साधूनां परित्रा
णाय सन्मार्गगामिनां रक्षणाय। च अपरं दुष्कृतां पापकारिणां विनाशाय धर्म
संस्थापनार्थाय युगे युगे संभवामि उत्पत्तिं करोमि।८ एवंविधानां ईश्वरज
न्मकर्मणां च ज्ञाने फलमाह॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्य
क्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥९॥ हे अर्जुन यः मे मम जन्म माया
रूपं। कर्म साधुपरित्राणादिकं। अलौकिकं॥ दिव्यं। ईश्वरं एवं अमुना प्रकारेण तत्त्व
तः याथातथ्येन वेत्ति जानाति। स देहं त्यक्त्वा पुनर्जन्म न एति। मामे ४८
ति मोक्षं प्राप्नोति।९ ननु एष मोक्षमार्गः इदानीं प्रवृत्तः किं तर्हि पूर्वमपीत्याह॥

वीतरागभयक्रोधाः मन्मया मामुपाश्रिताः। बहवो ज्ञानतपसा पूता मद्भावमागताः॥
१० हे अर्जुन बहवः वीतरागभयक्रोधाः विगतरागभयक्रोधाः मन्मयाः मत्स्वरूपाः मां उ
पाश्रिताः मन्निष्ठाः ज्ञानतपसा ज्ञानरूपेण तपसा पूताः मद्भावं आगताः परां सिद्धिं
गताः। मोक्षं प्राप्ताः।१० तर्हि त्वं रागद्वेषौ स्तः। ये न कस्मैचित्त्वं भक्ताय आत्मभा
वं प्रयच्छसि न सर्वेभ्यः इत्यत आह। ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्य
हं। मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥११ हे पार्थ ये अधिकारिणः यथा
येन प्रयोजनेन मां प्रपद्यन्ते। तान् अहं तथैव तत्फलदानेन भजामि अनुगृह्णा
मि। मनुष्याः सर्वशः सर्वप्रकारैः मम वर्त्म मार्गं अनुवर्तन्ते अनुसरन्ति।११ तर्हि
त्वा ह्यार्थं मेव सर्वे त्वया सर्वेषु समेन प्रेरिताः त्वामेव किमिति न भजन्ते इत्यत आह॥

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः। क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्म
जा।१२ इहास्मिन्नु लोके कर्मणां सिद्धिं फलनिष्पत्तिं काङ्क्षन्तः प्रार्थयन्तः देवता इन्द्रा
द्या यजन्ति हि यस्मात् मानुषे लोके मनुष्यलोके कर्मजा कर्मणो जाता कि फल
रूपा सिद्धिः क्षिप्रं शीघ्रं भवति।१२ कस्मात्पुनः कारणं तु नियमेन तवैव वर्त्मानुव
र्तंते नान्यस्य अन्यत्तु ब्राह्मणादीनां सकाम निष्कामतया विचित्रं प्रवर्तमानानां उ
त्तममध्यमादि विचित्रं कुर्वतस्तवैव वैषम्यं प्राप्नोति इत्यत आह। चातुर्वर्ण्यं
मया सृष्टं गुणकर्मविभागशः। तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं।१३ मया
ईश्वरेण चातुर्वर्ण्यं वर्णचतुष्टयं गुणकर्मविभागशः गुणानां सत्वरजस्तमसां ४७
विभागेन अंशत्यादितं सृष्टं। प्रतिगुणं कर्मणां शमदमाद्यै कृषिसेवादीनां ब्रा

ह्मणक्षत्रियविट्शूद्रकर्तृकाणां सृष्टं तस्य चातुर्वर्ण्यस्य कर्तारमपि संतं मां परमार्थ
तः अकर्तारं अव्ययं असंसारिणं जानीहि।१३ तदेव दर्शयन्तत्तु ज्ञाने फलमाह। न
मां कर्माणि लिंपंति न मे कर्मफले स्पृहा। इति मां यो विजानाति कर्मभिर्न स बध्यते।१४
कर्माणि मां न लिंपंति देहाद्यारंभकाणि न भवंति मे मम कर्मफले स्पृहा नास्ति यः मां इति
अभिजानाति स कर्मभिर्न बाध्यते तस्य कर्माणि देहारंभकाणि न भवंति।१४
"ये यथा मां प्रपद्यंते इत्यादिभिश्चतुर्भिः श्लोकैः ईश्वरस्य विचित्रं कुर्वता वैषम्यं
प्राप्तं परिहृत्य पूर्वोक्तमेव कर्मयोगं प्रपंचयितुं अनुस्मारयति।। एवं ज्ञात्वा कृ
तं कर्म पूर्वैरपि मुमुक्षुभिः। कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं।१५ पूर्वैर

पि मुमुक्षुभिः जनकादिभिः एवं ज्ञात्वा फलाकांक्षारहितं कर्म बंधकं न भवतीत्येवं
विज्ञाय कर्म कृतं। तस्मात् त्वं कर्मैव कुरु। पूर्वैः पूर्वतरं कृतं पूर्वैः जनकादिभिः
पूर्वतरं युगांतरेपि स्वयं मुमुक्षुणार्थं कृतं।१५ तच्च तत्त्वविद्भिः सह विचार्य कर्तव्यं।
न लोकपरंपरामात्रेणेत्येतदर्थं कर्मस्वरूपे दुर्विज्ञेयतां दर्शयति।। किं कर्म कि
मकर्मेति कवयोप्यत्र मोहिताः। तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभा
त्।।१६ किं कर्म कीदृशं कर्म किं अकर्म कीदृशं कर्माकरणं इति अत्र कर्माक
र्मविभागे कवयोपि मनीषिणोपि मोहिताः। तत् कर्म तत्ते प्रवक्ष्यामि
यत् ज्ञात्वा अशुभात् संसारात् मोक्ष्यसे।१६ कर्म नाम देहादिचेष्टा लोकप्र ४८

सिद्धं। अकर्म च तदकरणं किमत्र बोद्धव्यमित्यत आह।। कर्मणो ह्यपि बोद्धव्यं बो
द्धव्यं च विकर्मणः। अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः।।१७ हि यस्मात् कर्मणः
शास्त्रविहितस्य तत्त्वस्वरूपं बोद्धव्यं ज्ञातव्यं विद्यते। विकर्मणः प्रतिषिद्धस्य कर्मणः
स्वरूपं बोद्धव्यं ज्ञातव्यं ज्ञानिना निषिद्धं कर्म स्वभावादापन्नं अनहंकारेण कृतं
तस्य दोषाय न भवति। विवेकी देहेंद्रियादिभिरेव कर्म कृतं कीदृशं मन्यते आ
त्मानं अकर्तारं कूटस्थं मन्यते अज्ञस्य तु रागतः अहंकारेण कृतं निषि
द्धं कर्म दोषाय भवति। यतः अज्ञः देहेंद्रियादिगतं कर्तृत्वं आत्मनि अविद्यमान
मपि विद्यमानं मन्यते। एवं कर्मणः स्वरूपं बोद्धव्यं।। अकर्मणः कर्माकरणस्य

स्वरूपं बोद्धव्यं गहनाद्दुर्विज्ञेयात्रयाणां कर्मादीनां गतिः स्वरूपं॥१७ किंतु
नस्तत्त्वं कर्मादेः यत् बोद्धव्यं भगवता वक्ष्यामीति प्रतिज्ञायते॥ कर्मण्यकर्म यः
पश्येदकर्मणि च कर्म यः। स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥१८ यः आ
त्मतत्त्ववित् देहेन्द्रियान्तःकरणाश्रितत्वात् आत्मनि भ्रान्त्या सर्वैः प्रतीयमाने कर्मणि क
र्माभावं नैष्कर्म्यं कर्मरहितं आत्मानं पश्येत्। दृष्टान्तमाह। यथा अतिचञ्चलेषु नौका ×रंदसा५
यां नदीतीरस्थेषु वृक्षेषु प्रातिलोम्येन अध्यारोपितकर्मणि चलनलक्षणे भ्रान्त्या
प्रतीयमाने विवेकी तेषु कर्माभावं अचलत्वं पश्यति। तथा अकर्मणि देहेन्द्रिया
दिव्यापारोपरमे अहं न करिष्यामि सुखेन स्थास्यामीति देहेन्द्रियादिव्यापारोपरमे
भावं भ्रान्त्या आत्मनि अध्यारोपयति। तस्मिन् कर्माभावे यः कर्म पश्येत्॥

तस्य कर्माभावस्य अहंकारपूर्वकप्रयत्नसाध्यत्वात्। अज्ञानिनः सुखबुद्ध्या कर्मत्या
गस्य मिथ्याचारत्वात् कर्मत्वं भवति। स युक्तः योगी सकलकर्मकृत्। तथा च भाष्यान्तरे
यः कर्मणि परमेश्वरार्पणबुद्ध्या क्रियमाणे अकर्म अबन्धकत्वात् कर्मेदं न भवतीत्येवं प
श्यति। यः अकर्मणि विहिताकरणे कर्म व - - - - पादकत्वं - - पश्यति। स म
नुष्येषु बुद्धिमान् युक्तः योगी सकलकर्मकृत्॥१८ तदेतत् कर्मण्यकर्मादिदर्शनं स्तू
यते॥ यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणं तमा
हुः पंडितं बुधाः॥१९ यस्य आत्मदर्शिनः सर्वे समारम्भाः सर्वाणि कर्माणि कामसंकल्पैः फ
लेच्छाताभ्यां वर्जितानि। बुधाः तं ज्ञानाग्निदग्धकर्माणं ज्ञाना। अग्निना दग्धं भुक्ताभुक्तं क
र्म यस्येति तं पंडितं आहुः॥१९ ब्रह्मवित् अन्तःस्थितनिमित्तात् कर्मणि प्रवृत्तोऽपि तत्फ

लासंगरहिततया लोकसंग्रहार्थं कुर्वतः ज्ञानाग्निदग्धकर्मत्वात् तदीयं कर्म अकर्मैव
संपद्यते इत्याह॥ त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः। कर्मण्यभिप्रवृत्तोपि
नैव किंचित् करोति सः॥२०॥ कर्मफलासंगं कर्मणि फले च आसक्तिं त्यक्त्वा नित्यतृप्तः
आत्मज्ञानेन सर्वदा तृप्तः। कर्मणि अभिप्रवृत्तोपि किंचिन्नैव करोति। ततम
पि कर्म तस्य बंधहेतुर्न भवतीत्यर्थः॥२०॥ यः पुनः पूर्वोक्तविपरीतः कर्मारंभात्
प्रागेव ब्रह्मणि संजातात्मदर्शनः स्वसकलकर्मणि प्रयोजनं अपश्यन् ससा
धनं कर्म संन्यस्य शरीरयात्रामात्रं चेष्टयति। ज्ञाननिष्ठो भवतीत्याह॥ ।५०
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः। शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बि
षं॥२१॥ निराशीः निःस्पृहः यतचित्तात्मा संयतचित्तेंद्रियदेहः त्यक्तसर्वपरि

ग्रहः। पुमान् केवलं शारीरं अभिमानरहितं शरीरस्थितिहेतुमात्रं। कर्म व्यापारं कु
र्वन् किल्बिषं न आप्नोति॥२१॥ अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया इत्यादिना वचनेन
अनुज्ञातं तत् यः शरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारं आविष्कुर्वन्नाह॥ यदृ
च्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः। समः सिद्धावसिद्धौ च कृत्वापि न निबध्य थ्य
ते॥२२॥ यदृच्छालाभसंतुष्टः अप्रार्थितलाभसंतुष्टः। द्वंद्वातीतः द्वंद्वैः शीतोष्णादि
भिः अभिहतोपि अविषण्णचित्तः। सिद्धौ असिद्धौ च लाभालाभे समस्तुल्यः
हर्षविषादरहितः। कर्म कृत्वापि कर्मणा न निबध्यते॥२२॥ ब्रह्मविदोपि कुतश्चि
न्निमित्तात् लोकसंग्रहार्थं कर्मणि प्रवृत्तस्य कर्म बंधकं न भवतीत्याह॥ गत
संगस्य मुक्तस्य ज्ञानावस्थितचेतसः। यज्ञाय आचरतः कर्म समग्रं प्र

प्रविलीयते॥२३॥ गतसंगस्य कर्मादि संगरहितस्य मुक्तस्य निवृत्तधर्मादिबंधन
स्य। ज्ञान   निष्ठस्य यज्ञाय परमेश्वरार्थं कर्म कुर्वतः समग्रं अग्रेण फले ×पुनः२
न सह विलीयते। आ आमनिवि लयं यातीत्यर्थः कस्मात् कारणात् क्रियमाणं कर्म
स्वफलारंभं अकुर्वत् समग्रं प्र   विलीयात इत्याह॥   ब्रह्मार्पणं ब्रह्म
हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव   तेन गंतव्यं ब्रह्मकर्मसमाधिना॥२४॥ ब्रह्मार्प
णं अर्प्यते क्रियते येन स्रुक्स्रुवा   दिना तदर्पणं ब्रह्मैव हविरपि घृतादिकं ब्रह्मै
व। अग्निरपि ब्रह्मैव तस्मिन्न   ग्नौ ब्रह्मणा कर्त्रा हुतं होमः ब्रह्मैव। एवं यः
पश्यति तेन ब्रह्मकर्मसमाधिना   ब्रह्मात्मके कर्मणि समाधिः चित्तैकाग्रता ५९
यस्य स   तेन। ब्रह्मैव गंत   व्यं प्राप्तव्यं। न फलांतरमित्यर्थः॥२४

अधुनासम्यक्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थं अन्येपि यज्ञाः अधिकारिभेदेन
ज्ञानोपायाः उच्यंते दैवमेवेत्यादि षड्भिः॥   दैवमेवापरे यज्ञं योगिनः पर्युपासते
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति॥२५॥ अपरे योगिनः कर्मिणः दैवमेव यज्ञं देवाः
इज्यंते येन असौ दैवो यज्ञः तमेव पर्युपासते कुर्वंति। अपरे ब्रह्मविदः परब्रह्मस्व
रूपे अग्नौ यज्ञं प्रत्यगात्मनि यज्ञेनैव परमात्मैक्यदर्शनेनैव जुह्वति॥२५   श्रोत्रा
दीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति। शब्दादीन् विषयानन्य इंद्रियाग्निषु जुह्वति॥२६
अन्ये योगिनः श्रोत्रादीनींद्रियाणि संयमाग्निषु इंद्रियसंयम एव अग्निः तस्मिन् जुह्व
ति। अन्ये योगिनः शब्दादीन् विषयान् इंद्रियाग्निषु इंद्रियाण्येव अग्नयः तेषु जुह्वति।
श्रोत्रादिभिः अनिषिद्ध विषयग्रहणं होमः॥२६ सर्वाणींद्रियकर्माणि प्राण

कर्माणि चापरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥ अपरे योगिनः सर्वाणींद्रि
यकर्माणि इंद्रियव्यापारान् च अन्यत् प्राणकर्माणि प्राणादिपंचव्यापारान् आत्मसं
यमयोगाग्नौ आत्मनि संयमः स एव योगाग्निः तस्मिन् विवेकप्रज्ञानदीपिते जुह्व
ति ॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्च यतयः सं
शितव्रताः ॥२८॥ द्रव्यदानेन तीर्थेषु यज्ञेषु यज्ञं कुर्वंति ये ते द्रव्ययज्ञाः तप एव यज्ञो येषां
ते तपोयज्ञाः अष्टांगः योग एव यज्ञो येषां ते योगयज्ञाः वेदाध्ययनमेव यज्ञो येषां ते
स्वाध्याययज्ञाः वेदार्थदर्शनमेव यज्ञो येषां ते ज्ञानयज्ञाः सम्यक्शितं तन्कृतं कर्म
येः ते संशितव्रताः ॥२८॥ अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे प्राणापानगती रु ५२
द्ध्वा प्राणायामपरायणाः ॥२९॥ अपरे योगिनः अपाने अधोवृत्तौ प्राणं ऊर्द्ध्ववृत्तिं पूरकेण जु

ह्वति तथा रेचककाले प्राणे ऊर्द्ध्ववृत्तौ अपानं अधोवृत्तिं जुह्वति कुंभककाले
प्राणापानयोः गती रुद्ध्वा प्राणायामपरा भवंति ॥२९॥ अपरे नियताहाराः
प्राणान् प्राणेषु जुह्वति सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥३०॥ अपरे नि
यताहाराः नियमितभोजनाः संतः प्राणान् वायून् उदान् प्राणेष्वेव जुह्वति यो
योगी यं यं वायुं जयति तस्मिन् इतरे प्रविष्टाः एव भवंतीत्यर्थः एते सर्वेऽपि य
ज्ञविदः यज्ञक्षपितकल्मषाः स्वस्वानुष्ठितयज्ञनिर्धूतपातकाः भवंति ॥३०॥
एवं यथोक्तान् यज्ञान् निर्वर्त्य निष्पाद्य तच्छेषभोजिनः फलं तदकरणे च दोषमाह ॥ यज्ञ
शिष्टामृतभुजो यांति ब्रह्म सनातनं ॥ नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्त
म ॥३१॥ यज्ञशिष्टामृतभुजः यज्ञावशिष्टमेव अमृतं भुंजते ये इंद्रवाशि

श्रे काले विधिवद्धुंजते। ते सनातनं ब्रह्म यांति प्राप्नुवंति। हे कुरुसत्तम अयज्ञ
स्य यथोक्तयज्ञरहितस्य अयं साधारणो लोको नास्ति। अन्यो विशिष्ट साधन
साध्यः कुतः॥ ३१॥ ज्ञानयज्ञं स्तोतुं उक्तान् यज्ञान् उपसंहरति। एवं बहु विधा यज्ञा
वितता ब्रह्मणो मुखे कर्मजान् विद्धि तान् सर्वान् एवं
ज्ञात्वा विमोक्ष्यसे॥ ३२॥ एवं बहु विधा बहु प्रकारा यज्ञाः ब्रह्मणो
वेदस्य मुखे विस्तृताः। वेदेन अवगम्यमाना इत्यर्थः॥
तान् सर्वान् कर्मजान् कायिक वाचिक मानस व्यापारतो जातान्
विद्धि जानीहि। अनात्मविषयान् अनात्मजान्। आत्मा तु निर्व्यापारः॥ एवंय ५३

ज्ञानं वा ... त्या ... दि व्यापारजन्यं आत्मनो निर्व्यापारं ज्ञात्वा विमोक्ष्यसे॥ ३२॥ ब्रह्मा
र्पणमित्यादि श्लोकेन सम्यक् दर्शनस्य अज्ञं चे संपादितो यज्ञाश्च अनेके उपदिष्टाः
तेभ्यः सिद्ध पुरुषार्थ प्रयोजनेभ्यः ज्ञानं स्तौति। श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञान
यज्ञः परंतप। सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥ ३३॥ हे परंतप द्रव्यमयाद्यज्ञ
त् द्रव्यसाधनसाध्यात् फलारंभकात् यज्ञात् ज्ञानयज्ञः फलानारंभकः श्रेयान्
प्रशस्यतरः। कथं यस्मात् हे पार्थ अखिलं सर्वं कर्म। ज्ञाने मोक्षसाधने परिसमा
प्यते अंतर्भवतीत्यर्थः॥ ३३॥ एवंभूतात्मज्ञाने साधनमाह॥ तद्विद्धि प्र
णिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ ३४

तत् ज्ञानं गुरूणां प्रणिपातेन परिप्रश्नेन सेवया विद्धि। जानीहि ते उपदेक्ष्यंति तत्त्वदर्शिनः ज्ञा
निनः ज्ञानं उपदेक्ष्यंति। ३४ ज्ञानफलमाह॥ यत् ज्ञात्वा न पुनर्मोहमेवं यास्यसि
पांडव। येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि। ३५ हे पांडव यत् ज्ञानं ज्ञात्वा पुनः
एवं अमुना प्रकारेण मोहं न यास्यसि। न प्राप्स्यसि। येन ज्ञानेन भूतानि अशे
षेण तव आत्मनि अथो मयि स्थितानि द्रक्ष्यसि। ३५ किंच॥ अपि चेदसि पा
पेभ्यः सर्वेभ्यः पापकृत्तमः। सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि। ३६
चेत् यदि त्वमपि सर्वेभ्यः पापेभ्यः पाप~~कृ~~कृद्भ्यः पापकृत्तमोऽसि तथापि ज्ञान
प्लवेनैव ज्ञानोडुपेन सर्वं वृजिनं पापार्णवं संतरिष्यसि। ३६ ज्ञानं कथं पापं नाशय ५४
ति। तत्र दृष्टांतमाह। यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा। ३७ हे अर्जुन यथा समिद्धोऽग्निः एधांसि का
ष्ठानि भस्मसात् कुरुते। तथा ज्ञानाग्निः ज्ञानमेव अग्निः ज्ञानाग्निः सर्वकर्माणि भस्म
सात् निर्बीजानि कुरुते। ३७ तत्र हेतुं तत् ज्ञानं कस्यचिदेव अधिकारिणो भवति न सर्वस्ये
ति द्वयं आह॥ न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत् स्वयं योगसंसिद्धः
कालेनात्मनि विंदति। ३८ हि यस्मात् इह ज्ञानेन सदृशं पवित्रं न विद्यते। तत् ज्ञानं
योगसंसिद्धः योगेन कर्मयोगेन समाधियोगेन संस्कृतः योग्यतामापन्नः बहु
कालेन आत्मनि विषये लभते। ३८ यैर्नि कां तन विज्ञानप्राप्तिर्भवति स उपायः उप
दिश्यते श्रद्धावानिति॥ श्रद्धावान् लभते ज्ञानं तत्परः संयतेंद्रियः। ज्ञानं लब्ध्वा परां
शांतिमचिरेणाधिगच्छति। ३९ श्रद्धावान् श्रद्धालुः तत्परः तन्निष्ठः गुरूपासनादौ अनु

युक्तः संयतेंद्रियः संयतानि विषयेभ्यो निवर्तितानि इंद्रियाणि यस्य सः ज्ञानं ल-
भते। ज्ञानं लब्ध्वा अचिरेण क्षिप्रमेव परां शांतिं मोक्षाख्यां प्राप्नोति॥ ३९ तत्र श्रद्धा-
लोकवत्संशयो न कर्तव्यः पापिष्ठो हि संशय इत्याह॥ अज्ञश्चाश्रद्दधानश्च
संशयात्मा विनश्यति। नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥ ४० अज्ञः अनात्म-
वित् ज्ञानस्य साधनेषु श्रद्धारहितः संशयात्मा संदेहवान् विनश्यति संशयात्म-
नः संदिग्धचित्तस्य अयं सर्वसाधारणो लोको नास्ति। परलोके नास्ति सुखं न-
तत्रापि संशयोपपत्तेः॥ ४० यकस्मादेवं ज्ञानिनं स्तौति॥ योगसंन्यस्तकर्माणं
ज्ञानसंछिन्नसंशयं। आत्मवंतं न कर्माणि निबध्नंति धनंजय॥ ४१ हे धनंजय कर्मा- ५५
णि। योगसंन्यस्तकर्माणं। योगेन परमार्थदर्शनलक्षणेन संन्यस्तानि कर्माणि ये-

नजन्मान् अर्जुनेप्रशुवाच। अर्जुन त्वमात्मानं स्मर। आत्मानं बुद्धिकर अभिमानि वासि नौ नरनारायणौ ऋषि आश्च रोहदरणाश्रावतीलो।

न'स'तं' ज्ञानसंछिन्नसंशयं जीवपरमात्मनोरेकत्वं ज्ञानेन संछिन्नः संशयो
यस्य स तं आत्मवंतं प्रमादरहितं । न निबध्नंति अनिष्टफलं न जनयंति ॥४१॥ यस्मात्
ज्ञानानुष्ठाने कर्मानुष्ठाने च संशयवान् विनश्यति तस्मात् संशयो न कर्तव्य
इत्याह । तस्माद् अज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः । छित्त्वैनं संशयं योग
मातिष्ठोत्तिष्ठ भारत । हे भारत तस्मात् अज्ञानसंभूतं अविवेकात् जातं हृत्स्थं
हृदि बुद्धौ स्थितं । एनं आत्मविनाशहेतुभूतं संशयं आत्मनः ज्ञानासिना । सर्वक्ले
शोपशमनं आत्मज्ञानमेव असिः खड्गं तेन छित्त्वा योगं आत्मज्ञानसाधनं कर्मयो ५८
गं आतिष्ठ कुरु युद्धाय उत्तिष्ठ ॥४२॥ इति श्रीभगवद्गीताभाष्ये कर्मसंन्यासयोगो ना
म चतुर्थोऽध्यायः ॥ ४ ॥ श्रीरस्तु ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

कर्मण्यकर्म यः पश्येत् । ज्ञानाग्निदग्धकर्माणं । शारीरं केवलं कर्म । यदृच्छालाभसंतुष्टः ।
ब्रह्मार्पणं ब्रह्म हविः । इत्यादिवचनैः सर्वकर्मसंन्यासमुक्त्वा छित्त्वैनं संशयं योग
मातिष्ठेत्यनेन वचनेन कर्मयोगं अवोचत् । तयोश्च स्थितिगतिवत् परस्पर
विरुद्धयोः एकेन युगपत् अनुष्ठानमशक्यत्वात् कालभेदेन अनुष्ठानविधानाभा
वात् अन्यतरकर्तव्यताप्राप्तौ एकस्य प्रशस्यतरस्य बुभुत्सया अर्जुन उवाच ॥
संन्यासमिति ॥ अर्जुन उवाच ॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं ॥१॥ हे कृष्ण कर्मणां संन्यासं शास्त्रीयाणां क
र्मणां त्यागं पुनर्योगं तेषां कर्मणां ईश्वरार्थं कर्तव्यत्वं शंससि कथयसि । एत
योः यत् एकं श्रेयः तत् मम सुनिश्चितं तव अभिप्रेतं ब्रूहि ॥१॥

स्याचिन्त्राय मा वदकलो निर्णयाय भगवानुवाच॥ सन्यास इति। श्रीभगवानुवाच।
सन्यासः कर्मयागश्च निःश्रेयसकरावुभौ तयोस्तु २ कर्मसंन्यासात् कर्मया
गो विशिष्यते। २ संन्यासः कर्मणां त्यागः। वपुनः कर्मयोगः। तेषां कर्मणां अनुष्ठानं।
उभौ निःश्रेयसकरौ मोक्षसाधकौ। तपुनः तयोः कर्मसन्यासात् केवलात्
ज्ञानरहितात् कर्मत्यागात् कर्मयोगः ईश्वरार्थं कर्मकरणं विशिष्यते उत्कृष्टं
२ ज्ञानरहितकेवलसंन्यास कर्मत्यागात् मुक्तिहेतोर्मत्या कर्मयोगं स्तुवात
त्रहेतुमाह। ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति। निर्द्वंद्वो हि महाबा
हो सुखं बंधात् प्रमुच्यते॥ स एवं विधः कर्मत्यागी नित्यसन्यासी यः सुखे सुख ५७
हेतो च न कांक्षति दुःखे दुःखहेतौ च न द्वेष्टि। निर्द्वंद्वः शीतोष्णसुखदुःखादिद्वंद्वे

समः। हि यस्मात्। हे महाबाहो स सुखं सुखेन बंधात् प्रमुच्यते। २ कर्मयोग
कर्मसंन्यासयोः अंगप्रधानत्वेन अवस्थाभेदेन क्रमसमुच्चये अभिहिते उ
भयविकल्पमंगीकृत्य उभयोः कः श्रेष्ठः इति प्रश्ने अज्ञानिनामेवोचितो न वि
वेकिनामित्याह। सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः। एकमप्यास्थि
तः सम्यगुभयोर्विंदते फलं॥४ बालाः अज्ञाः। सांख्ययोगौ। ज्ञानरहितः कर्मणां
त्यागः सांख्यं। ईश्वरार्थं कर्मणामनुष्ठानं योगः॥ तौ पृथक्फलौ प्रवदंति न पंडि
ताः ज्ञानिनः। एकमपि सम्यक् आस्थितः एकस्य सम्यक् अनुष्ठानात् नरः उभयोः
फलं मोक्षाख्यं विंदते प्राप्नोति। कथमित्याह॥ यत्सांख्यैः प्राप्यते स्थानं त
द्योगैरपि गम्यते। एकं सांख्यं च योगं च यः पश्यति स पश्यति॥५ सांख्यैः

ज्ञाननिष्ठैः सन्यासिभिः यत् स्थानं प्राप्यते मोक्षाख्यं ईश्वरार्थं कर्मकारिभिः
योगिभिः तदेव प्राप्यते तदेव ज्ञानप्राप्तिद्वारेण मोक्षाख्यं यः पुमान् सांख्ययोगं
च एकफलत्वात् एकमेव पश्यति स सम्यक् जानातीत्यर्थः ५ तर्हि आदित एव
सन्यासः कर्तुं युक्तः इति मन्वानं प्रति आह। सन्यासस्तु महाबा
हो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ६ हे महाबाहो
संन्यासः सर्वकर्मणां त्यागः अयोगतः ईश्वरार्थं फलनिरपेक्षं कर्म विना दुःखमाप्तुं
दुःखाय भवति योगयुक्तः कर्मयोगयुक्तः मुनिः ब्रह्मवित् अचिरेण क्षिप्रमेव
ब्रह्मपरमार्थज्ञानहेतुः सन्यासः तं अधिगच्छति प्राप्नोति ६ कर्मयोगादिक्रमे ५८
ण ब्रह्माधिगमसत्त्वेऽपि तदुपरितने न कर्मणा बंधः स्यादित्याशंक्याह।

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि
न लिप्यते ७ योगयुक्तः कर्मयोगयुक्तः विशुद्धात्मा विशुद्धबुद्धिः विजितात्मा वि
जितदेहः जितेंद्रियः सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादीनां आत्मभूतः आ
त्मा यस्य सः लोकसंग्रहार्थं कर्म कुर्वन्नपि न लिप्यते ७ कुर्वन्नपि न लिप्य
त इति विरुद्धमाशंक्य कर्तृत्वाभिमानाभावात् न विरुद्धमित्याह॥ नै
व किंचित् करोमीति युक्तो मन्येत तत्त्ववित् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अ
श्नन् गच्छन् स्वपन् श्वसन् ८ युक्तः समाहितः तत्त्ववित् आत्मनो याथार्थ्य
वित् अहं किंचिन्नैव करोमि इति मन्येत किं तर्हि कदा कथं तावद्
अवधारयन् मन्येत इत्यपेक्षायामाह पश्यन्नित्यादिना ८ प्रलपन् विसृ

ऊन् गृह्णन् उन्मिषन्निमिषन्नपि इंद्रियाणींद्रियार्थेषु वर्त्तंत इति धारयन्॥
तत्ववित् परमार्थदर्शी दर्शनश्रवणादि क्रियां कुर्वन् इंद्रियाणि इंद्रिया
र्थेषु विषयेषु वर्त्तंते नाहं किंचित् करोमीति अवधारयन् चिंतयन् सन्
मन्येत॥ यस्तु पुनः अतत्ववित् कर्मयोगे प्रवृत्तः तस्य कर्म यथा बंधकं
न भवति तं प्रकारमाह॥ ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः॥
लिप्यते न स पापेन पद्मपत्रमिवांभसा॥१०॥ यः कर्माणि ब्रह्मणि ईश्वरे आ
धाय तदर्थं करोमीति बुद्ध्या कर्मफले मोक्षेपि संगं त्यक्त्वा करोति॥ स ५८
पापेन न लिप्यते॥ सत्वस्यांतःकरणस्य शुद्धिरेव तेषां फलमित्याह कायेन॥१०

अक्षयं सुखं अश्नुते॥२१॥ ननु प्रियविषयभोगानामपि निवृत्तेः कथं मोक्षः पुरुषार्थः
इत्यत आह॥ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते॥ आद्यंतवंतः कौंतेय न ते
षु रमते बुधः॥२२॥ हि यस्मात् ये संस्पर्शजाः विषयेंद्रियसंयोगजा भोगाः ते आद्यंतवं
तः उत्पत्तिविनाशवंतः दुःखयोनय एव दुःखहेतवः॥ हे कौंतेय तेषु बुधः न रमते॥२२॥ अयं च
श्रेयोमार्गप्रतिबंधकः सर्वानर्थहेतुः दुर्निवार्यश्च। कामक्रोधोद्भवो वेगः॥ अतस्तन्नि
रोधे यत्नाधिक्यं कर्तव्यमित्याह॥ शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणा
त्। कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥२३॥ यः पुमान् इहैव जीवन्नेव शरीरविमोक्ष
णात् प्राक् मरणात् पूर्वं कामक्रोधोद्भवं वेगं अनुभूते दृष्टे श्रुते स्मृते वा सुखहेतौ
विषये या तृष्णा स कामः तथा दृष्टे श्रुते स्मृते दुःखहेतौ विषये आत्मनः प्रति
कूले यो द्वेषः स क्रोधः॥ वेगः रोमहर्षनेत्रवदनलिंगः अंतःकरणप्रक्षोभरूपः
= स कामजो वेगः गात्रप्रकंपस्वेदसंदष्टो

PAGE(S)MISSING

NOT AVAILBLE

FOLIO NO:-
60-63

हृष्टरक्तनेत्रादिलिंगश्चित्तप्रक्षोभरूपःस क्रोधोद्भवो वेगः। तं कामक्रोधोद्भवं वेगं सो
ढुं शक्नोति स नरः युक्तः योगी सुखी च॥२३॥ कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्या
ह॥ योंऽतःसुखोंऽतरारामस्तथांतर्ज्योतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिग
च्छति॥२४॥ यः अंतःसुखः अंतः आत्मन्येव सुखं यस्य न विषयेषु सः। अंतरारामः अंतः
आत्मन्येव आरामः क्रीडा यस्य न बहिः स्त्र्यादौ। अंतर्ज्योतिः अंतः आत्मन्येव ज्योतिः
प्रकाशो यस्य न सूर्यदीपादिषु। स योगी ब्रह्मस्वरूपः सन् ब्रह्मणि निर्वाणं ब्रह्मणि
निवृत्तिं मोक्षं गच्छति॥२४॥ किंच॥ लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः। छि
न्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥२५॥ ऋषयः सम्यक्दर्शिनः छिन्नद्वैधाः
छिन्नसंशयाः यतात्मानः संयतेंद्रियाः कायवाङ्मनोभिः सर्वानुकूले रताः ब्रह्म ६१
निर्वाणं मोक्षं लभंते॥२५॥ किंच॥ कामक्रोधवियुक्तानां यतीनां यतचेतसां। अभितो

ब्रह्मनिर्वाणं वर्त्तते विदितात्मनां॥२६॥ कामक्रोधवियुक्तानां संन्यासिनां संयतांतःकरणानां
अभितः उभयोः अपि जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्त्तते। विदितात्मनां आत्मविदां॥२६॥
अथेदानीं ध्यानयोगं सम्यक्दर्शनस्य अंतरंगं साधनं विस्तरेण वक्ष्यामीति तत्र सूत्रस्था
नीयान् श्लोकान् उपदिदेश॥ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः। प्राणापा
नौ समौ कृत्वा नासाभ्यंतरचारिणौ॥२७॥ बाह्यान् बहिः उत्पन्नान् स्पर्शान् विषयान् शब्दादीन्
श्रोत्रादिद्वारेण बुद्धौ प्रवेशितान् तान् अननुचिंतयन् बहिः कृत्वा चक्षुः चक्षुः भ्रुवोः अं
तरे कृत्वा ऊर्ध्वमनुसंधाय तौ प्राणापानौ ऊर्ध्वाधः सन्निश्वासरूपौ नासाभ्यंतरे चरंतौ समौ
कृत्वा तद्व्यापारविरोधेन कुंभयित्वा॥२७॥ जितेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः। विगतेच्छा
भयक्रोधो यः सदा मुक्त एव सः॥२८॥ यो मुनिः जितेंद्रियमनोबुद्धिः संयतानि इंद्रिया
णि मनो बुद्धिश्च यस्य सः। मोक्षपरायणः मोक्ष एव परमा गतिर्यस्य सः। विगते

छाभयक्रोधः इच्छाभयक्रोधरहितः। यः एवं वर्त्तते संन्यासी सदा मुक्त एव॥२८॥ एवं
समाहितचित्तेन किं विज्ञेयमित्युच्यते। भोक्तारमिति॥ भोक्तारं यज्ञतपसां सर्वलोक
महेश्वरं सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥२९॥ मां यज्ञतपसां कर्तृत्वेन देवता
त्वेन च भोक्तारं सर्वभूतानां सुहृदं प्रत्युपकारनिरपेक्षतया उपकारिणं ज्ञात्वा शां
तिं सर्वसंसारोपरतिं ऋच्छति प्राप्नोति॥ इति श्रीभगवद्गीताभाष्ये प्रकृतियोगो नाम पं
चमोऽध्यायः॥ पंचमाध्याये ध्यानयोगस्य सम्यक्‌दर्शनं प्रति अंतरंगस्य साध
नस्य तत्र भूताः श्लोकाः स्पर्शान्कृत्वेत्यादयः उपदिष्टाः तेषां वृत्तिस्थानीयोऽयं षष्ठो
ध्याय आरभ्यते। तत्र सम्यक्‌दर्शनं प्रति संन्यासात् ध्यानयोगात् बहिरंगमपि कर्म
ध्यानयोगारोहणसमर्थेन गृहस्थेन अधिकृतेन तमारोढुं कर्तव्यमित्यतः तत् स्तौति। ६८
अनाश्रित इति॥ श्रीभगवानुवाच॥ अनाश्रितः कर्मफलं कार्यं कर्म

करोति यः। स संन्यासी च योगी च न निरग्निर्न चाक्रियः॥१॥ यः कर्मफलं अनाश्रितः कर्मफले नि
स्पृहः। कार्यं नित्यं नैमित्तिकं कर्म करोति। स पुनः संन्यासी। च पुनः स योगी चित्तसमाधान
युक्तो ज्ञातव्यः। च पुनः न निरग्निः न आग्निसाध्यक्रियारहितः। च पुनः न अक्रियः न स्मार्त
क्रियारहित एव संन्यासी च योगी च भवति। कर्मफलसंकल्पसंन्यासात् संन्यासित्वं
त्यागांगत्वेन योगानुष्ठानात् कर्मफलसंकल्पस्य चित्तविक्षेपहेतोः परित्यागाद् योगित्वं चे
ति॥१॥ गौणमुभयं न मुख्यं संन्यासित्वं योगित्वं चेत्यभिप्रायं दर्शयितुमाह॥ यं संन्यासमि
ति प्राहुर्योगं तं विद्धि पांडव। न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन॥२॥ हे पांडव श्रुतिस्मृति
वादाः यं संन्यासं कर्म सर्वकर्मतत्फलत्यागलक्षणं परमार्थसंन्यासमिति प्राहुः तं योगं
कर्मानुष्ठानलक्षणं परमार्थसंन्यासं विद्धि। हि यस्मात् असंन्यस्तसंकल्पः अपरित्यक्त
फलसंकल्पः कश्चन योगी न भवति॥२॥ ध्यानयोगस्य फलनिरपेक्षः कर्मयोगः

संन्यासापेक्षया बहिरंगं साधनमिति तं संन्यासत्वेन स्तुत्वा अधुना ध्यानयोगसाधनत्वं कर्म
णो दर्शयति।। आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारण
मुच्यते ३ योगं आरोढुमिच्छतः मुनेः कर्मफलसंन्यासिनः कर्मैव कारणं साधनं उच्यते। पुनः त
स्यैव योगारूढस्य शमः कर्मोपशमः कारणं इत्युच्यते ३ कदासौ योगारूढो भवति कीदृशश्चे
ति तदुभयमाह।। यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्यते। सर्वसंकल्पसंन्यासी
योगारूढस्तदोच्यते ४ हि यस्मात् यदा नैइंद्रियार्थेषु शब्दादिषु विषयेषु। न पुनः कर्मसु
नित्यनैमित्तिककाम्यनिषिद्धेषु न अनुषज्यते। कर्तव्यताबुद्धिं न करोति। तदा सर्वसंक
ल्पसंन्यासी। इहामुत्रार्थकामहेतून् सर्वसंकल्पान् त्यक्तुं शीलमस्य सः। योगारूढः
योगप्राप्तः उच्यते ४ यदेवं योगारूढो भवति तदा आत्मना आत्मा संसारानर्थस
मूहादुद्धृतो भवतीत्याह।। उद्धरेदात्मनात्मानं नात्मानमवसादयेत्। आत्मैव ह्या ६६

त्मनो बंधुरात्मैव रिपुरात्मनः ५ आत्मना संसारसागरे निमग्नं आत्मानं ततः उद्धरेत्। योगारूढ
तां आपादयेत्। आत्मानं न अवसादयेत्। न अधो नयेत्। हि यस्मात् आत्मैव आत्मनो बंधुः हि
तकारी संसारविमुक्तये भवति नान्यः। आत्मैव आत्मनः शत्रुः रिपुः यो हि बाह्यः शत्रुः स आत्मा
परात्मानेव शत्रुत्वं भजते ५ तत्र किंलक्षणः आत्मा आत्मनो बंधुः। किंलक्षणश्च आत्मनो रिपुरिति
उभयं दर्शयति।। बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः। अनात्मनस्तु शत्रुत्वे वर्तेतात्मै
व शत्रुवत् ६ तस्य आत्मनः आत्मा बंधुः येन आत्मना आत्मैव देहेंद्रियसंघातः जितः वशीकृतः। पु
नः अनात्मनः अजितदेहेंद्रियसंघातः शत्रुवत् आत्मैव शत्रुत्वे वर्तेत ६ जितात्मनः स्वस्मि
न् बंधुत्वं स्पष्टयति।। जितात्मनः प्रशांतस्य परमात्मा समाहितः। शीतोष्णसुखदुःखेषु
तथा मानापमानयोः ७ शीतोष्णसुखदुःखेषु तथा मानापमानयोः समस्य जितात्मनः जितदे
हेंद्रियसंघातस्य प्रशांतस्य रागादिदोषरहितस्य परमात्मा समाहितः स्वस्वरूपनिष्ठो
भवति।। ७ ऽऽ श्रीस्व

योगारूढस्य लक्षणं श्रेष्ठत्वं च उक्तं तं उपपन्नं संदर्शयति॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो वि
जितेंद्रियः॥ युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः॥ ज्ञानविज्ञानतृप्तात्मा ज्ञानं आत्म
विषयं शास्त्रजनितं। विज्ञानं आत्मसाक्षात्काररूपं ताभ्यां तृप्तः आत्मा अंतःकरणं य
स्य सः कूटस्थः अप्रकंप्यः॥ विजितेंद्रियः॥ समलोष्टाश्मकांचनः॥ युक्तः समाहितः
स योगी कथ्यते॥८ सुहृन्मित्रादिषु समबुद्धिस्ततोऽपि श्रेष्ठ इत्याह॥ सुहृन्मि
त्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥ साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥९ सुहृत् मित्र
अरि उदासीन मध्यस्थ द्वेष्य बंधुषु सुहृदिति प्रत्युपकारमनपेक्ष्योपकर्ता। मित्रं स्नेहवान्
अरिः शत्रुः॥ उदासीनो न कस्यचित् पक्षं भजते॥ मध्यस्थो यो विरुद्धयोरुभयोर्हितैषी॥
द्वेष्य आत्मनोऽप्रियः॥ बंधुः संबंधी एषु साधुषु च शास्त्रार्थानुवर्तिषु अपि च पापेषु प्रतिषिद्ध ६७
कारिषु सर्वेष्वेतेषु समबुद्धिः तेषां जातिचरित्रादिकं स्वरूपं अविचारयन् समं आत्मवत्प

श्यन् विशिष्यते श्रेष्ठो भवति॥९ एवं योगारूढस्य लक्षणं श्रेष्ठत्वं च उक्त्वा तस्य सर्वोत्तमफलप्रा
प्तये सांगं योगं विधत्ते॥ योगी युंजीत इत्यारभ्य स योगी परमो मतः इत्यंतेन ग्रंथेनायो
जीति॥ योगी युंजीत सततमात्मानं रहसि स्थितः॥ एकाकी यतचित्तात्मा निराशीरप
रिग्रहः॥१०॥ एकाकी असहायः। संयतौ अंतःकरणदेहौ यस्य स यतचित्तात्मा। निराशीः
विगतस्पृहः॥ योगी ध्यानवान्। अपरिग्रहः॥ रहसि गिरिगुहादौ स्थितः॥ आत्मानं अंतः
करणं युंजीत समाधियुक्तं कुर्यात्॥१० अथ इदानीं योगं युंजानस्य आसनआहारवि
हारादीनां योगसाधनत्वेन नियमं वक्ष्यते आसननियमं तावत् प्रथममाह शुचौ देश इति
द्वाभ्यां॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः॥ नात्युच्छ्रितं नातिनीचं चैलाजिन
कुशोत्तरं॥११ आत्मनः आसनं नात्युच्छ्रितं नातिनीचं। चैलाजिनकुशोत्तरं। पूर्वं कुशा
स्तेषामुपरि कृष्णाजिनं। तस्योपरि वस्त्रं। एवंविधं स्थिरं आसनं प्रतिष्ठाप्य॥१०

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः। उपविश्यासने युंज्यात् योगमात्मविशुद्धये
१२ तत्र आसने उपविश्य। यतचित्तेन्द्रियक्रियः। यता चित्तेन्द्रियाणां क्रिया व्यापारो येन। सः।
एकाग्रं सर्वविषयेभ्यः उपसंहृत्य आत्मपरं कृत्वा अंतःकरणशुद्ध्यर्थं योगं कुर्यात्
अभ्यस्येत्॥१२ चित्तैकाग्र्योपयोगिनी देहादिधारणं दर्शयति द्वाभ्यां॥ समं कायशिरो
ग्रीवं धारयन्नचलं स्थिरः। संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥१३ कायशिरो
ग्रीवं। कायः शिरः। ग्रीवा च एतत्त्रयं समं अवक्रं अचलं क्रियारहितं धारयन्। स्थैर्येण च
दिशः अनवलोकयन्। नासिकाग्रमेव संप्रेक्ष्य।१३ प्रशांतात्मा विगतभीः ब्रह्मचारिव्रते
स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥१४ प्रशांतात्मा शांतचित्तः। ब्रह्मचारि
व्रते ब्रह्मचर्यगुरुशुश्रूषा भिक्षान्नभोजनं। स्थितः। तदनुष्ठाता भवेत्। किंच मनसो व्यापारं ६७
नियम्य मत्परायणः। युक्तः समाधियुक्तः सन् उपविशेत्॥१४ अथेदानीं योगफलमुच्यते॥

॥ युंजन्नेवं सदात्मानं योगी नियतमानसः। शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति॥१५ यो
गी ध्यानवान् नियतमानसः संयतमनाः सदा आत्मानं एवं उक्तप्रकारेण युंजन् समाधिं कुर्व
न् निर्वाणपरमां मोक्षफलां शांतिं निवृत्तिं मत्संस्थां मदधीनां अधिगच्छति प्राप्नोति।१५ इदानीं यो
गिनः आहारादिनियममुच्यते। नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः। न चाति
स्वप्नशीलस्य जाग्रतो नैव चार्जुन॥१६ अत्यश्नतः आत्मीय आहारात् अधिकं भुंजा
नस्य योगो नास्ति। चपुनः एकांतं अनश्नतः अभुंजानस्य वा योगो नास्ति। तथा अतिस्वप्न
शीलस्य अतिनिद्राशीलस्य। अति जाग्रतस्य। हे अर्जुन। योगः समाधिर्नास्ति॥१६ कथं
भूतस्य योगो भवतीत्युच्यते। युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु। युक्तस्वप्नावबो
धस्य योगो भवति दुःखहा॥१७ युक्ताहारविहारस्य। आह्रियत इत्याहारोऽन्नं। तत् नियतं
अर्द्धमन्नस्य। चतुर्थभागः पानीयस्य। चतुर्थभागो वायुसंचरणस्य। एवं चतुर्थभागोदरं प्र

रयेतु स योगिनो नियताहारः। विहारः पादचंक्रमणं तदपि नियतं कर्मसु कार्येषु नियतचेष्टस्य। स्व
कालसंसारदुःखघ्नस्तु योगो भवति। युक्तः स्वप्नो निद्रा अवबोधो जागरं तौ नियतकालौ यस्यास्य
तस्य च १७ तथा अधुना कदा युक्तो भवतीत्युच्यते॥ यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥ १८ यदा विनियतं विशेषेण संयतं चित्तं बाह्यचिंता
दिव्या आत्मन्येव केवले अवतिष्ठते स्थिरं भवति। किंच सर्वकामेभ्यः ऐहिकामुष्मिकभोगेभ्यः निस्पृ
हः विगततृष्णो भवति। तदा स युक्तः समाहितचित्त इत्युच्यते। १८ योगिनः आलोकाकारत
या अवस्थितस्य चित्तस्य उपमानमाह॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृता। योगि
नो यतचित्तस्य युंजतो योगमात्मनः॥ १९ यथा दीपः निवातस्थः नेंगते न चलति। आत्मनो
मनस्तः योगं समाधानं कुर्वतः यतचित्तस्य संयतमनसः। योगिनो ध्यानवतः सा उ
पमा योगज्ञैः कथिता। १९ एवं योगाभ्यासबलात् एकाग्रीभूतनिवातप्रदीपकल्पचि ६७
त्तादि स्वस्वरूपे निरूपयन् आत्मनो अवस्थाविशेषं सुखं योगस्वरूपं निरू

पयति। यत्रोपरमते इति सार्द्धैस्त्रिभिः॥ यत्रोपरमते चित्तं निरुद्धं योगसेव
या। यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति। यत्र यदा चित्तं योगसेवया योगा
नुष्ठानेन निरुद्धं सर्वतो निवारितव्यापारं उपरमते उपरतिं गच्छति। च पुनः यत्र आ
त्मना समाधिपरिशुद्धेन अंतःकरणेन आत्मानं परं चैतन्यज्योतिःस्वरूपं पश्यन् तस्मिन्
आत्मनि तुष्टिं लभते। २० आत्मन्येव तोषहेतुमाह॥ सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यम
तींद्रियं। वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥ २१ यत्र आत्यंतिकं निरवधि अतींद्रियं इं
द्रियव्यापारातीतं बुद्धिग्राह्यं केवलया इंद्रियनिरपेक्षया बुद्ध्या ग्राह्यं। तत् ईदृशं सु
खं यत्र यस्मिन् काले वेत्ति तदा आत्मस्वरूपे स्थितः। अयं तत्त्वतः परमार्थस्वरूपा
न्न चलति। २१ अचलनमेव उपपादयति। यं लब्ध्वा चापरं लाभं मन्यते नाधिकं त
तः। यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते। २२ च पुनः यं आत्मलाभं

लब्ध्वा अपरं लाभं ततो ऽधिकं अस्तीति न मन्यते। यस्मिन् आत्मतत्त्वे स्थितः गुरुणा महता
पि दुःखेन शस्त्रपातादिलक्षणेन न विचाल्यते॥२२ एवं योगस्वरूपमुक्त्वा तस्य महाफलत्वद
र्शनेन अवश्यं ज्ञेयत्वं अभ्यसनीयत्वं चाह॥ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञि
तं। स निश्चयेन योक्तव्यो योगो निश्चितचेतसा॥२३ तं योगसंज्ञितं दुःखसंयोगवियोगं × निश्चितचेत = सा
सकलदुःखाभावरूपं विद्यात्। स यथोक्तफलो योगः निश्चयेन निश्चितबुद्ध्या ह्या निर्विद्दि
तेन चेतसा सोद्यमेन योक्तव्यः॥२३ किंच॥ संकल्पप्रभवान् कामान् त्यक्त्वा सर्वानशे
षतः॥ मनसैवेन्द्रियग्रामं विनियम्य समंततः॥२४ संकल्पप्रभवान् चेतसि कामानां ध्याने
संकल्पाः स प्रभवो येषां हेतुः। तान् सर्वान् अशेषतः सवासनान् अभिलाषान्
त्यक्त्वा विवेकेन युक्तेन मनसैव इंद्रियग्रामं इंद्रियसमुदायं समंततः सर्वतात् वि ७0
नियम्य उपरमेत्॥२४ यद्भुक्तानां संस्कारेण मनो विचलेत्। तर्हि धारणया स्थिरीकु
र्या।

र्यादित्याह॥ शनैः शनैरुपरमेत् बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किंचिदपि
चिंतयेत्॥२५ धृतिगृहीतया धैर्ययुक्तया बुद्ध्या शनैः शनैः उपरमेत्। उपरतिं कुर्यात्। न सहसा
मनः आत्मसंस्थं आत्मनि संस्थितं कृत्वा। आत्मैव सर्वं न ततो ऽन्यत् किंचिदपि चिंतयेत्॥२५ ए
वमपि रजोगुणवशात् यदि मनः प्रचरेत् तर्हि पुनः प्रत्याहारेण वशीकुर्यादित्याह॥ यतो
यतो निश्चरति मनश्चंचलमस्थिरं। ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥२६ ~~स्वभावादि~~
चंचलं अस्थिरं एतन्मनः यत् यस्मात् शब्दादेर्निमित्तात् निश्चरति निर्गच्छति। ततः ततः नियम्य
नियमनं कृत्वा आत्मन्येव वशं नयेत्॥२६ एवं प्रत्याहारादिभिः पुनः पुनः मनो वशीकुर्वतः
रजोगुणक्षये योगसुखं प्राप्नोतीत्याह॥ प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं उपै
ति शांतरजसं ब्रह्मभूतमकल्मषं॥२७ हि यस्मात् एनं योगिनं प्रशांतमनसं शांतरजसं
प्रक्षीणमोहादिक्लेशरजसं। ब्रह्मभूतं जीवन्मुक्तं। अकल्मषं पुण्यपापरहितं उत्तमं नि
रतिशायं सुखं उपैति उपगच्छति॥२७ ततश्च कृतार्थो भवती

चव्याह॥ युंजन्नेवं सदात्मानं योगी विगतकल्मषः। सुखेन ब्रह्मसंस्पर्शमत्यंतं सुख
मश्नुते॥२८ एवं यथोक्तप्रकारेण सदा सर्वदा आत्मानं अंतःकरणं युंजन् समाधियुक्तं कुर्वन्
विगतपापः योगी योगांतरायवर्जितः सुखेन अनायासेन ब्रह्मसंस्पर्शं ब्रह्मस्वरूप
स्थं अत्यंतं निरतिशयं सुखं अश्नुते प्राप्नोति॥२८ इदानीं योगस्य यत्फलं ब्रह्मैकत्व
दर्शनं। सर्वसंसारविछेदकारणं तद्दर्शयति॥ सर्वभूतस्थमात्मानं सर्वभूतानि चा
त्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥२९ योगयुक्तात्मा समाधियुक्तांतःकरणः
सर्वभूतस्थं सर्वेषु भूतेषु ब्रह्मादिस्थावरांतेषु विषमेषु समं निर्विशेषं ब्रह्मात्मैक्यं कर्तुं॥
आत्मानं पश्यति। च पुनः सर्वभूतानि आत्मनि पश्यति। यः स सर्वत्र समदर्शनः॥२९ एतस्य
आत्मैकत्वदर्शनस्य फलं दर्शयति॥ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्याहं ७१
न प्रणश्यामि स च मे न प्रणश्यति॥३० यः मां सर्वस्य आत्मानं सर्वेषु भूतेषु पश्यति। सर्वं च

ब्रह्मादिभूतजातं मयि विश्वात्मनि पश्यति। तस्य एवं आत्मैकत्वदर्शिनः। अहमीश्वरो न प्र
णश्यामि न परोक्षतां गमिष्यामि। स च विद्वान् मम वासुदेवस्य न प्रणश्यति। न परोक्षो भवति।
तस्य च मम च एकात्मता॥३० पूर्वश्लोकार्थं सम्यक्दर्शनं अनूद्य तत्फलं मोक्षं विदधानः। न तत्र प्रति
बंधः स्यादिति दर्शयति॥ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः। सर्वथा वर्तमानोपि
स योगी मयि वर्तते॥३१ यः सर्वभूतस्थितं मां एकत्वं आस्थितः सर्वत्र अभेदबुद्ध्या भजते। स योगी
सम्यक्दर्शी सर्वथा सर्वप्रकारैः कर्मणा कर्मत्यागेन वा मयि विष्णवे परे पदे वर्तते।
न केनचित् प्रतिषिध्यते इत्यर्थः॥३१ ज्ञानिनामपि सर्वभूतानुकंपी श्रेष्ठ इत्याह॥ आत्मौ
पम्येन सर्वत्र समं पश्यति योऽर्जुन। सुखं वा यदि वा दुःखं स योगी परमो मतः॥३२ हे अर्जुन यः
सर्वत्र सर्वेषु भूतेषु सुखं यदि वा दुःखं आत्मौपम्येन आत्मा स्वयमेवोपमा। उपमायाः भा
वः औपम्यं। तेन समं पश्यति। यत् आत्मनः सुखकारि। तत् अन्यस्य करोति। यत् आ

मनः असुखकारि तत् अन्यस्य न करोति। स योगी परमो मतः॥३२ सर्वयोगिनामपि एतस्य य
थोक्तस्य समदर्शनलक्षणस्य योगस्य दुःसंपाद्यतामा लक्ष्य तत्प्राप्त्युपायं विविदिषुः अर्जु
न उवाच॥ योऽयमिति॥ अर्जुन उवाच। योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन। एत
स्याहं न पश्यामि चंचलत्वात् स्थितिं स्थिरां॥३३ हे मधुसूदन त्वया यो योगः साम्येन सम
त्वबुद्ध्या प्रोक्तः अहं एतस्य योगस्य मनसः चंचलत्वात् स्थिरां अचलां स्थितिं न प
श्यामि॥३३ एतदेव स्फुटयति॥ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं। तस्याहं निग्र
हं मन्ये वायोरिव सुदुष्करं॥३४ हे कृष्ण हि यस्मात् मनः चंचलं। प्रमाथि। शरीरं इंद्रिया
णि च प्रमथ्नाति परवशानि करोतीति। बलवत् न केनचित् नियंतुं शक्यं। किंच दृढं। तंतुनागवत्। ७२
तंतुनाग इति समुद्रजीवविशेषः। तद्वत्। अहं तस्य एवंभूतस्य मनसः निग्रहं निरोधं वायोरि
व सुदुष्करं मन्ये। यथा वायोः दुष्करो निग्रहः। ततोपि दुष्करं मन्ये। इत्यर्थः॥३४

तदुक्तं मनःचंचलत्वादिकं अंगीकृत्य मनोनिग्रहोपायं दर्शयति। भगवानुवाच॥ श्रीभग
वानुवाच। असंशयं महाबाहो मनो दुर्निग्रहं चलं। अभ्यासेन तु कौंतेय वैराग्येण च गृ
ह्यते॥३५ हे महाबाहो मनः असंशयं निश्चितं दुर्निग्रहं चलं इत्यत्र संशयो नो। तु पुनः हे कौं
तेय अभ्यासेन आत्मविषया संतता मनोवृत्तिः आत्मव्यतिरिक्तविषयमनोवृत्तिरहित
ता अभ्यासः। तेन अभ्यासेन दृष्टादृष्टे ऐहिकामुष्मिकेषु भोगेषु दोषदर्शनाभ्या
सात् वितृष्णत्वं वैराग्यं तेन वैराग्येण गृह्यते निरुध्यते इत्यर्थः॥३५ एतावांस्तु इह
विशेष इत्याह॥ असंयतात्मना योगो दुःप्राप इति मे मतिः। वश्यात्मना तु
यतता शक्योऽवाप्तुमुपायतः॥३६ योगः असंयतात्मना अभ्यासवैराग्याभ्यां असंय
तचित्तेन दुःप्राप इति मम मतिः। तु पुनः वश्यात्मना अभ्यासवैराग्याभ्यां वशीकृतमन
सा यतता यत्नं कुर्वता उपायतः यथोक्तेन उपायेन प्राप्तुं शक्यः॥३६ अभ्यासवैराग्य

ऽशैथिल्येन कथंचिदप्राप्तसम्यक्दर्शनः मरणकाले योगाच्चलितमानसः सर्वकर्मसन्या
सी किंफलं प्राप्नोतीति पृच्छति अर्जुनः॥ अयतिरिति॥ अर्जुन उवाच॥ अयतिः श्रद्ध
योपेतो योगाच्चलितमानसः॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति॥३७ हे कृष्ण
अयतिः योगमार्गे अप्रयत्नवान् श्रद्धया आस्तिक्यबुद्ध्या युक्तः योगात् अंतकाले चलि
तमनाः॥ योगसंसिद्धिं योगफलं सम्यक्ज्ञानं अप्राप्य कां गतिं गच्छति॥३७ प्रश्नान्त
रायं विवृणोति। कच्चिदिति द्वाभ्यां॥ कच्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि॥३८ कच्चिदिति कोमलप्रश्ने। हे कृष्ण ब्रह्मणः
पथि ब्रह्मप्राप्तिमार्गे विमूढः अप्रतिष्ठः निराश्रयः उभयविभ्रष्टः कर्ममार्गाच्च
उभयभ्रष्टश्छिन्नाभ्रमिव नो नश्यति वा न नश्यति॥३८ एतन्मे संशयं कृष्ण 72
छेत्तुमर्हस्यशेषतः। त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते॥३९ हे कृष्ण मे

मम एतत् एवं अमुना प्रकारेण संशयं योगभ्रष्टस्य नाशानाशलक्षणं संदेहं अशेषतः सर्व
प्रकारेण छेत्तुं अर्हसि। अस्य संशयस्य हि यस्मात् त्वदन्यः छेत्ता नोपपद्यते॥३९ अत्रोत्त
रमाह भगवान् पार्थेति चतुर्भिः॥ श्रीभगवानुवाच॥ पार्थ नैवेह नामुत्र विनाशस्त
स्य विद्यते। नहि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति॥४० हे पार्थ तस्य योगभ्रष्टस्य इह
लोके परलोके वा विनाशः पूर्वस्मात् हीनजन्मप्राप्तिः न विद्यते। हि यस्मात् हे तात कश्चित्
कल्याणकृत् शुभकृत् दुर्गतिं कुत्सितां गतिं न गच्छति॥४० किं तस्य भवतीत्याह॥ ॥
प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः। शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजाय
ते॥४१ योगभ्रष्टः योगमार्गात् प्रच्युतः संन्यासी पुण्यकृतां अश्वमेधयाजिनां लोकान्
प्राप्य तत्र शाश्वतीः समाः दीर्घसंवत्सरान् उषित्वा तद्भोगक्षये शुचीनां यथोक्तचरित्राणां

श्रीमतां गेहे अभिजायते॥४१॥ अल्पकालाभ्यस्तयोगभ्रंशे गतिरुक्ता। चिरकालाभ्यस्तयोगभ्रं
शे तु पक्षांतरमाह॥ अथवा योगिनामेव कुले भवति धीमतां एतद्धि दुर्लभतरं लोके जन्म य
दीदृशं॥४२॥ अथवा धीमतां योगिनां अकिंचनानां कुले भवति जायते इति निश्चितं यत् ईदृ
शं एतत् योगिनां कुले जन्म लोके दुर्लभतरं दुःप्राप्यतरं श्रीमतां कुले जन्मापेक्षया
योगिनां कुले जन्म अत्यंतदुर्लभं॥४२॥ ततो दुर्लभत्वमित्यत्राह॥ तत्र तं बुद्धिसंयोगं लभते
पौर्वदेहिकं। यतते च ततो भूयः संसिद्धौ कुरुनंदन॥४३॥ हे कुरुनंदन तत्र योगिनां कुले तं पौर्वदे
हिकं पूर्वस्मिन् देहे भवं बुद्धिसंयोगं बुद्ध्या संयोगं लभते च पुनः ततः पूर्वस्मात् संस्कारात् भूयः
बहुतरं संसिद्धौ मोक्षनिमित्तं यतते प्रयत्नं करोति॥४३॥ कथं पूर्वदेहबुद्धिसंयोग इत्यत्राह॥ पूर्वाभ्या
सेन तेनैव ह्रियते ह्यवशोऽपि सः। जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते॥४४॥ हि यस्मात् ७४
स योगभ्रष्टः तेनैव पूर्वाभ्यासेन पूर्वजन्मनि कृतेनाभ्यासः पूर्वाभ्यासः तेनैव अ

वशोऽपि सः अस्वतंत्रः ह्रियते पुनरपि योगाभ्यासे प्रवर्त्यते। योगस्य जिज्ञासुरपि योगस्वरूपं ज्ञातुं
इच्छन्नपि योगभ्रष्टः शब्दब्रह्म वेदोक्तकर्मफलं अतिवर्त्तते उल्लंघ्य गच्छति॥४४॥ साक्षात् योगं आ
तिष्ठतः फलविशेषमाह॥ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः। अनेकजन्मसं
सिद्धस्ततो याति परां गतिं॥४५॥ पुनः योगी प्रयत्नात् अधिकं यतमानः संशुद्धकिल्बिषः
निर्धूतपापः अनेकजन्मसंसिद्धः अनेकजन्माभ्याससंस्कारोपचयेन संसिद्धः लब्धसम्य
कदर्शनः ततः तदनंतरं परां मोक्षरूपां गतिं गच्छति॥४५॥ यस्मादेवं तस्मात्॥ तपस्विभ्यो
ऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः। कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥४६॥ हे
यस्मात् ३ अर्जुन तपस्विभ्यः तपःकृच्छ्रचांद्रायणादिअनुष्ठातृभ्यः योगी अधिकः। ज्ञानिभ्योऽपि ज्ञा
नं शास्त्रजनितं तद्युक्तेभ्योऽपि अधिकः। कर्मिभ्यः कर्म अग्निहोत्रादिकं तद्युक्तेभ्योऽपि यो
गी आत्मवित् अधिकः तस्मात् कारणात् योगी आत्मविद्भव॥४६॥ उत्तराध्यायबीजं प्र

द्विषन् यमनियमपराणां मध्ये भगवद्भक्तस्य श्रैष्ठ्यमाह। भगवान्॥ योगिनामपि सर्वेषां
मद्गतेनांतरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥४७ यः मद्गतेनांतरात्मना मयि वासु
देवे समाहितेन मत्परेण अंतःकरणेन श्रद्धावान् श्रद्दधानः मां भजते। सर्वेषां कृच्छ्रादि
व्रतादिपराणां योगिनां ज्ञानिनां मध्ये। मे मम युक्ततमः अतिशयेन युक्तो योगी ज्ञानी मतः अभि
प्रेतः॥४७ इति श्रीभगवद्गीताभाष्ये ब्रह्मविद्यायां आत्मसंयमयोगो नाम षष्ठोऽध्यायः॥ ॥
षष्ठाध्याये तु मद्गतेनांतरात्मना यो मां भजते स मे युक्ततमो मत इत्युक्तं तत्र कीदृश
स्त्वं यस्य भक्तिः कर्तव्या कथं च भवद्भक्तो तरात्मत्वं भवति। इति अर्जुनस्य प्रश्नं हृदि
कृत्वा तन्निरूपयितुं भगवानाह॥ श्रीभगवानुवाच॥ मय्यासक्तमनाः पार्थ योगं युंज
न् मदाश्रयः। असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥१ हे पार्थ मयि आसक्तमनाः मयि ७५
वक्ष्यमाणे विशेषणे परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमनाः। मदाश्रयः। अहमे

व परमेश्वरः आश्रयो यस्य न अग्निहोत्रादिकर्म तपो दानं वा पुरुषसाधनं आश्रयते। स
मदाश्रयः। योगं युंजन् मनःसमाधानं कुर्वन्। एवंभूतस्त्वं असंशयं समग्रं समस्तविभूति
बलशक्ति ऐश्वर्यादिगुणसंपन्नं यथा येन प्रकारेण ज्ञास्यसि। एवमेव स भगवानिति तत्
तं प्रकारं मया उच्यमानं शृणु॥१ तच्च ज्ञानं भगवद्विषयमेव उत्तरत्र वक्ष्यमाणं स्तौति भग
वान्॥ ॥ ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यत् ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्य
मवशिष्यते॥२ हे अर्जुन अहं इदं विज्ञानसहितं ज्ञानं। ज्ञानं शास्त्रजनितं। विज्ञानं साक्षात्का
रस्वरूपं प्रत्यक्षं। तेन विज्ञानेन सहितं ते तुभ्यं अशेषतः साकल्येन वक्ष्यामि। तत् ज्ञा
नं श्रोतुः अभिमुखीकरणाय स्तौति। यत् ज्ञानं ज्ञात्वा इह लोके भूयः पुनरपि ज्ञातव्यं पुरुषा
र्थसाधनं न अवशिष्यते। मत्तः ब्रह्मः सर्वज्ञो भवतीत्यर्थः॥२ अतो विशिष्टफलत्वात् दुर्लभं भ
गवद्विषयं ज्ञानमित्याह भगवान्॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि॥

सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।३ मनुष्याणां सहस्रेषु मध्ये कश्चिदेव सिद्धये मोक्षाय यतते। यतता
मपि मोक्षार्थं यत्नं कुर्वतामपि सिद्धानां मध्ये कश्चिदेव तत्त्वतो याथार्थ्येन मां परमेश्वरं वे
त्ति।३ श्रोतारं प्रश्नेन अस्मिन् मुखी स्याद्॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥४ भूम्यादि पंच तन्मात्राणि मनः अहंकारः। बुद्धिः म
हत्तत्त्वं अहंकारः मूलप्रकृतिः अव्याकृतो इति अष्टधा प्रकृतिः भेदरूपा।४ अपरां प्रकृतिं उपसं
हरन् परां प्रकृतिमाह। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबा
हो ययेदं धार्यते जगत्॥५ हे महाबाहो अर्जुन इयं प्रकृतिः अपरा नपरा। अपरा निकृष्टा
अशुद्धाऽनर्थकरी। संसारात्मिका। इतः अस्याः यथोक्तायाः प्रकृतेः अन्यां विशुद्धां परां
प्रकृष्टां जीवभूतां क्षेत्रज्ञलक्षणां विद्धि। यया अंतः प्रविष्टया इदं जगद्धार्यते। तां म
म प्रकृतिं परां विद्धि।५ अनयोः प्रकृतिद्वं दर्शयन् स्वस्य तद्वारा सृष्ट्यादिकारणत्वमाह॥ ७६

क्षेत्र २

एतद्योनीनि भूतानि सर्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।६ हे अर्जुन
सर्वाणि भूतानि एतद्योनीनि एते परावरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनी येषां भूतानां ता
नि एतद्योनीनि इति उपधारय अवधारय। यस्मात् मम प्रकृती सर्वभूतानां कारणं। अतः
अहं कृत्स्नस्य जगतः प्रभवः प्रलयो विनाशः भवामि।६ यस्मादेवं तस्मात्॥ मत्तः परत
रं नान्यत् किंचिदस्ति धनंजय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।७ हे धनंजय यस्मात्
मत्तः परमेश्वरात् परतरं श्रेष्ठतरं अन्यत् कारणांतरं किंचिन्नास्ति। इदं सर्वं मयि विष
यप्रोतं ग्रथितं सूत्रे मणिगणा इव। यथा सूत्रे मणिगणाः प्रोताः। तथा इदं सर्वं जग
त् मयि प्रोतमित्यर्थः।७ केन केन धर्मेण विशिष्टे त्वयि सर्वं प्रोतमित्याह॥ रसोऽहमप्सु
कौंतेय प्रभास्मि शशिसूर्ययोः। प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु।८ हे कौंतेय अ
प्सु अपां यः सारभूतो रसः स अहं। तस्मिन् मयि आपः प्रोता इत्यर्थः। एवं सर्वत्र॥

शशिसूर्ययोः प्रभा प्रकाशः अहं अस्मि। सर्ववेदेषु प्रणवः वेदमूलभूतः ॐकारः अहं।
खे आकाशे शब्दः तन्मात्ररूपः अहं। नृषु पुंसु पौरुषं उद्यमः अहं।८ किंच। पुण्यो
गंधः पृथिव्यां च तेजश्चास्मि विभावसौ। जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु।९ पुनः
पृथिव्यां पुण्यः सुरभिः गंधः स्वाभाविकः गंधः गंधतन्मात्रं स अहं। पुनः विभावसौ वै-
श्वानरे तेजः दीप्तिः अहम् अस्मि। सर्वभूतेषु जीवनं प्राणधारणं आयुः स अहं। तपस्विषु
शीतोष्णादिद्वंद्वसहनरूपं तपः अहं।९ किंच। बीजं मां सर्वभूतानां विद्धि पार्थ सना-
तनं। बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं।१० हे पार्थ सनातनं नित्यं मां सर्वभू-
तानां सर्वेषु चराचराणां भूतानां बीजं सजातीयसजातीयकार्योत्पादनसा-
मर्थ्यं विद्धि। बुद्धिमतां बुद्धिः अंतःकरणस्य विवेकशक्तिः अहं। तेजस्विनां तेजः
प्रागल्भ्यं अहं।।१० किंच। बलं बलवतां चाहं कामरागविवर्जितं। धर्मा- ७७

×११ हे भरतर्षभ।

विरुद्धो भूतेषु कामोऽस्मि भरतर्षभ।(११) पुनः बलवतां तेजस्विनां कामरागविवर्जितं बलं
तेजः सामर्थ्यं अहं। भूतेषु धर्माविरुद्धः शास्त्रार्थाविरुद्धः यः कामः अभिलाषः स अहं।११
किंच। ये चैव सात्विका भावा राजसास्तामसाश्च ये। मत्त एवेति तान्विद्धि न त्वहं तेषु
ते मयि।१२ पुनः ये अन्येऽपि सात्विका भावाः सत्वनिष्पन्नाः शमदमादयः। तथा राजसाः
रजोगुणनिष्पन्नाः हर्षदर्पादयः। तथा तामसाः तमोगुणनिष्पन्नाः शोकमोहादयः
तान् मत्त एव विद्धि। तथापि अहं न तेषु वर्त्ते। न तदधीनः। ते पुनः मयि। मदधी-
नाः।१२ एवंभूतं मां परमेश्वरं अयं जनः किमिति न जानाति इत्यत्राह। त्रि-
भिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः प-
रमव्ययं।१३ इदं सर्वं जगत् गुणमयैः गुणविकारैः रागद्वेषादिप्रकारैः। एवं त्रि-
भिर्भावैः मोहितं मां एभ्यो यथोक्तेभ्यः गुणेभ्यः परं पृथग्भूतं। अव्ययं

मं

अभ्यादिषड्भावरहितं न अभिजानाति ॥१३ कथं पुनः एतां त्रिगुणात्मिकां वैष्णवीं मायां अतिक्रा
मंतीति इति तं प्रकारमाह ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यंते मा
यामेतां तरंति ते ॥१४ हि यस्मात् मम एषा दैवी पारमेश्वरी गुणमयी गुणत्रयात्मिका माया
दुरत्यया दुःखेन अतिक्रमणं यस्याः सा ॥ ये सर्वधर्मान् परित्यज्य मां एवं मायाविनं स्वात्म
भूतं सर्वात्मना प्रपद्यंते । ते एतां सर्वभूतमोहिनीं मायां अतिक्रमंति संसारबंधना
न्मुच्यंते इत्यर्थः ॥१४ यदि त्वां प्रपन्नाः एतां मायां तरंति तर्हि कस्मात् त्वामेव सर्वे न
प्रपद्यंते इत्यत्राह ॥ ॥ न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः ॥ माययापहृ
तज्ञाना आसुरं भावमाश्रिताः ॥१५ नराधमाः दुष्कृतिनः पापकारिणः मूढाः माय
यापहृतज्ञानाः आसुरं भावं हिंसानृतादिलक्षणं आश्रिताः मां परमेश्वरं न ७८
प्रपद्यंते ॥१५ ये पुनः सुकृतिनो भजंति तेषां चातुर्विध्यमाह ॥ ॥ चतुर्विधा भ

जंते मां जनाः सुकृतिनोऽर्जुन ॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥१६ हे अर्जुन सुकृतिनः
चतुर्विधाः सुकृतिनो नरोत्तमाः जनाः मां भजंते हे भरतर्षभ तान् निबोध आर्तो हि आर्तः ।
आधिदैवतादितापत्रयपरिभूतः । जिज्ञासुः आत्मस्वरूपं ज्ञातुं इच्छुः । अर्थार्थी धनकामः । ज्ञा
नी विष्णोस्तत्त्ववित् ॥१६ तेषां मध्ये ज्ञानी श्रेष्ठ इत्याह ॥ तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशि
ष्यते प्रियो हि ज्ञानी श्रेष्ठ इत्याह ॥ तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशिष्यते प्रियो हि ज्ञा
निनोऽत्यर्थमहं स च मम प्रियः ॥१७ तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित् नित्ययुक्तः सदा तत्परः मय्ये
कभक्तिः विशिष्यते अधिको भवति हि यस्मात् अहं ज्ञानिनः आत्मा । तस्मात् अतएव अत्य
र्थं प्रियः । स च ज्ञानी मम आत्मा । इति मम अत्यर्थं प्रियः ॥१७ ज्ञानिनः भगवत्प्रियत्व
प्रतिपादनेन इतरेषां त्रयाणां तदप्रियत्वं प्राप्तं निराकरोति ॥ उदाराः सर्व एवै
ते ज्ञानी त्वात्मैव मे मतं ॥ आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिं ॥१८ एते सर्वे

त्रयोपि उदाराः उत्कृष्टाः। मम प्रिया एव। नहि कश्चिन्मद्भक्तो ममाप्रियो भवति। ज्ञानी तु
अत्यर्थं मम प्रियो भवति विशेषः। तत्कस्मादित्याह। ज्ञानी तु आत्मैव नान्यो मत्तः। इति मे मम
मतं निश्चयः। हि यस्मात् सदा ज्ञानी आस्थितः आरूढः अहमेव भगवान् वासुदेवो नान्यो
स्मीत्येवं स युक्तात्मा समाहितचित्तः सन् मामेव परं ब्रह्म गंतव्यं उत्तमां गतिं गंतुं प्रवृत्त इ
त्यर्थः॥१८॥ ज्ञानिनं पुनरपि स्तौति॥ बहूनां जन्मनामंते ज्ञानवान् मां प्रपद्यते। वासुदे
वः सर्वमिति स महात्मा सुदुर्लभः॥१९॥ ज्ञानवान् प्राप्तपरिपक्वज्ञानः बहूनां जन्मनां अंते ब
हुजन्मोपार्जिताभ्यासज्ञानसंस्कारात् अंते समाप्तौ मां वासुदेवः सर्वमिति प्रतिपद्यते स महा
त्मा दुर्लभः। तत्समोऽन्यः अधिको नास्ति॥१९॥ यतः आत्मैव सर्वं वासुदेव इत्येवं अप्रति
पत्तौ कारणमाह। कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः। तं तं नियम ७७
मास्थाय प्रकृत्या नियताः स्वया॥ स्वया आत्मीयया प्रकृत्या स्वभावेन जन्मां

जन्मांतरार्जितसंस्कारविशेषेण नियता नियमिताः देवताराधने न्यायः प्रसिद्धः। तं तं
नियमं आस्थाय आश्रित्य तैः तैः कामैः पुत्रपश्वादिस्वर्गविषयैः हृतज्ञानाः अपहृ
तविवेकज्ञानाः अन्यदेवताः प्रपद्यंते प्राप्नुवंति॥२०॥ तेषां सकामिनां॥ यो यो
यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं॥२१॥
यो यः कामी यां यां देवतातनुं श्रद्धायुक्तः भक्तः सन् अर्चितुं इच्छति। तस्य तस्य कामिनः तां
अचलां स्थिरां श्रद्धां तामेव विदधामि स्थिरीकरोमि॥२१॥ ततो यद्भवति तदाह॥ स तया श्रद्धया युक्तः
तस्याराधनमीहते लभते च ततः कामान् मयैव विहितान् हितान्॥ सकामी तया मद्विहित
या श्रद्धया युक्तः तस्याः देवतातनोः आराधनमुपासितुं ईहते चेष्टते। ततस्तस्याः देवतात
नोः सकाशात् ईप्सितान् हितान् कामान् मयैव विहितान् निर्मितान् लभते॥२२॥
तेषां कामिनां फलं स्यात् इत्याह॥ अंतवत्तु फलं तेषां तद्भवत्यल्पमे

यसां। देवानृ देवयजो यांति मद्भक्ता यांति मामपि।२३। पुनः तेषां अल्पमेधसां अल्पप्रज्ञानां
तत्फलं अंतवत् विनाशि भवति। देवयजः देवान् यजंतीति देवयजः। देवान् यांति प्रा
प्नुवंति। एवं समाने आयासे अनंतफलाय मामेव न प्रपद्यंते। अहो खलु कष्टं वर्त्तते।
इति अनुक्रोशं दर्शयति भगवान्।२३। किंनिमित्तं मामेव न प्रपद्यंते इत्यत्राह॥ अ
व्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः। परं भावमजानंतो ममाव्ययमनुत्तमं।२४
२४ अबुद्धयः मां अव्यक्तं अस्पष्टं संसारातीतं संतं स्थावरजंगमादि व्यक्तिं स्पष्ट
तां आपन्नं प्राप्तं मन्यंते जानंते। मां ईश्वरमपि संतं मम परं भावं परमात्मस्व
रूपं अव्ययं व्ययरहितं अनुत्तमं निरतिशयं भावं अजानंतः जनाः व्यर्थाः। ८०
२४ तदज्ञाने किंनिमित्तमित्यत्राह॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः। मू
ढोयं नाभिजानाति लोको माम अजमव्ययं।२५ अहं योगमायासमावृतः।

गुणत्रयघटनं योगः। सैव माया तया समावृतो सर्वलोकस्य प्रकाशो दृश्यो न। किंतु। कस्यचि
त् मद्भक्तस्यैव। अतएव अयं मूढो लोकः मां अजं अव्ययं नाभिजानाति।२५ मदीया माया मदी
यज्ञाने न प्रतिबध्नाति। अपि च मायाविन इव इत्याह॥ वेदाहं समतीतानि
वर्त्तमानानि चार्जुन। भविष्याणि च भूतानि मां तु वेद न कश्चन।२६ हे अर्जुन अहं भू
तानि ब्रह्मादि स्थावरांतानि समतीतानि समतिक्रांतानि तथा वर्त्तमानानि भवि
ष्याणि च वेद। जानामि। तु पुनः मद्भक्तं विना कश्चित् मां न वेद।२६ कानि कानि पुनः प
रत्वेन वेदनप्रतिबंधे न प्रतिबध्नंति। जायमानानि सर्वभूतानि मां न विदंतीत्यपेक्षा
यामभिदमाह॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत। सर्वभूतानि संमोहं सर्गे
यांति परंतप।२७ हे भारत परंतप सर्गे उत्पत्तिकाले सर्वभूतानि इच्छाद्वेषसमुत्थेन द्वं
द्वमोहेन इष्टे वस्तुनि अभिलाषः इच्छा। अनिष्टे वस्तुनि विरागः द्वेषः। तौ इच्छाद्वेषौ।

द्वंद्वशब्दवाच्यौ तज्जनितेन मोहेन आत्मज्ञानप्रतिबंधकेन अविवेकेन संमोहं यांति मोहं प्राप्नु-
वंति। तेन मां न जानंति।२७ के पुनः अनेन द्वंद्वमोहेन निर्मुक्ताः संतः त्वां विदित्वा यथाशा-
स्त्रमात्मतावेन भजंत इति अपेक्षितेऽर्थे दर्शयितुमाह॥ येषां त्वंतगतं पापं जना- येषां चंतगते पापं पाठः
नां पुण्यकर्मणां। ते द्वंद्वमोहनिर्मुक्ताः भजंते मां दृढव्रताः।२८ पुनः येषां पुण्यकर्म-
णां जनानां पापं अंतगतं क्षयं प्राप्तं भवति। ते पूर्वोक्तेन द्वंद्वमोहेन निर्मुक्ताः दृढव्रताः। दृढं
निश्चितं परमार्थतत्त्वविषयं व्रतं ज्ञानं येषां ते मां परमात्मानं भजंते।२८ ते किमर्थं भजं-
त इत्याह। जरामरणमोक्षाय मामाश्रित्य यतंति ये। ते ब्रह्म तद्विदुः कृत्स्न-
मध्यात्मं कर्म चाखिलं।२९ ये मां आश्रित्य म(त्स)मर्पितचित्ताः संतो जरामरण- ८१
मोक्षार्थं यतंति प्रयत्नं कुर्वंति। ते मत्परं ब्रह्म तत् कृत्स्नं समग्रं विदुः। यत् अध्यात्मं
प्रत्यगात्मविषयं वस्तु तदपि समग्रं विदुः। कर्म च अखिलं समस्तं तत्साधनभूतं

तं रहस्यं विदुः।२९ उत्तराध्यायस्य बीजं प्रक्षिपति॥ साधिभूताधिदैवं मां साधियज्ञं च
ये विदुः। प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः।३० ये मां साधिभूताधिदैवं अधिभूतं च
अधिदैवतं च अधिभूताधिदैवं सह तेन वर्तत इति साधिभूताधिदैवं। साधियज्ञं। अधियज्ञे-
न सह वर्तत इति साधियज्ञं जानंति ते युक्तचेतसः समाहितचेतसः। प्रयाणकाले मरण-
कालेऽपि मां विदुः। तेषां अतिवेदनापीडितानामपि चित्ते आगच्छामि।३० इति श्रीभगवद्गी-
ताभाष्ये ज्ञानयोगो नाम सप्तमोऽध्यायः। पूर्वाध्याये ते ब्रह्म तद्विदुः कृत्स्नमि-
त्यादिना भगवता अर्जुनस्य प्रश्नबीजानि उपन्यस्तानि अतः तत्प्रश्नार्थी अर्जुन
उवाच॥ अर्जुन उ०॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम। अधिभूतं च किं प्रोक्तमधि-
दैवं किमुच्यते।१ हे पुरुषोत्तम। तद्ब्रह्म किं। तत् अध्यात्मं किं। कर्म किं। अपरं अधिभूतं किं प्रोक्तं।

अधिदैवं किमुच्यते॥१॥ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन। प्रयाणकाले च कथं ज्ञेयोऽसि
नियतात्मभिः॥२॥ हे मधुसूदन अत्र देहे कः अस्मिन् कथं अधियज्ञः च अपरं प्रयाणकाले च नियता
त्मभिः कथं ज्ञेयोऽसि॥२॥ एषां प्रश्नानां यथाक्रमं निर्णयाय भगवानुवाच॥ श्रीभगवानु
वाच॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते। भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥३॥ हे
हे अर्जुन परमं अक्षरं परमात्मा ब्रह्म स्वभावः तस्य ब्रह्मणः प्रतिदेहं स्वकीय आत्मभावः स्व
भावः अध्यात्ममुच्यते आत्मानं देहं अधिकृत्य स्वात्मतया प्रवृत्तं चैतन्यं अध्यात्मं भूत
भावोद्भवकरः प्राणिनां देहोत्पत्तिकरः विसर्गः देवतोद्देशेन पुरोडाशादिद्रव्यस्य उत्स
र्गः कर्मसंज्ञितः॥३॥ किं च॥ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्। अधियज्ञोऽहमेवा
त्र देहे देहभृतां वर॥४॥ हे देहभृतां वर क्षरो भावः विनाशी भावः अधिभूतं प्राणि ८२
जातं अधिभवतीति अधिभूतं च पुनः पुरुषः आदित्यान्तर्गतो हिरण्यगर्भः सर्वव्यापकः

अधिदैवतं अत्र अस्मिन् देहे अधियज्ञः सर्वयज्ञाभिमानिनी देवता विष्णुरूपा सा अहं॥
४ अंतकाले च कथं ज्ञेयोऽसीति प्रश्नस्य उत्तरं तत्काले ज्ञानोपायं फलं च दर्शयन्नाह॥ ॥
अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरं। यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥५॥
अर्जुनः यः अंतकाले मरणकाले मामेव स्मरन् कलेवरं मुक्त्वा प्रयाति स मद्भावं विष्णुवत्त्वं च
याति। अत्र संशयो नास्ति। न केवलं मामेव स्मरन् मद्भावं प्राप्नोतीति नियमः किं तर्हि अ
न्यामपि देवतां स्मरन् अयं नियमः समानः इत्याह॥ यं यं वापि स्मरन्भावं त्यजत्यन्ते कले
वरं। तं तमेवैति कौन्तेय सदा तद्भावभावितः॥६॥ हे कौन्तेय अपि वा अंते मरणकाले यं यं भावं दे
वताविशेषं स्मरन् कलेवरं देहं त्यजति सदा तद्भावभावितः तस्मिन् भावः तद्भावः स भा
वितो येन असौ तद्भावभावितः तद्ध्यानया वासितः सन् तं तं देवताविशेषं एति प्राप्नो
ति॥६॥ यस्मात् अंत्या भावना देहांतरप्राप्तौ कारणं न च पूर्वाभ्यासमंतरेण त

दनी चित्तस्याविवशत्वात् स्वाभाविकभावनाभ्यां भवति तस्मात् सर्वदा विष्णुभावनैव कर्तव्येत्याह ॥
॥ तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च । मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७
यस्मादेवं तस्मात् सर्वेषु कालेषु यावज्जीवं यथाशास्त्रं माम् अनुस्मर यथाप्रशास्त्रं युध्य च युद्धं स्व
धर्मं कुरु । मयि परमेश्वरे अर्पिते मनोबुद्धी यस्य स त्वं एवंविधः सन् मामेव यथास्मृतं आगमि
ष्यसि । असंशयः संशयोऽत्र न विद्यते ॥ ७ ॥ मम तु पुरुषार्थं सूतायाः दृढायाः अंत्यभावना
याः अभ्यासः एव कारणमित्याह ॥ अभ्यास(योग) योगयुक्तेन चेतसा नान्य
गामिना । परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥ हे पार्थ अभ्यासयोगयुक्तेन
मद्विषयो यः अनंतर ज्ञानप्रवाहो अभ्यासः स एव योगः तेन युक्तेन चेतसा तेन अभ्यास
योगयुक्तेन चेतसा नान्यगामिना । अन्यत्र विषयांतरे गमनरहितेन । अनुचिंत ८३
यन् शास्त्राचार्योपदेशं अनुध्यायन् परमं निरतिशयं दिविसूर्यमंडले भवं दि
व्यं पुरुषं याति प्राप्नोति ॥ ८ ॥ तमेव पुरुषं विशेषतो दर्शयति । कविं पुराण

मनुशासितारमणोरणीयांसमनुस्मरेद्यः । सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं
तमसः परस्तात् ॥ ९ ॥ यः पुरुषं चिंतनं कविं सर्वज्ञं अनुशासितारं अणोः सूक्ष्मादपि अ
णीयांसं सूक्ष्मतरं सर्वस्य कर्मफलजातस्य धातारं विचित्रतया प्राणिभ्यो विभक्तारं अचिंत्य
रूपं विद्यमानमपि रूपं केनचित् चिंतयितुमशक्यं यस्य तं । आदित्यस्येव नित्यचैतन्यप्रका
शो वर्णो यस्य तं आदित्यवर्णं । तमसः अज्ञानलक्षणात् मोहांधकारात् परस्तात् परत्र
वर्तमानं समनुचिंतयेत् तं परमपुरुषार्थप्राप्तिनिमित्तं सत्यभावनायाः प्रकारविशेषमा
ह ॥ प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव । भ्रुवोर्मध्ये प्राणमावेश्य युक्तः
सम्यक् स तं परं पुरुषमुपैति दिव्यं ॥ १० ॥ किंच । स ज्ञानी योगी भक्त्या अनन्यभक्त्या युक्तः प्रया
णकाले मरणकाले अचलेन चलनवर्जितेन मनसा चेतसा योगबलेन युक्तः । योग
समाधिः तस्य बलं तज्जनितसंस्कारजन्यं चित्तस्थैर्यलक्षणं योगबलं तेन च युक्तः भ्रुवो
र्मध्ये प्राणमावेश्य पूर्वं हृदयपुंडरीके वशीकृत्य ततः ऊर्ध्वगामिन्या नाड्या
स्थिर

र्भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणवायुं आवेश्य स्थापयित्वा सम्यक् अप्रमत्तः सन् कविं पु
राणमित्यादिलक्षणं तं दिव्यं परं पुरुषं उपैति प्राप्नोति।१०। पुनरपि वक्ष्यमाणेनोपाये
न प्रतिपित्सितस्य ब्रह्मणो विशेषणांतरविशिष्टं स्वरूपं निरूपयति। यदक्षरं वेद
विदो वदंति विशंति यद्यतयो वीतरागाः। यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहे
ण प्रवक्ष्ये।११। वेदविदः वेदार्थज्ञाः यत् अक्षरं अविनाशि वदंति। विगतरागाः सं
न्यासिनो यतयः यत् अक्षरं विशंति। यच्च अक्षरं ज्ञातुं इच्छंतः गुरौ ब्रह्मचर्यं
चरंति तत् अक्षराख्यं पदं प्राप्यं ते तुभ्यं संग्रहेण संक्षेपेण प्रवक्ष्ये।११।
इदानीं मंदमध्यबुद्धीनां कविं पुराणं यदक्षरमि त्यादिना पूर्वोक्तं परब्र
ह्म प्रतिपत्तुं अशक्तानां अक्षतौ तत्प्राप्तिसाधन त्वेनोक्तं कालांतरमुक्ति ८४
फलं योगधारणासहितं ॐकारस्य उपासनं प्रतिपादयितुं प्रसक्तानुप्रसक्तं च

किंचिदुक्तं उत्तरश्लोकैः अथ आरभ्यते। ॥सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च। मूर्ध्न्या
धायात्मनः प्राणमास्थितो योगधारणां।१२। सर्वद्वाराणि इंद्रियोपलब्धिद्वाराणि सर्वेंद्रि
याणि संयम्य नियमनं कृत्वा मनः हृदि हृदयपुंडरीके निरुध्य तन्निर्व्यापारं कृत्वा
आत्मनः प्राणं प्राणवायुं हृदयात् ऊर्ध्वगामिन्या नाड्या ऊर्ध्वं आकृष्य मूर्ध्नि आधा
य योगधारणां धारयितुं आस्थितः प्रवृत्तः सन्।१२। किंच॥ ॐमित्येकाक्षरं ब्रह्म
व्याहरन् मामनुस्मरन्। यः प्रयाति त्यजन् देहं स याति परमां गतिं।१३। ॐमित्येका
क्षरं प्रणवं ब्रह्मवाचकं व्याहरन् उच्चारयन् तदर्थभूतं मां ईश्वरं अनुचिंतयन्
देहं त्यजन् प्रयाति म्रियते। स परमां प्रकृष्टां गतिं याति।१३। अनन्यचेताः स
ततं यो मां स्मरति नित्यशः। तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः। योगिनः॥१४
हे पार्थ यः सततं निरंतरं अनन्यचेताः न अन्यविषये चेतो यस्य स

अनन्यचेताः मां परमेश्वरं नित्यशः दीर्घकालं यावज्जीवं स्मरति। तस्य योगिनः नित्य
युक्तस्य समाहितचित्तस्य अहं सुलभः सुप्रापः॥१४ भगवत्प्राप्तौ लब्धेन यत्
भवति तदाह॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवंति महात्मानः सं
सिद्धिं परमां गताः॥१५ महात्मानो यतयः परमां प्रकृष्टां संसिद्धिं मोक्षाख्यां गताः प्राप्ताः
मां ईश्वरं उपेत्य मद्भावं आपद्य दुःखालयं दुःखानां आध्यात्मिकादीनां आलयं आश्रयं
अशाश्वतं अनित्यं जन्म तादृशं पुनर्न आप्नुवंति।१५ सर्वेषु कालेषु पुनरावृत्तिं दर्श
यन् तमेव अर्थं द्रढयति॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन। मामु
पेत्य तु कौंतेय पुनर्जन्म न विद्यते॥१६ हे अर्जुन सर्वे लोकाः आब्रह्मभुवनात् सह
ब्रह्मभुवनेन पुनरावर्तिनः पुनरावर्तनस्वभावाः। तु पुनः हे कौंतेय ८५
मामकं उपेत्य पुनर्जन्म पुनरुत्पत्तिर्न विद्यते।१६ ब्रह्मलोकपर्यंतानां कालपरिच्छिन्न

त्वात् तत्रगतानां आवर्तते। भगवत्स्वरूपस्य कालास्पृष्टत्वात् तत्रगतानां आवर्तते इति विशेषं द
र्शयिष्यन् ब्रह्मणः अहोरात्रयोः प्रमाणमाह॥ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः।
रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः॥१७ यत् ब्रह्मणः प्रजापतेः विराजः सहस्रयुगपर्यं
तं सहस्रं युगानि पर्यंतः पर्यवसानं यस्य अह्नः तत् अहः सहस्रयुगपर्यंतं विदुः। ते जनाः
अहोरात्रविदः। ब्रह्मणोपि कालपरिच्छिन्नत्वात् पुनरावृत्तिरस्ति।१७ प्रजापतेः अहनि रात्रौ च यद्
भवति तदुच्यते॥ अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे। रात्र्यागमे प्रलीयंते तत्रैवा
व्यक्तसंज्ञके॥१८ सर्वाः व्यक्तयः स्थावरजंगमलक्षणाः प्रजाः अहरागमे ब्रह्मणः दिनादौ
अव्यक्तात् अव्याकृतात् ब्रह्मणः सुषुप्तावस्थारूपात् प्रभवंति। तथा रात्र्यागमे ब्रह्मणः
स्वापकाले तत्रैव पूर्वोक्ते अव्यक्तसंज्ञके प्रलीयंते लयं प्राप्नुवंति।१८ अविद्यादि
क्लेशमूलकर्माशयवशात् अवशः भूतग्रामः भूत्वा भूत्वा प्रलीयत इति उक्त्वा अकृताभ्याग

गमनं कृतविप्रणाश अकृताभ्यागम वारयन् संसार वैराग्यदर्शनाय सृष्टिप्रलयप्रवा
हस्य अविच्छेदमाह॥ भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते। रात्र्यागमेऽव
शः पार्थ प्रभवत्यहरागमे॥१९॥ हे पार्थ स एवायं भूतग्रामः भूतसंघः स्थावरजंगम
लक्षणः भूत्वा भूत्वा रात्र्यागमे अवशः अस्वतंत्रः प्रलीयते। अहरागमे पुनः प्र
भवति॥१९॥ एवं ब्रह्मणः उभिन्नैकाहरमित्यादिना प्राप्युपायो दर्शितः। इदानीं त
स्य स्वरूपमाह। लोकानामनित्यत्वं प्रपंच्य स्वस्वरूपस्य नित्यत्वं प्रपंचयति। परइ
ति द्वाभ्यां॥ परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः। यः स स
र्वेषु भूतेषु नश्यत्सु न विनश्यति॥२०॥ पुनः तस्मात् पूर्वोक्तात् अव्यक्तात् परः
प्रकृष्टः सनातनः चिरंतनः अव्यक्तो इंद्रियागोचरः भावो अक्षराख्यं ब्रह्म अ
न्यः विलक्षणः यः स सर्वेषु ब्रह्मादिस्थावरांतेषु नश्यत्सु न विनश्यति॥ ८६
२० अविनाशे प्रमाणं दर्शयन्नाह॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः पर

मां गतिं। यं प्राप्य न निवर्तंते तद्धाम परमं मम॥२१॥ योऽसौ अव्यक्तः अक्षरः इत्युक्तः।
तं अक्षरं स्वं इं परां प्रकृष्टां गतिं आहुः। यं अक्षरं प्राप्य संसाराय न निवर्तंते।
तद्धाम स्थानं परमं प्रकृष्टं मम विष्णोः पदं॥२१॥ तत्प्राप्तौ उपायमाह॥ पुरुषः
स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यांतःस्थानि भूतानि येन सर्वमिदं ततं॥२२॥
पुनः स परः निरतिशयः पुरुषः पूर्णः अनन्यया आत्मविषयया भक्त्या ज्ञानल
क्षणया लभ्यः। यस्य कारणरूपस्य अंतःस्थानि मध्यस्थितानि भूतानि कार्यरूपाणि
मृदि घट इव। येन सर्वं इदं जगत् व्याप्तं। यथा सुवर्णेन कंकणादिकार्यं व्याप्यते॥२२॥ प्रण
वलक्षण सगुणब्रह्मोपासकाः क्रमेण कालांतरमुक्तिभाजो नावर्तंते। तेषां ब्रह्मप्राप्तये
अनावृत्तिरुत्तरमार्गो वक्तव्यः। ततस्तु त्यर्थं इतरेषां केवलकर्मिणां आवृत्तियु
क्तो दक्षिणमार्गो वक्तव्यः। इति मार्गद्वयं वक्तुं प्रतिज्ञां करोति॥ यत्र काले त्व
नावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ॥२३॥

ह भरतर्षभ अपुनः योगिनः सगुणब्रह्मोपासकाः यस्मिन् कर्मिणश्च यत्र काले प्र
याताः मृताः अपुनरावृत्तिं यांति। यत्र च काले मृताः पुनरावृत्तिं प्राप्नुवंति। तं कालं
क्रमेण वक्ष्यामि॥२३ तत्र अनावृत्तिं उत्तरमार्गं आह। अग्निर्ज्योतिरहः शुक्लः षण्मा
सा उत्तरायणं। तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः॥२४ ब्रह्मविदः सगु
ण ब्रह्मोपासकाः इमं देहं त्यक्त्वा अग्निदेवतां प्राप्य ततो ज्योतिर्देवतां ततो अह
र्देवतां ततः उत्तरायणदेवतां तदनंतरं शुक्लपक्ष अवशिष्टाः अष्टौ देवताः
क्रमेण प्राप्य अंत्यायां विद्युद्देवतायां प्राप्तायां तत्र मानवः पुरुषः तान् नीत्वा
हिरण्यगर्भलोकं नयति। ततः ते ब्रह्मणा सह मुच्यंते न पुनरावर्तंते॥ अ
यं च उद्दिश्य पर्व उत्तरो मार्गः॥२४ दक्षिणं मार्गमाह धूमो रात्रि ८७
स्तथा कृष्णः षण्मासा दक्षिणायनं। तत्र चांद्रमसं ज्योतिः योगी प्राप्य निवर्तते॥२५

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन। तस्मात् सर्वेषु कालेषु योगयुक्तो भवा
र्जुन॥२७ हे पार्थ एते यथोक्ते सृती मार्गौ एकः शुक्लो मोक्षाय। अपरः कृष्णः संसा
राय इति जानन् कश्चिदपि योगी न मुह्यति। हे अर्जुन तस्मात् सर्वेषु कालेषु सर्वदा
योगयुक्तः आत्मनिष्ठः समाहितो भव॥२७ अथ अध्यायार्थं अष्टमप्रश्नार्थं निर्णयं च योगस्य
फलं उपसंहरति॥ वेदेषु यज्ञेषु तपस्सु चैव दानेषु च यत्पुण्यफलं प्रदिष्टं। अ
त्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं॥२८ वेदेषु सम्यक् अधी
तेषु यज्ञेषु यथावत् अनुष्ठितेषु तपःसु सुतप्तेषु दानेषु सम्यक् दत्तेषु यत्
पुण्यफलं प्रदिष्टं भवति। योगी तत् इदं सर्वं दक्षिणोत्तरमार्गस्वरूपं सप्तप्रश्न
निर्णयद्वारेण विदित्वा ज्ञात्वा अनुष्ठाय अत्येति अतिक्रम्य गच्छति। पुनः परम् ८८
उत्कृष्टं ऐश्वरं स्थानं आद्यं आदौ भवं कारणं ब्रह्म उपैति प्रतिपद्यते॥२८ इति
श्रीभगवद्गीताभाष्ये उत्कर्षत्यागो नाम अष्टमोऽध्यायः॥८ संवत् १५

तथा योगी कर्मयोगी केवलकर्मी इदं शरीरं त्यक्त्वा धूमाभिमानिनीं देवतां प्राप्य ततः रात्र्य
भिमानिनीं देवतां ततः कृष्णपक्षदेवतां ततः षण्मासदेवतां ततः अयनकं अन्यां अ
न्यां देवतां क्रमेण प्राप्य चंद्रलोकं गत्वा तत्र कर्मफलं भोगान् भुक्त्वा तस्य कर्मणः क्षी
ते पर्जन्यपृथ्वीपुरुषयोषितः क्रमेण पुनरावर्तते ॥ २५ ॥ उक्तौ दक्षिणोत्तरमार्गौ उपसंह
रति ॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते । एकया यात्यनावृत्तिमन्ययावर्त
ते पुनः ॥ २६ ॥ दक्षिणोत्तरे शुक्लकृष्णे ज्ञानप्रकाशयुक्तत्वात् एका शुक्ला उत्तरा तद
भावात् अपरा कृष्णा दक्षिणा । एते उभे जगत इति ज्ञानकर्मणोः अधिकृतानां
न सर्वस्य जगतः । गती मार्गौ शाश्वते नित्ये । ब्रह्मज्ञानपर्यंतं जगतो नित्यत्वात् अ
भिमानिन्यौ मते अभिप्रेते । अनयोः गत्योः एकया शुक्लया अनावृत्तिं याति ।
अन्यया कृष्णया पुनः आवर्तते ॥ २६ ॥ मार्गज्ञानफलं दर्शयन् भक्तियोगं उपसंहरति ।

अष्टमे नाडीद्वारेण धारणया सगुणं उपासनमुक्तं । तस्य च अर्चिर्ज्योतिरादिमार्गेण ब्र
ह्मलोकं प्राप्य कालांतरे परब्रह्मप्राप्तिलक्षणं अनावृत्तिरूपं फलं उक्तं । इदानीं नव
मे साक्षात् मुक्तिसाधनं निर्गुणब्रह्मस्वरूपज्ञानं भगवान् उपदिशति ॥ श्री
भगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे । ज्ञानं विज्ञानसहितं
यत् ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥ तु पुनः इदं पूर्वोक्तं वक्ष्यमाणं च गुह्यतमं गोप्यतमं
ज्ञानं श्रुतिशास्त्रजनितं ब्रह्मज्ञानं विज्ञानसहितं ब्रह्मविषयसाक्षात्कारसं
हितं ब्रह्मानुभवसहितं । ते तुभ्यं अनसूयवे असूयारहिताय प्रवक्ष्यामि
कथयिष्यामि । यत् शास्त्रजनितं अनुभवसहितं ज्ञानं ज्ञात्वा अशुभात् संसा
रबंधनात् मोक्ष्यसे । तुशब्दः सूचितं एतत् ज्ञानगतं विशिष्टमाह ॥ राजवि
द्या राजगुह्यं पवित्रमिदमुत्तमं । प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं ॥ २

अव्यय फलमतिसुलभमपि एतत् ४

इदं ज्ञानं किं लक्षणं। राजविद्या विद्यानां राजा राजविद्या। ज्ञानं। गुह्यानां गोप्यानां
राजा राजगुह्यं। पावनानामपि पावनं उत्तमं। पवित्रं प्रत्यक्षेण सुखादिवत् ज्ञातुं श
क्यं। धर्मादनपेतं धर्म्यं कर्तुं सुसुखं सुखसंपाद्यं। अविनाशि फलत्वात् अव्ययं २
९ एतस्य ज्ञानाय न प्रभवंतीत्याह॥ अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप। अप्रा
प्य मां निवर्तंते मृत्युसंसारवर्त्मनि हे परंतप अस्य ज्ञानधर्मस्य स्वस्वरूपे फलेच
अश्रद्दधानाः श्रद्धारहिताः पुरुषाः मां अप्राप्य मम किंचिन्मात्रमपि अप्राप्य मृत्यु
संसारवर्त्मनि। मृत्युयुक्तः संसारः तस्य वर्त्म मार्गः नरकादिप्राप्तिः तस्मिन् निवर्तं
ते आवर्तंते। ३ एवं ज्ञानस्तुत्या अर्जुनं अभिमुखीकृत्य तदेव ज्ञानमाह॥ मयात
तमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥४ इदं स २९
र्वं जगत् अव्यक्तमूर्तिना इंद्रियागोचरस्वरूपेण मया परमात्मस्वरूपेण ततं व्याप्तं।
सर्वाणि भूतानि ब्रह्मादिस्थावरांतानि मत्स्थानि मयि स्थितानि पुनः अहं निरवयव

वात् असंगत्वाच्च तेषु स्वरूपेण न अवस्थितः॥४ असंगत्वात् मम आत्मनः मत्स्था
नि तु ममपि कार्याणि कथमेवेत्याह॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥५ तथापुनः न मत्स्थानि भूतानि अत
एव असंगत्वात् न मयि स्थितानि। मम ऐश्वरं योगं आत्मनो याथात्म्यं पश्य। मम
आत्मा भूतभृत् असंगोपि भूतानि धारयति। असंगत्वात् न भूतस्थः भूतभावन
भूतानां उत्पादयिता। ५ श्लोकद्वयेनोक्तं अर्थं दृष्टांतेनोपपादयन्नाह। यथा
काशस्थितो नित्यं वायुः सर्वत्रगो महान्। तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥६ य
था महान् महत्परिमाणः सर्वत्रगो वायुः नित्यं सर्वदा आकाशं अस्पृशन्। आकाशस्थि
तः। तथा सर्वाणि भूतानि मत्स्थानि मयि स्थितानि मां न स्पृशंति। इति उपधारय जानीहि ६
तदेवं असंगस्यैव यथा योगमायास्थितिहेतुत्वं अपि आह॥ सर्वभूतानि

१४ एवं सृष्टिहेतुत्वं॥१

कौंतेय प्रकृतिं यांति मामिकां। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं॥७ हे कौंतेय कल्प
क्षये सर्वभूतानि ब्रह्मादिस्थावरांतानि मामिकां मदीयां त्रिगुणात्मिकां अपरां प्रकृतिं यांति
कल्पादौ पुनः तानि अहं विसृजामि॥७ ननु असंगस्य निर्विकारस्य तव कथं सृष्ट्यादि
हेतुत्वं इत्यपेक्षायामाह॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृ
त्स्नमवशं प्रकृतेर्वशात्॥८ इमं कृत्स्नं भूतग्रामं भूतसमुदायं प्रकृतेर्वशात् अवशं
अस्वतंत्रं एवं अविद्यात्मकलां त्रिगुणात्मिकां स्वां प्रकृतिं अवष्टभ्य आश्रित्य पुनः
विसृजामि उत्पादयामि॥८ तर्हि एवं विषमं भूतग्रामं विदधतः तन्निमित्तधर्माधर्मसंबंधः
स्यात् इत्यत आह॥ न च मां तानि कर्माणि निबध्नंति धनंजय। उदासीनवदासीनमस
क्तं तेषु कर्मसु॥९ हे धनंजय च पुनः तानि विषमसृष्टिकृतानि कर्माणि मां न बध्नंति। ९०
तेषु कर्मसु असक्तं फलापेक्षारहितं उदासीनवत् आसीनं कर्तृत्वाभि जो मांम२

द्दितो। तत्र भूतग्राममिमं सृजामि उदासीनवदासीनं इति च विरुद्धं भवतीति तद्विरोध
परिहारार्थमाह॥ मयाध्यक्षेण प्रकृतिः सूयते सचराचरं। हेतुनानेन कौंतेय जगद्विप
रिवर्तते॥१० हे कौंतेय प्रकृतिः त्रिगुणात्मिका अविद्या माया स्वेतन्यरूपेण अविक्रियेण अध्यक्षेण
साक्षिणा सचराचरं जगत् सूयते उत्पादयति। अनेन अध्यक्षत्वेन निमित्तेन सचराचरं ज
गत् विपरिवर्तते। पुनः पुनः जायते॥१० एवं मां नित्यशुद्धबुद्धमुक्तस्वभावं सर्वजंतूनां आत्मानम
पि संतं केचित् दुरात्मानो नाद्रियंते इत्याह॥ अवजानंति मां मूढाः मानुषीं तनुमाश्रितं। परं भाव
मजानंतो मम भूतमहेश्वरं॥११ मूढाः अविवेकिनः मम भूतमहेश्वरं सर्वभूतानां महांतं ई
श्वरं प्रकृष्टं भावं परमात्मतत्त्वं अजानंतः मां मानुषीं तनुं मनुष्यदेहं आश्रितं अवजानंति। अव
जानंतीति॥११ कुतो नाद्रियंते इत्याह॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥१२ अत एव मोघाशाः स्यान्ति लोकाः पर

मेश्वरं अवगणय्य फलाशया कर्मणि प्रवृत्ताः अत एव फलदातारं अवगणनात् मोघकर्माणः
अत एव मोघज्ञानाः विचेतसः विगतविवेकाः राक्षसीं राक्षसीं आसुरीं च मोहिनीं मोहन
करीं प्रकृतिं स्वभावं देहात्मभावं आश्रिताः मां अवजानंतः अवगणयंति ।१२। ये पुनस्सु
दृष्टनाः भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः आदियं ते इत्याह ॥ महात्मान
स्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं ।१३। हे पा
र्थ पुनः महात्मानः अक्षुद्रचित्ताः दैवीं प्रकृतिं देवानां सत्त्वं शमदयाश्रद्धादि
लक्षणं आश्रिताः अनन्यमनसः संतः भूतादिं भूतानां आकाशादीनां आदिं
कारणं वाच्यादिं अव्ययं मां ज्ञात्वा भजंति ।१३। तेषां भजनप्रकारमाह ॥ सततं
सततं कीर्तयंतो मां यतंतश्च दृढव्रताः । नमस्यंतश्च मां भक्त्या नित्ययुक्ता [illegible] उपासते ।१४
१४ मां सततं कीर्तयंतः यतंतः इंद्रियनिग्रह शमदम दयाअहिंसादिधर्मैः

(च)
यतंतः यत्नं कुर्वंतः दृढव्रताः दृढं स्थिरं अचलं व्रतं येषां ते दृढव्रताः । पुनः मां नमस्यंतं
भक्त्या नित्ययुक्ताः मां हृदयेशयं आत्मानं उपासते सेवंते ।१४। किंच ॥ ज्ञानयज्ञेन
चाप्यन्ये यजंतो मामुपासते । एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं ।१५। पुनः अन्ये पि
ज्ञानयज्ञेन ज्ञानमेव भगवद्विषयं यज्ञः । तेन ज्ञानयज्ञेन मां पूजयंतः अन्ये उ
पासनां परित्यज्य मामेव ईश्वरं सेवंते । तत्र ज्ञानं एकत्वेन एकमेव परं ब्रह्मेति
परमार्थदर्शनेन उपासते । केचित् पृथक्त्वेन आदित्यचंद्रादिभेदेन । स एव भ
गवान् सर्वतोमुखो विश्वरूप इति तं विश्वरूपं सर्वतोमुखं बहुप्रकारेण उपासते ।१५।
कथं बहुधा मामेवोपासते इत्यत आह । अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं । मंत्रोह
महमेवाज्यमहमग्निरहं हुतं ।१६। क्रतुः श्रौतकर्म अहं यज्ञः स्मार्तः पंचय
ज्ञादिकं कर्म अहं । स्वधेति श्राद्धकरणं अन्नं पितृभ्यो दीयमानं अहं ॥ औषधं सर्व
सा दी

प्राणिभिः अद्यमानं अन्नं अहं। अथवा औषधं व्याध्युपशमनं। मंत्रो येन उद्दिश्य देवपितृन् हवि-
र्दीन साधनं। घृतं आज्यं हविः। अग्निः। हुतं हविः प्रक्षेपणलक्षणरूपं कर्म होमादिकं अहं।
१६ किंच। पिताऽहमस्य जगतो माता धाता पितामहः। वेद्यं पवित्रमोंकार ऋक्सा-
म यजुरेव च। १७ अस्य जगतः पिता माता धाता प्राणिनां कर्मफलस्य स्रष्टा पितामहः। ×किंच॥५
वेद्यं ज्ञातव्यं पवित्रं ओंकारः। ऋक् साम यजुरेव अहं। १७ गतिर्भर्ता प्रभुः साक्षी निवा-
सः शरणं सुहृत्। प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं। १८ गतिः कर्मफलं। भर्ता-
र्ता पोषणः। प्रभुः स्वामी। प्राणिनां कृताकृतस्य साक्षी। निवासः निवसंति यस्मिन् प्रा-
णिनः स आश्रयः। प्रपन्नानां आर्तिहरः शरणं। सुहृत् प्रत्युपकारनिरपेक्षः
सन् उपकारी। प्रभवः उत्पत्तिः सर्गः। प्रलीयते यस्मिन् विश्वमिति प्रलयः। तिष्ठत्यस्मिन् इ- ८२
ति स्थानं। निधानं निक्षेपः। कालान्तरोपभोग्यं प्राणिनां। बीजं प्ररोहकारणं। प्ररोहध-

×२ तपामि। किंच सूर्यरश्मिभिः अहं वर्षं ॥२ यं।

र्मिणां अव्ययं यावत्संसारं आवितात् अव्ययं बीजं इत्यर्थः। १८ किंच। तपाम्यहमहं व-
र्षं निगृह्णाम्युत्सृजामि च। अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन। १९ अहं आदित्यो भूत्वा तपे। कि-
तु उल्बणैः रश्मिभिः वर्षं निगृह्णामि। मासाष्टकं पृथ्वेन प्रावृषि किंचित् रश्मिभिः पुनः वर्षं उ-
त्सृजामि। अमृतं देवानां। मृत्युश्च मर्त्यानां। सत् विद्यमानं। असत् अविद्यमानं। अथवा सत्कारणं
असत्कार्यं अहं। १९ एवं पूर्वोक्तैः निवृत्तिप्रकारैः एकत्वपृथक्त्वादिविज्ञानैर्यज्ञैर्मां उपा-
सते। ते यथाविज्ञानं मामेव प्राप्नुवंति। ये पुनः अज्ञाः कामकामास्ते संसारमेवानुवर्त्तंति इ-
त्याह। त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते। ते पुण्यमासाद्य सु-
रेंद्रलोकमश्नंति दिव्यान्दिवि देवभोगान्। २० त्रयीधर्मं केवलं वैदिकं धर्मं आश्रिताः त्रै-
विद्याः सोमपाः सोमपायिनः पूतपापाः शुद्धकिल्बिषाः तेनैव सोमपानेन शुद्धकिल्बि-
षाः यज्ञैः अग्निष्टोमादिभिः मां वस्वादिरूपिणं इष्ट्वा पूजयित्वा स्वर्गगमनं प्रार्थयंते।

तेच पुण्यं पुण्यफलं सुरेंद्रलोकं शतक्रतोः स्थानं आसाद्य संप्राप्य दिवि स्वर्गे दिव्यान् अप्राकृतान् दे
वभोगान् अश्नंति भुंजते॥२०॥ किंच॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशं
ति। एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते॥२१॥ ते सोमपाः तं विशालं स्वर्गलोकं भुक्त्वा
पुण्ये क्षीणे मर्त्यलोकं विशंति। एवं यथोक्तप्रकारेण त्रयीधर्मं केवलं वैदिकं कर्म अनुप्रपन्नाः
आश्रिताः कामकामाः कामान् कामयंत इति कामकामाः गतागतं गमनागमनं लभंते। न
तु स्वातंत्र्यं मोक्षं लभंत इत्यर्थः॥२१॥ ये तु पुनर्निष्कामाः सम्यक्दर्शिनः ते मत्प्रसादात् कृतार्था भ
वंतीत्याह॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहा
म्यहं॥२२॥ ये जनाः अपृथग्भूताः परं देवं नारायणं आत्मत्वेन गताः संतः मां चिंतयंतः पर्युपास
ते अहं तेषां परमार्थदर्शिनां सततानित्ययोगिनां योगक्षेमं। योगः अप्राप्तस्य प्रापणं। क्षेमस्त
द्रक्षणं तदुभयं वहामि प्रापयामि॥२२॥ ननु अन्या अपि देवतास्त्वमेव तद्व्यतिरेकेण वस्तु ९३

तरस्य अभावात्। अतस्ते भक्ताः त्वामेव यजंत इति। कथं गतागतं लभंत इत्या
शंक्य भगवद्भजने समानेऽसमाने पि अज्ञानकृतं तेषां गतागतमित्याह॥ येप्यन्यदेव
ताभक्ता यजंते श्रद्धयान्विताः। तेपि मामेव कौंतेय यजंत्यविधिपूर्वकं॥२३॥ हे कौंतेय येऽ
पि अन्यदेवताभक्ताः अन्यास्तु देवतास्तु भक्ताः अन्यदेवताभक्ताः श्रद्धया आस्ति
क्यबुद्ध्या यजंति। तेपि अविधिपूर्वकं अज्ञानपूर्वकं मामेव यजंते। अहमेव सर्वदेव
ता इति न जानंति॥२३॥ कथं पुनः अन्यदेवताभक्ताः अज्ञानपूर्वकं यजंते इत्यत्र हेतु
माह॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानंति तत्त्वेना
तश्च्यवंति ते॥२४॥ हि यस्मात् अहं सर्वयज्ञानां श्रौतानां स्मार्तानां देवतारूपेण अहमे
व भोक्ता। च पुनः यज्ञानां प्रभुः स्वामी॥ अहं उभुनः ते मां तत्त्वेन याथात्म्येन न

५देवेषु'२

ता जंति। अतः कारणात् अज्ञानपूर्वं इष्ट्वा यागफलात् च्यवंते।२४ येपि अन्य देवता भक्ताः ते जाम
पि यागफलं अवश्यं भावी याद्द।   यांति देवव्रता देवान् पितॄन् यांति पितृव्रताः भूतानि
यांति भूतेज्या यांति मद्याजिनो पि मां।रत्ने देवव्रताः नियम भक्त्यादि व्रतयुक्ताः देवान्
यांति प्राप्नुवंति। पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः पितॄन् अग्निष्वात्तान् यांति
प्राप्नुवंति। भूतेज्याः भूतानां विनायक मातृगण चतुर्भगिन्यादीनां पूजकाः तानि
भूतानि यांति प्राप्नुवंति। मद्याजिनो मद्भक्ताः तु अयत्न आयासे मांपरमानंदरूपं यांति प्रा
प्नुवंति।२५ न केवलं मद्भक्तानां अनावृत्ति लक्षणमनंतं फलं सुखाराधनश्चाहं कथ
म् इत्याद्द।   पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्ना
मि प्रयतात्मनः।२६ यः मे मह्यं पत्रं पुष्पं फलं तोयं भक्त्या प्रयच्छति। अहं तत्पत्रादिकं ९४
सर्वं भक्त्युपहृतं भक्तिपूर्वकं उपढौकितं प्रयतात्मनः शुद्धबुद्धेः अश्नामि गृह्णामि।२६

एवं अतः सर्वं मदर्पणं कुरु इत्याद्द।   यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं।२७ हे। कौंतेय यत्करोषि यत् आचरसि। स्वतः प्राप्तं
यत् अश्नासि। जुहोसि यत् जुहोषि हवनं करोषि। श्रौतं स्मार्तं वा यत् ब्राह्मणादिभ्यो ददासि।   थो
यत् तपश्चरसि तत् मयि समर्पणं कुरु।२७ एवं कुर्वतां यत्फलं भवति तदाद्द॥   शुभा
शुभफलैरेवं मोक्ष्यसे कर्मबंधनैः। संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि।२८ एवं म
त्समर्पणं कुर्वन् शुभाशुभैः फलैः सुखदुःखप्रदैः कर्मरूपैः बंधनैः मोक्ष्यसे। एवं क
र्मणः मयि कर्मसमर्पणात् संन्यासः कर्तृत्वादियोगः तेन संन्यासयोगेन युक्तांतःकरणः
न् कर्मबंधनैः जीवन्नेव विमुक्तः पतिते शरीरे मां उपैष्यसि प्राप्स्यसि।२८   तर्हि
रागद्वेषवान् भगवान् यतो भक्तान् अनुगृह्णासि नेतरान् इत्यत्राद्द॥   समोहं स
र्वभूतेषु न मे द्वेष्योस्ति न प्रियः। ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं।२९

अहं सर्वभूतेषु स्वभक्तान्यभक्तेषु समः तुल्यः । मे मम परकीयो न द्वेष्यः । स्वीः स्वकीयो न प्रि
यः । यथा अग्निः अभिमानरहितः समीपं उपसर्पतां शीतं अपनयति न इतरेषां । तथा अहं
भजतः अनुगृह्णामि नेतरान् । ये तु पुनः ये मां भजंति ते मयि स्वभावत एव वर्तंते । न मम राग
निमित्तं तेषु च अहं स्वभावत एव वर्ते । न इतरेषु । न तत्र मम रागद्वेषौ ॥ २९ अनन्यभक्तेः मा
हात्म्यं दर्शयति । अपि चेत् सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मंतव्यः सम्य
ग्व्यवसितो हि सः ॥ ३० अपि चेत् यः सुदुराचारो अनन्यभाक् मां भजते स साधुरेव मंतव्यः
हि यस्मात् स सम्यक् व्यवसितः । सम्यक् निश्चयं कृतवान् । ३० ननु कथं सम्यक् वीना
व्यवसायमात्रेण दुराचारः साधुर्भवतीति तत्राह ॥ क्षिप्रं भवति धर्मात्मा शश्वत्
शांतिं निगच्छति । कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ क्षिप्रं शीघ्रं धर्मात्मा लो५
धर्मचित्तो भवति । शश्वत् नित्यं शांतिं उपशमं निगच्छति प्राप्नोति । हे कौंतेय प्रतिजा

नीहि । एतत् परमतत्वं शृणु । मद्भक्तः मयि समर्पितात्मा न प्रणश्यति । नाशं न प्राप्नोति । ३१
मद्भक्तिः पवित्री करोति अत्र किं चित्रं । यतो मद्भक्तिः दुःकुलानपि अनधिकारिणोपि संसारा
न्मोचयतीत्याह ॥ मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रा
स्तेपि यांति परां गतिं ॥ ३२ हि यस्मात् हे पार्थ येपि स्त्रियः वैश्याः तथा शूद्राः पापयोनयः पा
पात्मानः स्युः तेपि मां व्यपाश्रित्य मां आश्रयं गृहीत्वा परां प्रकृष्टां गतिं यांति ॥ ३२ यदा एवं दुःकु
लाः अनधिकारिणोपि मद्भक्ताः परां गतिं गच्छंति । तत्र सदाचाराः सत्कुलाश्च परां गतिं यांतीति
किं वक्तव्यं इत्याह ॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा । अनित्यमसु
खं लोकमिमं प्राप्य भजस्व मां ॥ ३३ ये पुण्याः पुण्ययोनयः ब्राह्मणाः तथा भक्ताः राजर्षयः क्षत्रि
यवराः ते अपि किं पुनः वक्तव्यं । अतो अनित्यं क्षणभंगुरं असुखं सुखवर्जितं इमं मनुष्यलो
कं पुरुषार्थसाधनं दुर्लभं मनुष्यत्वं लब्ध्वा मां भजस्व मम सेवां कुरु ॥ ३३ भजनप्रकारं दर्शयन्

उपसंहरति। मन्मनाभव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि क्तिमद्भक्तेयु[illegible]क्त्वैवमात्मानंम
त्परायणः॥ ३४॥ मन्मनाभव त्वचित्तो भव। मद्भक्तः मयि भक्तिमान् भव। मद्याजी यजनशीलो भ
व। मां नमस्कुरु। मामेव प्राप्स्यसि। एवं चित्तं युक्त्वा समाधिं कृत्वा मत्परायणः मां परमात्मस्वरू
पं प्राप्स्यसि। प्राप्स्यसि। ३४। इति श्रीभगवद्गीताभाष्ये भक्तियोगो नाम नवमोऽध्यायः॥ ९॥
एवं सप्तमादिभिः त्रिभिरध्यायैः भजनीयं परमेश्वरस्य स्वरूपं निरूपितं। तस्मो
हमस्मि क्रोमै यइत्यादिना नवमे च अहं क्रतुरहं यज्ञः इत्यादिना अध्यायद्वयेन तद्वि
भूतयश्च संक्षेपतः उक्ताः। अथेदानीं दशमे ताएव विस्तरतो प्रपंचयिष्यन् येषु येषु भावेषु चिं
त्यो भगवान् तान् तान् भावान् भगवतस्तत्त्वं च पूर्वं निरूपितमपि अतिदुर्विज्ञेयत्वात् भक्तानु
कंपया तदपि निरूपयति। भूय एवेति॥ श्रीभगवानुवाच। भूय एव महाबाहो शृणु ९६
मे परमं वचः। यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १॥ हे महाबाहो भूय एव पुन

रेव मे मम परमं परमात्मस्वरूपस्य प्रकाशकं वचः वाक्यं शृणु। यत् अहं ते तुभ्यं प्रीयमाणाय मद्व
नात् प्रीतिं प्राप्नुवते हितकाम्यया वक्ष्यामि। उक्तस्यापि परमेश्वरतत्त्वस्य पुनर्वचने दुर्विज्ञेयत्वं हे
तुमाह॥ न मे विदुः सुरगणाः प्रभवं न महर्षयः। अहमादिर्हि देवानां महर्षीणां च सर्व
शः॥ २॥ मम प्रभवं प्रभावं प्रभुशक्त्यातिशयं उत्पत्तिं वा सुरगणाः न विदुः महर्षयो भृग्वा
दयः न विदुः। कस्मात् अहं सर्वशः सर्वप्रकारैः देवानां महर्षीणां च आदिः कारणं उत्प
त्त्यादिहेतुः॥ २॥ एवंभूतात्मज्ञाने फलमाह। यो मामजमनादिं च वेत्ति लोकमहेश्वरं।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥ ३॥ यः मां अजं अनादिं च पुनः लोकमहेश्वरं तुरीय
वस्थं संसारतत्कारणभूतात् अविद्याद्वयरहितं मां वेत्ति स मर्त्येषु असंमूढः सं
मोहवर्जितः सर्वपापैः [illegible] बुद्धिपूर्वकृतैः प्रमुच्यते॥ ३॥ सर्वलोकमहेश्वरत्वे
कारणमाह॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः। सुखं दुःखं भवोऽभावो भयं

बुद्धिपूर्वैः

चान्वयमेव च॥४ बुद्धिः अंतःकरणस्य सूक्ष्मार्थप्रकाशनसामर्थ्यं ज्ञानं आत्मादिप
दार्थानां अवबोधः प्राप्तेषु बोद्धव्येषु विषयेषु विवेकपूर्विका प्रवृत्तिः असंमोहः आक्रुष्टस्य
ताडितस्य वा अविकृतचित्तता क्षमा यथादृष्टस्य श्रुतस्य परबोधनार्थं उच्चार्यमा
णं वचनं सत्यं बाह्येंद्रियनिग्रहो दमः अंतःकरणस्य निग्रहः शमः चित्ताह्लादः सु
खं चित्तपरितापः दुःखं भवः उत्पत्तिः अनुत्पत्तिः अभावः त्रासः भयं त्रासाभावः अभयं॥४
किंच॥ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः भवंति भावा भूतानां मत्त एव पृ
थग्विधाः॥५ प्राणिनां अपीडनं अहिंसा सर्वप्राणिषु तुल्यचित्तता समता संतोषस्तुष्टिः
इंद्रियसंयमपूर्वकं शरीरपीडनं तपः यथाशक्ति पात्रे द्रव्यवितरणं दानं धर्मनिमित्ता
कीर्तिः यशः अधर्मनिमित्ता अपकीर्तिः अयशः यथोक्ता बुद्ध्यादयः भावाः प्राणि
नां स्वकर्मानुरूपेण मत्त एव अनेकप्रकारा भवंति॥५ किंच॥ महर्षयः सप्त पूर्वे

चत्वारो मनवस्तथा मद्भावा मानसा जाता येषां लोक इमाः प्रजाः॥६ पूर्वे अतीतकाले
सप्त भृग्वादयो महर्षयः तथा स्वायंभुवादय इति प्रसिद्धाः चत्वारो मनवः ते सर्वे एकाग्रम
नसा मद्भाविताः वैष्णवसामर्थ्ययुक्ताः मनसैव उत्पादिता मानसा जाताः उत्पन्नाः येषां ए
कादशानां लोकः सर्गः इमाः स्थावरजंगमरूपाः प्रजाः॥६ यथोक्तविभूत्यादितत्त्वज्ञानस्य
फलमाह॥ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः सोऽविकंपेन योगेन युज्यते नात्र
संशयः॥७ यः मम एतां विभूतिं विस्तारं योगं च योगः सर्वज्ञत्वं योग उच्यते अथवा
योगः ऐश्वर्यसामर्थ्यं तत्त्वतः यथावत् जानाति वेत्ति स अविकंपेन अप्रचलितेन योगेन सम्यक्
ज्ञानेन स्थैर्यरूपेण युज्यते संबध्यते अत्र संशयो न॥७ अविकंपयोगस्य रूपं दर्शयन्
तेन यथा सम्यक् ज्ञानं भवति तं प्रकारमाह॥ अहं सर्वस्य प्रभवो मत्तः स

वै प्रवर्त्तते। इति मत्वा भजंते मां बुधा भावसमन्विताः।८ अहं परं ब्रह्म। सर्वस्य जगतः प्रभवः।
प्रभवः सर्वं जगत् स्थितिनाशक्रियाफलोपभोगरूपं विक्रियास्वरूपं मत्त एव प्रवर्त्तते। इति
एवं मत्वा बुधाः अवगततत्त्वाः। भावः परमार्थतत्त्वाभिनिवेशः। तेन युक्ताः। मां भजंते आश्रयंते
८ प्रीतिपूर्वकं भजनप्रकारमाह। मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं। कथयंतश्च मां नि
त्यं तुष्यंति च रमंति च। ९ मयि परमेश्वरे चेतो येषां ते मच्चित्ताः। मयि उपसंहृतेंद्रियग्रामाः।
मद्गतप्राणाः। मद्गतेंद्रियाः। अथवा मद्गतजीवनाः। परस्परं अन्योऽन्यं बोधयंतः। अव
गमयंतश्च मां ज्ञानबलवीर्यादिविशिष्टं कथयंतः तुष्यंति परितोषं उपयांति रमंति च
रतिं प्राप्नुवंति। हे एवं भजतां अहं सम्यक् ज्ञानं ददामीत्याह॥ तेषां सततयुक्तानां
भजतां प्रीतिपूर्वकं। ददामि बुद्धियोगं तं येन मामुपयांति ते।१० तेषां सततयुक्तानां नि ९८
त्याभियुक्तानां प्रीतिपूर्वकं भजतां तं बुद्धियोगं मत्तत्त्वविषयं सम्यक् ज्ञानं बु

द्धिः तया योगः संबंधः। तं बुद्धियोगं ददामि। येन बुद्धियोगेन सम्यक् दर्शनलक्षणेन ते मां
परमेश्वरं आत्मत्वेन उपयांति प्रपद्यंते। १ भगवत्प्राप्तिप्रतिबंधकज्ञानस्य विनाश बुद्धि
योगदाने हेतुं वदन् तस्य बुद्धियोगस्य फलं सकलसंसारबीजं अज्ञानमपि नाशयामीत्याह।
तेषामेवानुकंपार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता। अहं ते
षामेव अनुकंपार्थं कथं नाम श्रेयः स्यात् इति दयाहेतोः। आत्मभावस्थः आत्मनो भावो
ऽन्तःकरणाशयः तस्मिन्नवस्थितः। सन् भास्वता नित्यप्रवृत्त एकाग्रध्यानजनितसम्य
क् दर्शनभास्वता ज्ञानदीपेन विवेकप्रत्ययरूपेण अज्ञानजं अविवेकतो जातं मिथ्याप्र
त्ययलक्षणं तमो मोहं। अंधकारं नाशयामि।११ यथोक्तां भगवतो विभूतिं योगं च श्रुत्वा
विस्तरेण जिज्ञासुः अर्जुन उवाच। परं ब्रह्मेति॥ अर्जुन उ०। परं ब्रह्म परं धाम
पवित्रं परमं भवान्। पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं॥ १ भवान् परं ब्रह्म

परं धाम परं तेजः। परमं पवित्रं पावनं परमं पुरुषं शाश्वतं नित्यं दिव्यं दिव्यं। आदिदेवं स्व
र्गीभूतानां आदिभूतं विभुं विभवयुक्तं ॥१२ किंच॥ आहुस्त्वामृषयः सर्वे देवर्षि
र्नारदस्तथा। असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१३ सर्वे ऋषयो महर्षयः वसि
ष्ठादयः। तथा देवर्षिर्नारदः। एते सर्वे ऋषयः असितः देवलः। व्यासः वा आहुः। त्व
न्तु स्वयं चैव मे मह्यं ब्रवीषि ॥१३ अतो मम इदानीं च। हे श्रेयो असंभावना निवृत्ते
त्याह॥ सर्वमेतदृतं मन्ये यन्मां वदसि केशव। न हि ते भगवन् व्यक्तिं विदुर्देवा नदा
नवाः। हे केशव यत् त्वं मां प्रति वदसि एतत् सर्वं त्वया ऋषिभिश्च यथोक्तं तत् ऋतं स
त्यमेव मन्ये हि यस्मात् हे भगवन् ते तव व्यक्तिं प्रादुर्भावं देवाः दानवाः न विदुः
॥१४ किंतर्हि॥ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम। भूतभावन भूतेश
देवदेव जगत्पते ॥१५ हे पुरुषोत्तम हे भूतभावन भूतानि भावयतीति भूतभाव ९९
नः। भूतेश। देवदेव। जगत्पते। त्वं आत्मना आत्मानं निरतिशयज्ञानैश्व

र्यबलादिशक्तिमंतं ईश्वरं स्वयमेव वेत्थ जानासि ॥१५ यस्मात् तवान्यः किंच नैव वेत्ति। नदे
वादयः। तस्मात्॥ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः। याभिर्विभूतिभिर्लोकानि
मांस्त्वं व्याप्य तिष्ठसि ॥१६ हि यस्मात् ताः दिव्याः अलौकिकाः आत्मविभूतयः स्वकीयमाहा
त्म्यविस्तराः अशेषेण साकल्येन वक्तुं अर्हसि। याभिर्विभूतिभिः त्वं इमान् लोकान् व्या
प्य तिष्ठसि ॥१६ कथनप्रयोजनं दर्शयन् कथनमेव प्रार्थयति॥ कथं विद्यामहं योगि
न् त्वां सदा परिचिंतयन्। केषु केषु च भावेषु चिंत्योऽसि भगवन्मया ॥१७ हे योगिन् अहं
त्वां सदा परिचिंतयन् कथं विद्यां कथं जानीयां। हे भगवन् मया केषु केषु भावेषु पदार्थेषु चिं
त्यो ध्येयोऽसि ॥१७ तदेवं बहिर्मुखेणापि चित्ते तत्र तत्र विभूतिभेदेन त्वं चिंतितव्यः यथा भवे
त् तथा विस्तरेण कथय इत्याह॥ विस्तरेणात्मनो योगं विभूतिं च जनार्दन। भूयः क
थय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतं ॥१८ हे जनार्दन भूयः पुनरपि आत्मनो योगं ऐश्व

ची सामर्थ्यं विभूतिं ध्येयपदार्थोनां विस्तारेण पुनरपि कथय यदि यस्मात्तु मे मम त्वन्मुखनिःसृत
वाक्यामृतं शृण्वतः तृप्तिर्नास्ति॥१८ एवं प्रार्थितः सन् श्रीभगवानुवाच हंत मे इति। श्रीभ
गवानुवाच हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्त
रस्य मे॥१९ हे कुरुश्रेष्ठ हंत इदानीं ते तव दिव्याः दिवि भवाः दिव्याः आत्मविभूतयः आत्मनो
मम माहात्म्यविस्तराः प्राधान्यतः कथयिष्यामि मे मम विस्तरस्य अंतो नास्ति॥१९ तत्र प्र
वी ऐश्वरं रूपं कथयति। अहमात्मा गुडाकेश सर्वभूताशयस्थितः। अहमादिश्च
मध्यं च भूतानामंत एव च॥२० हे गुडाकेश सर्वभूताशयस्थितः सर्वेषां भूतानां अंतःहृ
दि स्थितः जीवात्मा अहमेव पुनः अहं भूतानां आदिः मध्यं अंतःहृदि स्थितः जीवात्मा अहमेव
पुनः अहं भूतानां आदिः मध्यं अंत एव च अहं॥२० इदानीं अथ यापरिस्थमाद्येः विभूतीः १००
कथयति। आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्। मरीचिर्मरुतामस्मि नक्षत्राणामहं श
शी॥२१ आदित्यानां द्वादशादित्यानां मध्ये विष्णुनामा आदि

त्योऽहं। ज्योतिषां प्रकाशयितॄणां मध्ये अंशुमान् रश्मिमान् रविः अहं। मरुतां एकोनपंचा
शतो वायूनां मध्ये मरीचिनामा वायुरहं। नक्षत्राणां मध्ये शशी चंद्रमा अहं॥२१ वेदानां
सामवेदोऽस्मि देवानामस्मि वासवः। इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥
वेदानां चतुर्णां ऋग्यजुःसामाथर्वणां सामवेदोऽहं। देवानां रुद्रादित्यानां मध्ये
वासवः इंद्रोऽहं। इंद्रियाणां एकादशानां चक्षुःश्रवणघ्राणरसनत्वक्वाक्पाणि
पादपायूपस्थमनसां मध्ये मनः अहं। भूतानां मध्ये चेतना सर्वदा अभिव्य
क्ता बुद्धिः अहं॥२२ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां। वसूनां
पावकश्चास्मि मेरुः शिखरिणामहं॥२३ च पुनः रुद्राणां एकादशानां मध्ये शंकरनामा
रुद्रोऽहं। यक्षरक्षसां मध्ये वित्तेशः धनदोऽहं। च पुनः वसूनां अष्टानां मध्ये पावकनामा
वसुरहं। शिखरिणां कुलाचलानां मध्ये मेरुरहं॥२३ पुरोधसां च मुख्यं मां विद्धि

पार्थ बृहस्पतिं। सेनानीनामहं स्कंदः सरसामस्मि सागरः॥२४ हे पार्थ वळी पुरोधसां पुरो
हिताओनो मुख्य बृहस्पति मने जाणि। सेनानीनो सेनापतीओना मध्ये स्कंद। अने सरसो जळाशया
ओना मध्ये सागर छुं॥२४ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं। यज्ञानां जपयज्ञो
ऽस्मि स्थावराणां हिमालयः॥२५ महर्षीओना वशिष्टादीना मध्ये भृगु नामा महर्षि छुं। गिरा व
चनो मध्ये एकाक्षरं ओंकार अहं छुं। यज्ञ नां श्रौता नां स्मार्त्तो ना मध्ये जपयज्ञ। जपरूप यज्ञ
जपयज्ञ। अने छुं स्थावराणां मध्ये हिमालयः अहं॥२५ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च
नारदः। गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥२६ सर्व वृक्षाणां मध्ये अश्वत्थ अ
छुं। वळी देवर्षीणां। देवा एव ऋषित्वं प्राप्ताः मंत्रद्रष्टारो ये ते देवर्षयः। तेओ देव
र्षीणां मध्ये नारद नामा देवर्षि छुं। गंधर्वाणां हाहा हूहू प्रभृतीनो मध्ये चित्ररथ नामा
गंधर्वः अहं। सिद्धानां जन्मथीज धर्म ज्ञान वैराग्य ऐश्वर्यातिशयं प्राप्ताः सिद्धाः। ते १०१

ओना सिद्धानो मध्ये कपिलनामा मुनिः अहं॥२६ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं। ऐ
रावतं गजेंद्राणां नराणां च नराधिपं॥२७ अश्वानो मध्ये अमृतोद्भवं अमृतार्थ क्षीरोदधि मथ
नोद्भूत उच्चैःश्रवसं मां विद्धि। गजेंद्राणां मध्ये ऐरावतं मां विद्धि। नराणां मनुष्याणां म
ध्ये नराधिपं राजानं मां विद्धि॥२७ आयुधानामहं वज्रं धेनूनामस्मि कामधुक्। प्रज
नश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः॥ आयुधानो मध्ये वज्र अहं छुं। धेनूनां म
ध्ये कामधुक् कामधेनु छुं। वळी प्रजनः प्रजननयिता कंदर्पः अहं छुं। सर्पाणां
मध्ये वासुकि छुं॥२८ अनंतश्चास्मि नागानां वरुणो यादसामहं। पितॄणाम
र्यमा चास्मि यमः संयमतामहं॥२९ वळी नागानो मध्ये अनंतः अहं छुं। यादसां अ
ब्देवतानो मध्ये वरुण अहं छुं। वळी पितॄणां कव्यवालादीनो मध्ये अर्यमा अहं छुं।
संयमतां संयमं कुर्वतां मध्ये यमः अहं छुं॥२९ प्रह्लादश्चास्मि दैत्यानां कालः

कलयतामहं। मृगाणांच मृगेंद्रोहं वैनतेयश्चपक्षिणां।३० चपुनः दैत्यानांमध्ये प्रल्हादः
अहं। कलयतां वशीकुर्वतां गणनं वा कुर्वतां कालः अहं। चपुनः मृगाणांमध्ये मृगेंद्रः सिं
हः अहं। चपुनः पक्षिणांमध्ये वैनतेयः गरुडो हं।३० पवनः पवतामस्मि रामः शस्त्र
भृतामहं। झषाणां मकरश्चास्मि स्रोतसामस्मि जान्हवी। पवतां पावयितॄणां वेग
वतां वा मध्ये पवनो वायुरहं। शस्त्रभृतां मध्ये रामः दाशरथिरहं। चपुनः झषाणांम
ध्ये मकरः अहं। स्रोतसां नदीनांमध्ये जान्हवी गंगा अहं।३१ सर्गाणामादिरंतश्चम
ध्यं चैवाहमर्जुन। अध्यात्मविद्या विद्यानां वादः प्रवदतामहं।३२ हे अर्जुन सर्गाणां
सृष्टीनां आदिरंतमध्यं उत्पत्तिविनाशस्थितयः अहं। विद्यानांमध्ये अध्यात्मवि
द्या अहं। प्रवदतां प्रवचनानां कथानां वाद जल्प वितंडानां वादो हं। वीतरागकथा
वादः विजिगीषुकथा जल्पः स एव जल्प एव स्वपक्षस्थापनादीनो वितंडा।३२ १०२

अक्षराणामकारोस्मि द्वंद्वः सामासिकस्य च। अहमेवाक्षयः कालो धाताहं विश्वतोमु
खः।३३ अक्षराणां वर्णानां मध्ये अकारः अहं। चपुनः सामासिकस्य समाससमुदाय
स्य द्वंद्वः अहं। अक्षयः अक्षीणः कालः त्रुट्यादिः परमेश्वरो वा अहमेव। विश्वतोमुखः
चतुर्मुखः धाता ब्रह्मा अहं।३३ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा।३४ चपुनः सर्वहरः मृत्युः हं मृत्यु हि
विध्वंसनादि हरः प्राणहरस्य। सर्वहरः धनप्राणहरः द्विविधोपि अहं। चपुनः भविष्यतां
भाविकल्याणानां उत्कर्षप्राप्तियोग्यानां उद्भवो अभ्युदयः तत्प्राप्ति हेतुरहं। नारी
णां स्त्रीणां मध्ये कीर्तिः श्रीः वाक् सरस्वतीति स्त्रः उत्तमाः तथा स्मृतिः मेधा धृतिः क्षमा अहं।३४
बृहत्साम तथा साम्नां गायत्री छंदसामहं। मासानां मार्गशीर्षोऽहमृतूनां कुसुमा
करः।३५ तथा साम्नां मध्ये बृहत्साम अहं। छंदसां मध्ये गायत्री छंदः अहं। मासानां मध्ये

मार्गशीर्षः अहं। ऋतूनां मध्ये कुसुमाकरः अहं॥३५ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहं॥३६ छलयतां छलकर्त्तॄणां मध्ये द्यूतं अहं। तेज
स्विनां प्रभावतां तेजः प्रभाव अहं। जेतॄणां जयोऽस्मि व्यवसायानां उद्यमवतां उद्यमः अहं।
सत्त्ववतां सात्त्विकानां सत्त्वं अहं॥३६ वृष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः। मुनीनाम
प्यहं व्यासः कवीनामुशना कविः॥३७ वृष्णीनां वृष्णिकुलोत्पन्नानां मध्ये वासुदेवः अहं। पां
डवानां युधिष्ठिरादीनां मध्ये धनंजयः अर्जुनोऽहं। मुनीनामपि मध्ये व्यासः। वेदव्यासोऽहं।
कवीनां मध्ये उशना शुक्राचार्यः अहं। कविरहं॥३७ दंडो दमयतामस्मि नीतिरस्मि जिगी
षतां। मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं॥३८ दमयतां दमयितॄणां दुर्दांतानां दल
नकारणं दंडः अहं। जिगीषतां जेतुं इच्छतां नीतिः। अहं च पुनः गुह्यानां गोप्यानां मौनं अ
स्मि ज्ञानवतां ज्ञानं अहं॥३८ यच्चापि सर्वभूतानां बीजं तदहमर्जुन। न तदस्ति वि १०३

नायत् स्यात् मया भूतं चराचरं॥३९ हे अर्जुन पुनः सर्वभूतानां यदपि बीजं प्ररोहकारणं त
त् अहं। यच्चराचरं भूतं मया विना मया परित्यक्तं स्यात् भवेत् तत् नास्ति॥३९ प्रकरणार्थं उपसं
हरति॥ नांतोऽस्ति मम दिव्यानां विभूतीनां परंतप। एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥
४० हे परंतप मम दिव्यानां विभूतीनां विस्ताराणां अंतः इयत्ता नास्ति यतः ईश्वरस्य स
र्वात्मनः दिव्यानां विभूतीनां इयत्ता केनचित् वक्तुं ज्ञातुं शक्यते। पुनः मया एष विभू
तेर्विस्तरः उद्देशतः एकदेशेन विभूतेर्विस्तरः प्रोक्तः॥४० पुनः सर्वत्र कांहं प्रति सामा
न्येन कथयति। यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजों
शसंभवं॥४१ यत् यत् लोके विभूतिमत् ऐश्वर्ययुक्तं श्रीमत् संपत्तियुक्तं ऊर्जितं
न सौंदर्यादिगुणोपेतं वस्तु सत्त्वं तत्तत् मम तेजसः प्रभावस्य अंशेन संभवं संभू
तं जानीहि॥४१ अथवा किमनेन परिच्छिन्नदर्शनेन सर्वत्र मद्दृष्टिमेव कुरु इत्या

ह॥ अथवा बहुनैतेन किं ज्ञातेन तवार्जुन। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो
जगत्॥४२॥ हे अर्जुन अथवा तव एतेन एवमादिना बहुना परिच्छिन्नेन ज्ञातेन किं। अहं कृ
त्स्नं इदं जगत् एकावयवेन अशेषतः अवष्टभ्य धृत्वा व्याप्य वा स्थितोस्मि॥४२॥ इति
श्रीभगवद्गीताभाष्ये विभूतिपुरुषयोगो नाम दशमोऽध्यायः॥१०॥ विभूति विभवे प्रो
च्य अध्याये ततो विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति भगवता यत् जगदात्म
रूपं आद्यमैश्वरं रूपं आनिर्दिष्टं तत्साक्षात्चिकीर्षुः पूर्वोक्तमभिनंदन् अर्जुन उ
वाच॥ अर्जुन उवाच॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं। यत्त्वयोक्तं वचस्ते
न मोहोऽयं विगतो मम॥१॥ हे कृष्ण त्वया मदनुग्रहाय मम अनुग्रहार्थं यत् परमं नि
रतिशायं गुह्यं अध्यात्मसंज्ञितं ज्ञानैश्वर्य शक्ति बल वीर्य तेजोभिः संपन्नं विष्णोः
स्वरूपविषयं आत्मानात्मविवेकविषयं वचः वाक्यं उक्तं॥ तेन मम अयं मोहः अविवेकः 104
= विगतः अपगतः॥१॥ किंच॥ भवाप्य

भूतानां श्रुतौ विस्तरशो मया। त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं॥२॥ हे कमलपत्राक्ष
ह्रियस्मात् मया त्वत्तः भूतानां भवाप्ययौ वृत्तकाशात् विस्तरशः विस्तारेण श्रुतौ। च अन्यत् अ
व्ययं अक्षयं माहात्म्यमपि श्रुतं। पूर्वोक्तमभिनंदयन्स्वाभिप्रायमाविष्करोति॥ एव
मेतद्यथात्थ त्वमात्मानं परमेश्वर। द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम॥३॥ हे परमेश्वर यथा
त्वं आत्मानं नित्यशुद्धबुद्धमुक्तस्वभावं परमात्मानं आत्थ कथयसि। एतत् एवमेव। नान्य
था। च आत्मानं हे पुरुषोत्तम ते तव ऐश्वरं शक्तिवीर्य बल तेजोभिः संपन्नं रूपं द्रष्टुं इ
च्छामि। न केवलं मम इच्छा। येन त्वया वक्तव्यं मदीयं अधिकारित्वं अपेक्षणीयमित्या
ह॥ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो। योगेश्वर ततो मे त्वं दर्शयात्मानम
व्ययं॥४॥ हे प्रभो यदि तत् ऐश्वरं रूपं मया द्रष्टुं शक्यं इति मन्यसे हे योगेश्वर। यो
गाः योगिनः तेषां ईश्वरः। योगेश्वरः। ततः त्वं मे मम अव्ययं आत्मानं दर्शय॥४॥
= एवं प्रार्थितो भगवान् अच्युतः स्वकीयं रूपं दर्शयिष्यन् सा

वर्धनेन च संपादने नार्जुनं अभिमुखी करोति॥ श्रीभगवानुवाच॥ पश्य मे पार्थ रूपा
णि शतशोऽथ सहस्रशः। नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥ हे पार्थ। मम शत
शः अथ सहस्रशः नानाविधानि अनेकप्रकाराणि दिव्यानि दिविभवानि दिव्यानि अप्रा
कृतानि च पुनः नानावर्णाकृतीनि नानाविधा शुक्लनीलपीतादिप्रकारा वर्णाः तथा
आकृतयश्च अवयवसंस्थानविशेषाः येषां रूपाणां तानि नानावर्णाकृतीनि रूपा
णि पश्य॥५॥ किंच॥ पश्यादित्यान् वसून् रुद्रान् अश्विनौ मरुतस्तथा॥ बहून्यदृष्ट
पूर्वाणि पश्याश्चर्याणि भारत॥६॥ हे भारत तथा आदित्यान् वसून् रुद्रान् अश्विनौ
मरुतः पश्य। बहूनि अदृष्टपूर्वाणि आश्चर्याणि आश्चर्यकारीणि पश्य॥ न केव
लं एतावदेव। किंच॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं। मम देहे गुडाकेश १०॥
यच्चान्यद्द्रष्टुमिच्छसि॥७॥ हे गुडाकेश अद्य इह मम देहे इह एकस्थं

मद्ये सचराचरं चरेण अचरेण सहवर्तत इति सचराचरं स्थावरजंगमं एकस्थं जगत् पश्य। यत्
अन्यदपि जयपराजयादिकं द्रष्टुं इच्छसि तदपि पश्य॥७॥ विद्यमानचक्षुषा अनधिकारि
त्वं दर्शयन् चक्षुरंतरं दातुं प्रतिजानीते॥ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दि
व्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं॥८॥ तु पुनः मां विश्वरूपं परं अनेन प्राकृतेन स्वचक्षुषा
द्रष्टुं न शक्यसे। न शक्नोषि। तेन त्वं तद्दिव्यं चक्षुः ददामि। येन दिव्येन चक्षुषा द्रष्टुं शक्नोषि।
x योजन मम मे ऐश्वरं ईश्वरसंबंधिनं योगं शक्त्यतिशयं पश्य॥८॥ एवमुक्त्वा भगवान् अर्जुनाय
स्वरूपं दर्शितवान् तत्र रूपं यादृशं दर्शितवान् तादृशं धृतराष्ट्रं प्रति संजयः एवमुक्ते
त्यादिभिः षड्भिः श्लोकैः प्रतिपादयति॥ संजय उवाच॥ एवमुक्त्वा ततो राजन् महायो
गेश्वरो हरिः। दर्शयामास पार्थाय परमं रूपमैश्वरं॥ हे राजन् महायोगेश्व
रः अहं श्रम्यैः योगेश्वरः। महायोगेश्वरः हरिः एवं यथोक्तेन प्रकारेण उक्त्वा

ततोऽनंतरं पार्थाय अर्जुनाय परमं ऐश्वरं रूपं दर्शयामास॥९ कथं भूतं तदित्याह॥ अने-
कवक्त्रनयनमनेकाद्भुतदर्शनं। अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं॥१० अनेकानि व-
क्त्राणि नयनानि च यस्मिंस्तु रूपे तत् अनेकवक्त्रनयनं। अनेकानि अद्भुतानि विस्मापका-
नि दर्शनानि यस्मिंस्तु रूपे तत् अनेकाद्भुतदर्शनं। अनेकानि दिव्यानि आभरणानि य-
स्मिंस्तु रूपे तत् अनेकदिव्याभरणं दिव्यानि अनेकानि उद्यतानि आयु-
धानि यस्मिंस्तु रूपे तत् दिव्यानेकोद्यतायुधं।१० दिव्यमाल्याम्बरधरं दिव्यगंधानुलेपनं
सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं॥११ दिव्यानि माल्यानि पुष्पाणि अम्बराणि
वस्त्राणि च बिभर्तीति दिव्यमाल्याम्बरधरं तं दिव्यगंधा:॥ अनुलेपनानि च यस्य
तं दिव्यगंधानुलेपनं। सर्वै: आश्चर्यै: काशिभि: वस्तुभि: कुलं सर्वाश्चर्यमयं देवं। ३०६
अनंतं। नान्य: देशत: कालतो वस्तुतश्च अंतोस्ति यस्य तत् अनंतं। विश्वतोमुखं सर्वतोमु-

खं। सर्वत्र दृष्टारं॥११ यादृशं भगवतो विश्वरूपस्य भा: तां भास्वंतमस्य उपमां कथ्य-
ते। तस्यानीदृक्पक्वं निरतिशयत्वं वदति। दिवि सूर्यसहस्रस्य भवेद्यु-
गपदुत्थिता। यदि भा: सदृशी सा स्याद्भासस्तस्य महात्मन:॥१२ दिवि अंतरिक्षे द्यु-
लोके वा युगपदुत्थितस्य सूर्यसहस्रस्य युगपदुत्थिता भा: कांति: तस्य महात्मनो वि-
श्वरूपस्य भास:। भासा कांत्या यदि सदृशी स्यात्। यदि वा न स्यात्। ततो भगवतो ना
तो अधिक अधिकाइत्यर्थ:॥१२ तत: किं वृत्तमित्यपेक्षायां आह। तत्रैकस्थं॥ तत्रेति॥
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा। अपश्यद्देवदेवस्य शरीरे पांडवस्त-
दा॥१३ पांडव: तदा तत्र तस्मिन् देवदेवस्य शरीरे विश्वरूपे एकस्थं एकत्र स्थितं अनेक-
धा देवपितृमनुष्यादिभेदै: प्रविभक्तं भिन्नं कृत्स्नं समग्रं जगत् अपश्यत्॥१३
ततः स विस्मयावि-
ष्टो ... एवं दृष्ट्वा अर्जुन: किं कृतवानित्याह॥

हृष्टरोमा धनंजयः। प्रणम्य शिरसा देवं कृतांजलिरभाषत॥१४॥ धनंजयोऽर्जुनः। त
त्तद्दर्शनानंतरं विस्मयाविष्टः। अत्यंतविस्मयः हृष्टरोमा कृतांजलिः सन् देवं शि
रसा प्रणम्य अभाषत इदं वक्ष्यमाणं अब्रवीत्॥१४॥ अर्जुनस्य भाषणप्रकारमेव सं
जय आह॥ अर्जुन उवाच। पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेष
संघान्। ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्॥१५॥ हे देव
अहं तव देहे सर्वान् देवान् इंद्रादीन्। तथा भूतविशेषसंघान्। ब्रह्माणं चतुर्वक्त्रं
ईशं प्रजानां ईशितारं कमलासनस्थं पृथ्वीपद्ममध्ये मेरुकर्णिकासनस्थं। ऋषी
न् वसिष्ठादीन्। च सर्वान् वासुकिप्रभृतीन् उरगान् दिव्यान् पश्यामि॥१५॥
अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपं। नांतं न मध्यं न पुन
स्तवादिं पश्यामि विश्वेश्वर विश्वरूप॥१६॥ हे विश्वेश्वर विश्वरूप त्वां अनेकबा १०७

हूदरवक्त्रनेत्रं। अनेके बाहवः उदराणि वक्त्राणि नेत्राणि च यस्य स तं। सर्वतोऽनंतरूपं।
सर्वतः सर्वत्र अनंतानि रूपाणि यस्य तं। त्वां पश्यामि। तव पुनः आदिं मध्यं अंतं न पश्या
मि॥१६॥ किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतं। पश्यामि त्वां दुर्निरी
क्ष्यं समंताद्दीप्तानलार्कद्युतिमप्रमेयं॥१७॥ हे देव अहं त्वां एवं विधं पश्यामि। कथंभू
तं किरीटिनं रत्नखचितमुकुटाभरणयुक्तं। गदिनं गदाख्यायुधविशेषयुक्तं। चक्रि
णं चक्रायुधहस्तं। तेजोराशिं तेजःसमूहयुक्तं। सर्वतः सर्वासु दिक्षु दीप्तिमंतं स्वदी
प्त्या सर्वप्रकाशकं। समंतात् दुर्निरीक्ष्यं द्रष्टुमशक्यं दीप्तानलार्कद्युतिं दीप्तयोः अनला
र्कयोः अग्निसूर्ययोः द्युतिरिव द्युतिः तेजो यस्य तं दीप्तानलार्कद्युतिं। अप्रमेयं
सकलप्रमाणागोचरं॥१७॥ यस्मादेवं तव अतर्क्यं ऐश्वर्यं तस्मादेवं तर्कयामि॥
त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं। त्वमव्ययः शाश्वतधर्मगोप्ता।

सनातनस्त्वं पुरुषो मतो मे ।१८ हे भगवन् मुमुक्षुभिः वेदितव्यं ज्ञेयं परमं अक्षरं अवि
नाशि ब्रह्म त्वमेवासि । अस्य विश्वस्य जगतः परं निधानं परमः आश्रयः त्वमेवासि ।
अव्ययस्त्वं शाश्वतधर्मगोप्ता शाश्वतस्य नित्यस्य धर्मस्य गोप्ता पालकः सनातनः चि
रंतनः पुरुषः मे मम त्वमेव मतः ।१८ अनादिमध्यान्तमनंतवीर्यमनंतबाहुं शशि
सूर्यनेत्रं । पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं ।१९ हे भगवन्
त्वां एवं विधं पश्यामि कथंभूतं त्वां अनादिमध्यांतं न विद्यते आदिः मध्यं अंतो यस्य तं
तं उत्पत्तिस्थितिविनाशरहितं अनंतवीर्यं अनंतं वीर्यं यस्य स तं अनंतबाहुं अ
नंताः बाहवो यस्य स तं शशिसूर्यनेत्रं शशिसूर्यौ चंद्रादित्यौ नेत्रे यस्य स तं ।
दीप्तहुताशवक्त्रं दीप्तो हुताशो वह्निः वक्त्रे यस्य स दीप्तहुताशवक्त्रः । तं स्वतेज
सा स्वकीयेन तेजसा दीप्त्या इदं समस्तं विश्वं तपंतं संतापयंतं ।१९ १०८

द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः । दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोक
त्रयं प्रव्यथितं महात्मन् ।२० हे महात्मन् हि यस्मात् द्यावापृथिव्योः इदं अंतरं अंतरिक्षं मध्यभा
गः त्वया एकेन विश्वरूपेण व्याप्तं तथा सर्वाः दिशश्च व्याप्ताः तव इदं उग्रं रौद्रं अद्भुतं वि
स्मापकं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं भीतं चलितं च ।२१ इदानीं तु यद्वा जयेम यदि
वा नो जयेयुरिति अर्जुनस्य जयेयः संशयविषयं वर्तते तत्र निर्णयाय पांडवेषु एकांतिकं
जयदर्शयं तं भगवंतं पश्यन् अर्जुन आह ॥ अमी हि त्वां सुरसंघा विशंति केचिद्भी
ताः प्रांजलयो गृणंति । स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥
२१ हि यस्मात् अमी युध्यमानाः योधाः सुरसंघाः वस्वादिदेवसमूहाः भूभारा
वतारणाय मनुष्यरूपेण अवतीर्णाः त्वां विशंति । त्वयि प्रविशंतो दृश्यंते । केचि
द्भीताः प्रांजलयः गृणंति । महर्षिसिद्धसंघाः महर्षीणां

णादीनां सिद्धानां कपिलादीनां संघास्समूहाः उत्पादितादिनिमित्तानि उपलक्ष्य जगतः वि
श्वस्य कल्याणप्रेप्सवः स्वस्ति स्वस्ति अस्तु इत्युक्त्वा पुष्कलाभिः संपूर्णाभिः चतुरकीर्तिनस्त
द्गलाभिः त्वां स्तुवंति॥२१॥ रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च
गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे।२२ रुद्राः शंकरप्रभृतयः एकादश
आदित्याः द्वादश वसवः अष्टौ साध्याः द्वादश विश्वेदेवाः त्रयोदश अश्विनौ द्वौ म
रुतः एकोनपंचाशत् ऊष्मपाः ऊष्माणं पिबंतीति ऊष्मपाः पितरः गंधर्वाः हाहाहूहूप्र
भृतयः यक्षाः कुबेरप्रभृतयः असुराः विरोचनप्रभृतयः सिद्धाः कपिलादयः
तेषां संघाः विस्मयापन्नाः सर्वे त्वां पश्यंति॥२२॥ विस्मये हेतुमाह। रूपं महत्ते बहु
वक्त्रनेत्रं महाबाहो बहुबाहूरुपादं। बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्त १०८
थाहं॥२३॥ हे महाबाहो तव बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं

दंष्ट्राभिः करालं विक्रियं महत्परिमाणातीतं एवंविधं त्वदीयं रूपं दृष्ट्वा सर्वे जनास्सर्वे लोकाः प्रव्यथि
ताः अहमपि प्रव्यथितः चलितोऽस्मीति॥२३॥ लोकानां आत्मनश्च व्यथने कारणमाह। नभः
स्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि
शमं च विष्णो॥२४॥ ह्यस्मात्तु हे विष्णो अहं त्वां एवंविधं दृष्ट्वा प्रव्यथितांतरात्मा प्रव्यथितः प्रन्ती
तः अंतरात्मा मनो यस्य सः अहं धृतिं धैर्यं न विंदामि न लभे अन्यत्तु शमं उपशमं न लभे कथं
भूतं त्वां नभस्पृशं गगनस्पृशं दीप्तं प्रज्वलितं अनेकवर्णं अनेकैर्वर्णैः करालवर्णं आकाराय स्थि भूतं। याता
नीतं व्यात्ताननं विवृतमुखं दीप्तविशालनेत्रं ज्वलितविस्तीर्णलोचनं॥२४॥ धृतिशमयोरलाभे
कारणमाह॥ दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि। दिशो न जाने
न लभे च शर्म प्रसीद देवेश जगन्निवास॥२५॥ हे प्रभो दंष्ट्राकरालानि दंष्ट्राभिः कराला
नि विकृतानि कालानलसन्निभानि प्रलयाग्निसदृशानि तव मुखानि दृष्ट्वैव

अदृष्टदिशः पूर्वापरविभागेन दिशः न जाने दिग्मूढोस्मि । वचनः शर्म सुखं न लभे । हे देवेश
जगन्निवास प्रसीद प्रसादं कुरु ॥२५॥ अथेत्यः मम पराजयाशंका आसीत् सा अपगता इत्याह । अमी चेति
= पंचत्रिं ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः । भीष्मो द्रोणः
सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥२६॥ वचनः अमी सर्वे धृतराष्ट्रस्य
पुत्राः दुर्योधनप्रभृतयः तथा भीष्मो द्रोणः असौ सूतपुत्रः कर्णः अवनिपालसंघैः राजसं
घैः समूहैः सहैव अस्मदीयैरपि धृष्टद्युम्नप्रभृतिभिः योधमुख्यैः सह त्वरमाणाः त्वां
विशंति ॥२६॥ वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि । केचिद्वि
लग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः ॥२७॥ ते तव त्वरमाणाः दंष्ट्राकरालानि
दंष्ट्राभिः विकृतानि भयानकानि भयंकराणि वक्त्राणि विशंति तव मुखे प्रविष्टानां मध्ये केचि ११०
चूर्णितैः उत्तमांगैः शिरोभिः ॥ दशनांतरेषु दंतविवरेषु लग्नाः संलग्नाः इव दृ

श्यंते ॥२७॥ भगवन्मुखे प्रवेशं दृष्टांतेन योजयति ॥ यथेति । यथा नदीनां बहवोंबुवेगाः
समुद्रमेवाभिमुखा द्रवंति । तथा तवामी नरलोकवीराः विशंति वक्त्राण्यभिविज्वलंति ॥२८॥
यथा नदीनां बहवः अनेके अंबुवेगाः समुद्रमेव अभिमुखाः द्रवंति विशंति । तथा तवमू अ
मी भीष्मादयो नरलोकवीराः मनुष्यलोकशूराः तव अभितो विज्वलंति प्रकाशमानानि
वक्त्राणि प्रविशंति ॥२८॥ अवस्यंभेन प्रवेशे नदीवेगदृष्टांत उक्तः ॥ बुद्धिपूर्वकप्रवेशे स
प्रयोजनं दृष्टांतमाह । यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः । तथै
व नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥ यथा समृद्धवेगाः अतित्वरासं
युक्ताः पतंगाः शलभाः प्रदीप्तं ज्वलनं नाशाय विशंति तथैव लोकाः प्राणिनः नाशाय
समृद्धवेगाः तव वक्त्राणि विशंति ॥२९॥ भगवद्वेष्टितं च आह ॥ लेलिह्यसे ग्र
समानः समंताल्लोकान् समग्रान् वदनैर्ज्वलद्भिः ॥ तेजोभिरापूर्य जगत्समग्रं

भासस्तवोग्राः प्रतपंति विष्णो ॥३०॥ हे विष्णो त्वं ज्वलद्भिः देदीप्यमानैर्वदनैः समग्रान् लो
कान् समंतात् ग्रसमानः अंतः प्रवेशयन् लेलिह्यसे आस्वादयसि तव उग्राः रूपाः भासो
दीप्तयः स्वतेजोभिः समग्रं जगत् आपूर्य प्रतपंति संतापयंति ॥३०॥ यत एवं उग्रस्त्वं भाव
स्तु अतः तवस्वरूपं कथयेत्याह ॥ आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देवव
र प्रसीद ॥ विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं ॥३१॥ हे देववर मे
प्रत्याख्याहि उग्ररूपः क्रूराकारो भवान् कः ते तुभ्यं नमोऽस्तु प्रसीद भवंतं आ
आद्यं विज्ञातुं इच्छामि हि यस्मात् तव प्रवृत्तिं चेष्टां न प्रजानामि ॥३१॥ एवं प्रार्थितः स
न् श्रीभगवानुवाच कालोस्मीति ॥ श्रीभगवानुवाच कालोऽस्मि लोकक्षयकृत् प्रवृ
द्धो लोकान् समाहर्तुमिह प्रवृत्तः ऋतेपि त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्य १११
नीकेषु योधाः ॥३२॥ लोकक्षयकृत् लोकक्षयकारी कालः अहं अस्मि प्रवृद्धः वृद्धिं प्रा

प्तः लोकान् समाहर्तुं संहर्तुं इह अस्मिन् काले प्रवृत्तः प्रत्यनीकेषु अनीकं प्रति ये योधाः
योद्धारः अवस्थिताः ते सर्वे भीष्मद्रोणप्रभृतयः ये भवतः आशंका ते सर्वे त्वां ऋते वि
ना न भविष्यंति ॥३२॥ यस्मादेवं तस्मादिति ॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रू
न् भुंक्ष्व राज्यं समृद्धं मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥३३॥
तस्मात् त्वं उत्तिष्ठ भीष्मप्रभृतयो अतिरथा द्विरथा ये यास्ते अर्जुनेन जिताः इति य
शो लभस्व न केवलं पुण्येदितत् प्राप्यते शत्रून् दुर्योधनप्रभृतीन् जित्वा समृद्धं राज्यं
भुंक्ष्व एते मयैव पूर्वमेव निहताः व्यापादिताः हे सव्यसाचिन् निमित्तमात्रं भव ।
वामेनापि हस्तेन शरान् क्षेपात् सव्यसाची कथ्यते अर्जुनः ॥३३॥ ननु एतद् द्रोणादि इति
या आशंका आसीत् सापि न कार्येत्याह ॥ भीष्मं च द्रोणं च भीष्मं च जयद्रथं
च कर्णं तथान्यानपि योधवीरान् मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जे

ताभिरलोक्कपन्नानू॥३४ येषु येषु अर्जुनस्य आशंका तान् मयाहतानिति भगवान् द्रोण
दिपूनिति। द्रोणो धनुर्वेदाचार्यो दिव्यास्त्रसंपन्नः। आत्मनश्च विशेषतो गुरुरिष्टः। भीष्मः
स्वच्छंदमृत्युः दिव्यास्त्रसंपन्नश्च परशुरामेण द्वंद्वयुद्धमगमत् न च पराजितः। तथा जयद्र
थः। यस्य पिता तपश्चरति। यो मम पुत्रस्य शिरो भूमौ पातयिष्यति तस्यापि शिरः
पतिष्यतीति। कर्णोपि वासवदत्तया शक्त्या अमोघया संपन्नः सूर्यपुत्रः कानीनो यतः
तस्मात्तेव निर्दिदेश। एतान्। अन्यानपि योधवीरान् मयाहतान् त्वं जहि। मा व्यथिष्ठाः ते
भयो भयं मा कार्षीः॥३४ ततो यद्वृत्तं तद्धृतराष्ट्रं प्रति संजय आह॥ संजय उ॥ एत
च्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी। नमस्कृत्वा भूय एवाह कृष्णं सगद्ग
दं भीतभीतः प्रणम्य॥३५ किरीटी अर्जुनः केशवस्य एतत्पूर्वोक्तं वचनं श्रुत्वा कृतांजलिः
वेपमानः सन् नमस्कृत्वा भूयः कृष्णमेव भीतभीतः प्रणम्य सगद्गदं आह॥३५ ११२

यदाह अर्जुनस्तद्दर्शयति॥ अर्जुन उवाच॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्र
हृष्यत्यनुरज्यते च। रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः॥३६ हे
हृषीकेश तव प्रकीर्त्या त्वन्माहात्म्यकीर्तनेन श्रुतेन जगत् प्रहृष्यति। हर्षं प्राप्नोति। च पुनः
अनुरज्यते अनुरागं प्राप्नोति। च पुनः रक्षांसि भीतानि दिशो द्रवंति। सर्वे सिद्धसंघाः
कपिलादीनां समूहाः नमस्यंति। तत् स्थाने युक्तं।३६ भगवतो हर्षादिविषयत्वे हेतुं द
र्शयति॥ कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोप्यादिकर्त्रे। अनंत देवे
श जगन्निवास त्वमक्षरं सदसत्तत्परं यत्॥३७ हे महात्मन् च पुनः ते तुभ्यं गरीय
से गुरुतराय कस्माद्धेतोः न नमेरन्। न नमस्कुर्युः। यतो ब्रह्मणो हिरण्यगर्भ
स्यापि आदिकर्त्रे कारणे। अतः कस्मात् आदिकर्त्रे कथमेवं न नमस्कुर्युः।
अतः हर्षादीनां नमस्कारस्य च स्थानं त्वं असि विषय इत्यर्थः। हे अनंत हे देवेश

जगन्ति वासयति यत् वेद्यं तेषु परं अक्षरं श्रूयते तत् त्वं सत् विद्यमानं । असत् अविद्यमा
नं । तत् त्वं ॥३७॥ पुनरपि स्तौति ॥ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य प
रं निधानं । वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ॥३८॥ हे अनंतरूप त्वं आ
दिदेवः जगतः स्रष्टृत्वात् परिशयनात् पुरुषः पुराणश्चिरंतनः अस्य जगतः परं
प्रकृष्टं निधीयते महाप्रलयादौ जगत्सर्वं अस्मिन्निति परं निधानं । वेत्तासि सर्व
स्य ज्ञातासि । वेद्यं ज्ञेयमपि त्वमसि । परं प्रकृष्टं । वैष्णवं पदं त्वमसि । त्वया । च इ
दं विश्वं ततं व्याप्तं । ३८ ॥ सर्वदेवात्मकत्वात् सर्वैः त्वमेव नमस्कार्यः इति स्तु
वन् स्वयमपि नमस्कुर्वन्नाह ॥ वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापति
स्त्वं प्रपितामहश्च । नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ११३
३९ हे भगवन् वायुः यमः अग्निः वरुणः शशांकः प्रजापतिः । च पुनः प्रपितामहस्त्वं

ते तुभ्यं नमः अस्तु । पुनश्च भूयोऽपि ते तुभ्यं नमो नमः ॥ अस्तु पुनः पुनः नमस्कारकरणे
न मे मनो न किं श्रद्धातिशयं दर्शयति ॥३९ किं च ॥ नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व । अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि
सर्वः ॥४० हे भगवन् ते तुभ्यं पुरस्तात् पूर्वस्यां दिशि नमः । अथ पृष्ठतः ते तुभ्यं नमो
स्तु । हे सर्व सर्वत एव सर्वासु दिक्षु ते तुभ्यं नमः । हे अनंतवीर्य अनंतं वीर्यं सामर्थ्यं यस्य
स अनंतवीर्यः । त्वं अमितविक्रमः । अमितः विक्रमः पराक्रमो यस्य सः । त्वं सर्वं समस्तं
जगत् समाप्नोषि सम्यक् एकेनात्मना व्याप्नोषि । ततः तस्मात् त्वं सर्वोऽसि । त्वद्वि
नाभूतं न किंचिदस्तीत्यर्थः ॥४० इदानीं भगवन्माहात्म्यपरिज्ञानात् कृतं अपरा
धं क्षामयमान आह ॥ सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे स
खेति । अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि ॥४१ हे कृ

क्षमया तवेदं स्वरूपं महिमानं भाव लेषु अजानता प्रमादात् असावधान चित्ततया प्र
णयेन स्नेहकृत विश्वासात् वा सखा समानवया इति मत्वा यत् हे कृष्ण हे यादव हे सखे इ
ति प्रसभं हठात् उक्तं ॥४१॥ यच्चावहासार्थमसत्कृतोसि विहारशय्यासनभोज
नेषु एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ॥४२॥ हे अच्युत यत्पुनः
अवहासार्थं परिहासप्रयोजनाय एकः परोक्षं अथवा तत्समक्षं विहारशय्यास
नभोजनेषु विहारः संक्रमणं शय्या शयनं आसनं उपवेशनस्थानं किं
वासनादिभोजनं अशनस्थानं तेषु असत्कृतः परिभूतोसि तत्सर्वं अपराधजातं
अहं अप्रमेयं अचिन्त्यप्रभावं त्वां क्षामये क्षमां कारये ॥४२॥ अचिन्त्यप्रभावमेवाह
पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् न त्वत्समोऽस्त्यभ्यधिकः १०४
कुतोऽन्यो लोकत्रयेप्यप्रतिमप्रभाव ॥४३॥ अस्य चराचरस्य स्थावरजंगमस्य लोकस्य

जंगमस्य त्वं पिता जनकः जनकेवलं जनकः पूज्यश्च पूज्यादिः यतः त्वं गुरुर्गरीयान् गुरुत
रः यतः लोकत्रये त्वत्समः कोपि नास्ति अन्त्यधिकः कुतः अप्रतिमः प्रभावो य
स्य सः ॥४३॥ यस्मादेवं तस्मादिति । तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीश
मीड्यं पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ॥४४॥ तस्मात् कायं देहं
प्रणिधाय भूमौ पातयित्वा प्रणम्य नमस्कृत्य अहं त्वां ईशं ईड्यं प्रसादये प्रसन्नं कार
ये । हे देव मम अपराधं सोढुं अर्हसि । यथा पुत्रस्य अपराधं पिता सहते सखा सख्युः अ
पराधं सखा सहते । प्रियायाः अपराधं प्रियः सहते ॥४४॥ एवं क्षमापण प्रार्थयित्वा अद
ष्टपूर्वमिति द्वाभ्यां ॥ अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च प्रव्यथितं म
नो मे । तदेव मे दर्शय देवरूपं प्रसीद देवेश जगन्निवास ॥४५॥ हे देवदेवेन्द्र
गवन् अदृष्टपूर्वं तव इदं विश्वरूपं दृष्ट्वा हृषितोस्मि हर्षितोस्मि तत्रापि तु भयेन मे

मनः प्रव्यथितं प्रचलितं मे मम तदेव रूपं यत् मम सख्यं तदेव दर्शय हे देव जगन्निवास प्र
सीद ॥४५ तदेव रूपं विशेषयन्नाह ॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टु
महं तथैव । तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥४६ हे सहस्रबा
हो अहं त्वां तथैव किरीटिनं गदिनं चक्रहस्तं द्रष्टुं इच्छामि । हे विश्वमूर्ते तेनैव च
तुर्भुजेन भव ॥४६ अर्जुनेनोपलब्धं विश्वरूपं उपसंहृत्य प्रियवचनेन आश्वा
सयन् । श्रीभगवानुवाच ॥ मयेति ॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन तवा
र्जुनेदं रूपं परं दर्शितमात्मयोगात् । तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन
न दृष्टपूर्वं ॥४७ हे अर्जुन मया तव प्रसन्नेन इदं परं रूपं विश्वरूपं तेजोमयं ते
जःप्रायं विश्वं समस्तं अनंतं अंतरहितं आदौ दीप्तत्वं आद्यं आत्मयोगात् आत्म ११५
नः ऐश्वर्यसामर्थ्यात् दर्शितं यत् रूपं मम त्वदन्येन न दृष्टपूर्वं ॥४७

एतद्दर्शनं अतिदुर्लभं लब्ध्वा कृतार्थोऽसीति स्तुवन्नाह ॥ न वेदयज्ञाध्ययनैर्न दा
नैर्न च क्रियाभिर्न तपोभिरुग्रैः । एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरु
प्रवीर ॥४८ हे कुरुप्रवीर अहं नृलोके मनुष्यलोके एवं पूर्वं दर्शितरूपः त्वदन्ये
न द्रष्टुं न शक्यः । न वेदयज्ञाध्ययनैः चतुर्णां वेदानां अध्ययनैः न च क्रि
याभिः अग्निहोत्रादिभिः श्रौतादिभिः न दानैः न उग्रैः घोरैः तपोभिः चांद्राय
णादिभिः अहं द्रष्टुं न शक्यः ॥४८ यदि एवं इदं घोरं रूपं दृष्ट्वा तव व्यथा जायते तर्हि
तदेव प्राक् अनुभूतं रूपं दर्शयामीत्याह ॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा
रूपं घोरमीदृङ्ममेदं । व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥४९
हे अर्जुन मम इदं ईदृक् घोरं रूपं दृष्ट्वा ते तव व्यथा भयं मा भूत् । मा च विमूढभावः
= विमूढचित्तता मा भूत् । व्यपेतभीः विगतभयः प्रीतमनाः पुनः तदे

वचकुंद्धं शंखचक्रगदाधरं तवइष्टं मे मम इदं रूपं प्रपश्य ॥४९॥ एवं उक्त्वा आत्मन
मेव रूपं दर्शितवान् । संजय उवाच । इत्यर्जुनमिति ॥ संजय उवाच । इत्य
र्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः । आश्वासयामास च भीतमे
नं भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥ वासुदेवः अर्जुनं तथेति तथाभूतं वच
नं उक्त्वा भूयः पुनरपि स्वकं रूपं वसुदेवगृहे जातं दर्शयामास ॥ वपुः महा
त्मा पुनः सौम्यवपुर्भूत्वा एनं भीतं आश्वासयामास ॥५०॥ ततो निवर्तमा
नं तथ्यः अर्जुन उवाच दृष्ट्वेदमिति ॥ अर्जुन उवाच । दृष्ट्वेदं मानुषं
रूपं तव सौम्यं जनार्दन इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥५१
हे जनार्दन तव इदं सौम्यं मानुषं रूपं दृष्ट्वा इदानीं अहं जातः सचेताः प्रसन्न ११६

स्वरूतस्यानुग्रहस्यातिदुर्लभत्वं दर्शयन् श्रीभगवानुवाच ॥ सुदुर्दर्शमिति । चक्रं
चित्तः संवृत्तः संजातः । प्रकृतिं स्वभावं गतश्चास्मि ॥५१॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमि
दं रूपं दृष्टवानसि यन्मम । देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥५२॥ हे अर्जु
न मम इदं रूपं सुदुर्दर्शं सुष्ठु अतीव दुर्दर्शं यत् दृष्टवानसि । देवा अपि अस्य रूपस्य
नित्यं निरंतरं दर्शनकांक्षिणो भवंति ॥५२॥ नाहं वेदैर्न तपसा न दानेन न चेज्य
या शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥५३॥ वेदैः ऋक्यजुःसामाथर्व
भिः तपसा उग्रेण चांद्रायणादिना । न दानेन गोभूहिरण्यादिना । न च इज्यया यज्ञेन अश्व
मेधादिना । एवंविधः द्रष्टुं न शक्यः । यथा त्वं मां दृष्टवानसि ॥५३॥ केनोपायेन तर्हि द्रष्टुं श
क्य इति तत्राह ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन
प्रवेष्टुं च परंतप ॥५४॥ हे अर्जुन उ पुनः अहं एवंविधः अनन्यया भक्त्या ज्ञानविद्य
ते अन्यो यस्यां सा ॥ अनन्या । तया भक्त्या । शास्त्रैरपि करणैः वासुद

वादन्यतु नोपलभ्यते तत्वेन तत्वतः याथात्म्येन द्रष्टुं च अन्यतु शास्त्रतो ज्ञातुं प्रवेष्टुं परमेश्वरेण
ऐक्यं गंतुं च हे परंतप अहं शक्यः ॥५४॥ इदनीं सर्वस्य गीताशास्त्रस्य सारभूतं अर्थं निःश्रेयसा
र्थं अनुष्ठेयत्वेन संक्षिप्याह ॥ मत्कर्मकृत् मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः
सर्वभूतेषु यः स मामेति पांडव ॥५५॥ हे पांडव यः मत्कर्मकृत् मदर्थं कर्म मत्कर्म तत्करोतीति
मत्कर्मकृत् मत्परमः अहं परागतिर्यस्य स मत्परमः मामेव प्रकर्षेण भजत इति म
द्भक्तः धनपुत्रकलत्रेषु संगवर्जितः सकलभूतेषु निर्वैरः शत्रुभावरहितः
आत्मनः अप्रियताप्रकारप्रवृत्तेष्वपि निर्गतवैरा यः ईदृशो मद्भक्तः समामेति
अहमेव तस्य परागतिः ॥५५॥ इति श्रीभगवद्गीताभाष्ये विश्वरूपयोगो नाम एकादशोऽध्या ११७
यः ॥ ॥ द्वितीयादिविभूत्यंतेषु विभुस्तत्त्वो पास्यः ॥ परब्रह्मणः अक्षरस्य उ
पासनमुक्तं ॥ तेषां ज्ञानी नित्ययुक्तः सर्वं ज्ञानप्लवेनैवेति तस्य निर्गुणोपासनस्य

श्रेष्ठत्वमुक्तं एकादशे च ऐश्वरं आद्यं समस्तजगदात्मरूपं त्वदीयं विश्वरूपं उक्तं मत्क
र्मकृदित्यनेन तस्य सगुणदर्शनस्य श्रेष्ठत्वमुक्तवान् अतः अनयोः उपाययोः पक्षयोः
श्रेष्ठतरत्वबुभुत्सया भगवंतं अर्जुनः पृच्छति एवंसततेति ॥ अर्जुन उवाच ॥
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ॥ ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥ ये
भक्ताः अनन्यशरणाः एवं पूर्वोक्तं मत्कर्मकृदिति श्लोकोक्तमार्गेण च कर्मकरणादि प
रतया निरंतर्येण यथादर्शितं विश्वरूपं पर्युपासते ॥ ये चापि त्यक्तसर्वैषणाः सं
न्यस्तसर्वकर्माणः सर्वोपाधिरहितं अव्यक्तं इंद्रियागोचरं अक्षरं ब्रह्म पर्युपा
सते पर्युपासनं कुर्वंति मनसः स्थिरत्वं कृत्वा दीर्घकालं निरंतरयादरितैलधार
वत् अविच्छिन्नतया ज्ञानकरणेन पर्युपासना तेषां उभयेषां मध्ये के योगवित्तमाः अ

तिशयेन योगविदः केइत्यर्थः ॥१॥ द्वयोर्मध्ये सगुणोपासनस्यैव सुकरत्वात् तत्पदं स्तुवन्नाह ॥
॥श्रीभगवानुवाच॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते श्रद्धया परयोपेता
स्ते मे युक्ततमा मताः ॥२॥ मयि परमेश्वरे विश्वरूपे मन आवेश्य समाधाय मां सर्वयोगे
श्वराणामीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिर दृष्टिं ये नित्ययुक्ताः मद्भक्ति
कृदित्यादिश्लोकोक्तमार्गेण नित्यं वर्तमानाः परया श्रद्धया आस्तिक्यबुद्ध्यो
पेताः युक्ताः उपासते ते मे मम युक्ततमाः सर्वदा मच्चित्ताः मम मताः अभिप्रेताः ॥२
तर्हि निर्गुणोपासकाः किं न श्रेष्ठाः इत्यत आह ॥ ये त्विति द्वाभ्यां ॥ ये तु अक्षर
मनिर्देश्यमव्यक्तं पर्युपासते सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ॥३ ये पुनः इं ११८
द्रियग्रामं इंद्रियसमुदायं उपसंहृत्य सर्वत्र सर्वदा सर्वस्मिन्काले इष्टानिष्टप्रा
प्तौ समबुद्धयः संतः अनिर्देश्यं अशब्दगोचरं अव्यक्तं प्रमाणागोचरं सर्व

त्रगं व्यापि अचिंत्यं अशक्यचिंतनं कूटस्थं कूटे यो अंतः असारः स्वयं दोषवत्यां बहि
र्गुणवद्भासमानायां अविद्यायां मायायां स्थितं अथवा कूटे निर्विकारे शिखरे स्थितं अत ए
व अचलं चलनवर्जितं ध्रुवं नित्यं अक्षरं परं ब्रह्म उपासते पर्युपासनं कुर्वंति सते ॥३
संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥४॥ ये इंद्रि
यग्रामं इंद्रियसमुदायं संनियम्य उपसंहृत्य सर्वत्र समबुद्धयः सर्वस्मिन्काले इष्टानिष्ट
प्राप्तौ समबुद्धयः संतः मां उपासते। ते सर्वभूतहिते रताः मामेव प्राप्नुवंति ॥४॥ तर्हि द्वयोः
को विशेषः इति जिज्ञासायां क्लेशाक्लेशकृतं विशेषमाह ॥ क्लेश इति त्रिभिः ॥ क्लेशो
ऽधिकतरस्तेषां अव्यक्तासक्तचेतसां अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५
तेषां अव्यक्तासक्तचेतसां अक्षरोपासकानां क्लेशः प्रयासः अधिकतरः देह
ाभिमानपरित्यागनिमित्तः। हि यस्मात् अव्यक्ता अक्षरात्मिका गतिः दे

देहवद्भिः देहाभिमानवद्भिः दुःखेनप्राप्यते अतएव अधिकतरः क्लेशः॥५ सगुणोपासका
नां मद्भक्तानां मत्प्रसादात् आनायासेन सिद्धिर्भवतीत्याह॥ ये तु सर्वाणि कर्माणि
मयि संन्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायंत उपासते॥६ हे अर्जुन ये सर्वाणि क
र्माणि मयि संन्यस्य मत्पराः अनन्येन। न विद्यते अन्यत् विश्वरूपं देवं आत्मानं मुक्त्वा
आलंबनं यस्य सः अनन्यः तेन अनन्येनैव योगेन समाधिना मां ध्यायंत उपास
ते॥६ तेषां फलमाह॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चि
रात् पार्थ मय्यावेशितचेतसां॥७ हे पार्थ अहं तेषां मयि आवेशितचेतसां मृत्युसंसारसाग
रात् मृत्युयुक्तः संसारः मृत्युसंसारः स एव दुरुत्तरत्वात् सागरः तस्मात् मृत्युसंसार
सागरात् न चिरात् क्षिप्रमेव समुद्धर्ता भवामि॥७ यस्मादेवं तस्मात्॥ मय्ये ११
व मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥८ मनः सं

कल्पविकल्पात्मकं मय्येव विश्वरूपे ईश्वरे आधत्स्व स्थापय। बुद्धिं निश्चयात्मिकां मयि ईश्व
रे निवेशय आरोपय। अत ऊर्ध्वं देहपातोत्तरकालं मयि निवसिष्यसि निवासं करि
ष्यसि॥८ तत्राशक्तं प्रति सुगमोपायमाह॥ अथ चित्तं समाधातुं न शक्नोषि मयि स्थि
रं। अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय॥९ हे धनंजय अथवा एवमुक्तप्रकारे
ण चित्तं मयि विश्वरूपे समाधातुं स्थापयितुं स्थिरं अचलं कर्तुं न शक्नोषि चेत् ततः
पश्चात् अभ्यासयोगेन चित्तस्य एकस्मिन्नालंबने सर्वतः समाहितस्य पुनः स्थाप
नेन अभ्यासात् पूर्वोक्तयोगेन मनः समाधानलक्षणेन मां विश्वरूपं प्राप्तुं इच्छ
प्रार्थयस्व॥९ अभ्यासासामर्थ्ये प्रतिपदांतरमाह॥ अभ्यासेप्यसमर्थोसि म
त्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि॥१० हे अर्जुन यदि
त्वं अभ्यासेपि असमर्थोसि तर्हि मत्कर्मपरमो भव। मदर्थं कर्म मत्के

मीश्रो तस्मान्नौदिकोदव पूजापंचमहायज्ञादिकं मम विष्णुरूपप्रीत्यर्थीकं यमा
णं कर्म मत्कर्म मत्परमः प्रधानो भव मदर्थमपि कर्माणि कुर्वन् सिद्धिं अंतःकरणशुद्धि
योगज्ञानप्राप्तिद्वारेण प्राप्स्यसि॥१०॥ नन्वमवत्कर्मपरिनिष्ठायामपि अशक्तस्य प
दौं तत्रमाह॥ अथैतदप्यशक्तो ऽसि कर्तुं मद्योगमाश्रितः। सर्वकर्मफलत्या
गं ततः कुरु यतात्मवान्॥११॥ अथ पुनरेतदपि यदुक्तं मत्कर्मपरमो भव तत्कर्तुमश
क्तो ऽसि मद्योगमाश्रितः क्रियमाणानि कर्माणि मयि संन्यस्य समर्पणं तेषां अ
नुष्ठानं स मद्योगः तं आश्रितः सन् ततः सर्वकर्मफलत्यागं सर्वेषां कर्म
णां फलसंन्यासं यतात्मवान् संयतचित्तः सन् कुरु॥११॥ इदानीं सर्वक
र्मफलत्यागं स्तौति॥ श्रेयो हि ज्ञानमभ्यासात् ज्ञानाद्ध्यानं विशि
ष्यते ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनंतरं॥१२॥ हि यस्मात् अविवेकपूर्व १२॥

कात् अभ्यासात् ज्ञानं श्रेष्ठं यतः तस्मात् ज्ञा त् ज्ञानपूर्वकं ध्यानं श्रेयः। ध्यानात् युक्ता
त् ध्यानादपि कर्मफलत्यागो विशिष्यते यथोक्तात् कर्मफलत्यागात् अंतःकरणशुद्धि
द्वारेण ततः परं शांतिः सहेतुकस्य संसारस्य उपशमो भवति॥१२॥ एवंभूतस्य भ
क्तस्य पूर्वोक्तप्रमेव परमेश्वरप्रसादहेतून् धर्मानाह॥ अद्वेष्टेत्यष्टाभिः॥ अद्वे
ष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसुखः क्षमी॥१३॥
सर्वभूतानां अद्वेष्टा सर्वं आत्मत्वेन पश्यन् आत्मनो दुःखहेतुमपि न द्वेष्टि। मै
त्रः मित्रतायुक्तः। करुणः दयालुः। ममत्वबुद्धिरहितः॥ निर्ममः अहंबु
द्धिरहितः। निरहंकारः सुखदुःखयोः प्रीतिद्वेषरहितः। समदुःखसुखः
आक्रुष्टो ताडितो वा विक्रियारहितः क्षमी॥१३॥ संतुष्टः सततं योगी यतात्मा
दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥१४॥ सर्वदा लाभालाभे

योः समः संतुष्टः समाहितचित्तः योगी संयतस्वभावः यतात्मा आत्मतत्त्वविषये दृढनिश्चयः मयि विषये अर्पितमनोबुद्धिः संकल्पविकल्पात्मकं मनः व्यवसा
यात्मिका बुद्धिः ते मनोबुद्धी अर्पिते येन स मय्यर्पितमनोबुद्धिः एवंविधो यो मद्भ
क्तः स मे मम प्रियः ॥१४॥ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः हर्षामर्ष
भयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥ यस्मात् संन्यासिनः लोकः नोद्विजते उ
द्वेगं न गच्छति पुनः यः संन्यासी लोकात् न उद्विजते न संतप्यते प्रियलाभे संत
त्त
कश्चन स्यात् हर्षः रोमांचः अश्रुपातादिलिंगो हर्षः अन्यस्य हि श्रुता अमर्षः भयं त्रास
उद्वेगः उद्विग्नता तैर्मुक्तो यः स मे प्रियः ॥१५॥ अनपेक्षः शुचिर्दक्षः उदासी
नो गतव्यथः सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥१६॥ यो मद्भक्तः एवंविधः
मद्
यो भक्तः स मे मम प्रियः कथंभूतः अनपेक्षः देहेंद्रियविषयसंबंधादिषु अपेक्षा १२१

विषयेषु निस्पृहः बाह्याभ्यंतरे शौचेन संपन्नः शुचिः प्रत्युपपन्नेषु कार्येषु
सद्यो यथावत् ज्ञातुं समर्थः दक्षः यः कस्यचिन्मित्रादेः पक्षं न भजते स उदासी
नः गतव्यथः गतभयः इहामुत्रार्थकर्मत्यागी सर्वारंभपरित्यागी ॥१६॥ यो न हृष्य
ति न द्वेष्टि न शोचति न कांक्षति शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥१७॥
यः इष्टप्राप्तौ न हृष्यति अनिष्टप्राप्तौ न द्वेष्टि प्रियाप्रिययोगे न शोचति यः अ
प्राप्तं न कांक्षति शुभाशुभे कर्मणी परित्यक्तुं शीलमस्यास्स शुभाशुभपरित्यागी
एवंविधः यो भक्तिमान् स मे मम प्रियः ॥१७॥ समः शत्रौ च मित्रे च तथा माना
पमानयोः शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥१८॥ च पुनः यः शत्रौ मित्रे च
तुल्यः समः तथा मानापमानयोः पूजापरिभवयोः समस्तुल्यः शीतोष्ण
सुखदुःखेषु समः संगविवर्जितः एकांतसेवी ॥१८॥ तुल्यनिंदास्तुतिः

तिर्मौनी संतुष्टो येन केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः॥१९॥ तुल्य
निंदास्तुतिः तुल्ये समे निंदास्तुती यस्य सः। मौनी संयतवाक्। येन केनचित् शरीरस्थिति
हेतुमात्रेणापि संतुष्टः। अनिकेतः अनाश्रयः। स्थिरमतिः परमार्थवस्तुनि निश्च
लबुद्धिः। यः एवंविधो नरः भक्तिमान् स मे प्रियः॥१९॥ उक्तं धर्मफलजातफ
लमुपसंहरति। ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते। श्रद्दधाना मत्प
रमा भक्तास्तेऽतीव मे प्रियाः॥२०॥ ये तु भक्ताः ये संन्यासिनः इदं यथोक्तं अद्वे
ष्टा सर्वभूतानामित्यादि प्रकारेणोक्तं धर्म्यामृतं पर्युपासते अनुतिष्ठंति। श्र
द्दधानाः श्रद्धावंतः। मत्परमाः अहं [illegible] परमः निरतिशया गतिः ये
षां ते मत्परमाः। मद्भक्ताश्च उत्तमां परमार्थज्ञानलक्षणां भक्तिं आश्रिताः
ते अतीव मे भगवतः विष्णोः परमेश्वरस्य प्रिया भवंति। तस्मात् इदं धर्म्यामृतं १२२

॥अर्जुन उवाच ॥प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च॥ एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव॥१॥

मुमुक्षुणा यत्नतोऽनुष्ठेयं विष्णोः प्रियं धाम जिगमिषुणा। इति वाक्यशेषः॥२०॥ इति श्रीभगव
द्गीताभाष्ये भक्तियोगो नाम द्वादशोऽध्यायः॥ ॥सप्तमेऽध्याये ईश्वरस्य जगन्निमि
त्तसाधनभूते द्वे प्रकृती निर्दिष्टे तत्र एका अपरा अष्टधा भिन्ना त्रिगुणात्मिका क्षेत्रलक्ष
णा। अन्या परा जीवभूता क्षेत्रज्ञलक्षणा। तयोरविवेकात् जीवभावापन्नस्य
चिदंशस्य अयं संसारः। तदेव प्रकृतिद्वयं क्षेत्रक्षेत्रज्ञलक्षणं परस्परं विवि
क्तं तत्त्वतो निरूपयन् तेषामहं समुद्धर्तेति। स्वभक्तस्य संसारात् समुद्धरणं
प्रतिज्ञाय तत्त्वज्ञानमंतरेण तदसंभवात् प्रकृतिद्वयविवेकेन परमात्म
तत्त्वनिरूपणाय श्रीभगवानुवाच। इदमिति॥ श्रीभगवानुवाच॥ इदं श
रीरं कौंतेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥
१। हे कौंतेय इदं परिदृश्यमानं शरीरं क्षेत्रं क्षतत्राणात् क्षयात्

क्षणात्। अथवा क्षेत्रवत् अस्मिन् कर्मफलनिष्पत्तेः सन्तवात् क्षेत्रमित्येतदभि
धीयते। एतत् आपादतलमस्तकं क्षेत्रं यो वेत्ति स्वभावेन उपदेशेन वा तं ह्विदः क्षे
त्रक्षेत्रज्ञविभागविदः। तं क्षेत्रज्ञ इति प्राहुः कथयंति। इदानीं तस्यैव पारमार्थिकं
असंसारिस्वरूपमाह॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत। क्षेत्रक्षेत्रज्ञ
योर्ज्ञानं यत्तत् ज्ञानं मतं मम।२ हे भारत सर्वक्षेत्रेषु ब्रह्मादिस्तंबपर्यंतेषु
क्षेत्रेषु शरीरेषु तदवच्छिन्नं संसारिणमिव भांयाभासमानं क्षेत्रज्ञं
जीवं ना नं मां असंसारिणं सर्वोपाधिरहितं विद्धि जानीहि। यत् क्षेत्रक्षेत्र
ज्ञयोर्ज्ञानं। क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयी क्रियेते। तत् सम्यक् ज्ञानमिति
मम ईश्वरस्य मतं अभिप्रेतं।२ अष्टधा भिन्ना त्रिगुणात्मिका प्रकृतिपु १२३
रुषस्य भोगापवर्गार्थं सर्वदा इंद्रियविषयतया परिणता संघ

भासमाना। इदं शरीरमित्यत्र क्षेत्रशब्देनोक्ता। तदेतत् प्रपंचयिष्यन् प्रतिजानीते॥ तत्क्षेत्रं
यच्च यादृक् च यद्विकारि यतश्च यत्। स च यो यत्प्रभावश्च तत्समासेन मे शृणु॥३ तत् शरीरं यच्च
यद्रूपं यादृक् यादृशं स्वकीयैर्धर्मैर्युक्तं। यद्विकारि यैः इंद्रियादिविकारैः युक्तं। यत
श्च प्रकृतिपुरुषसंयोगाद्भवति। यत् यत्प्रकारैः स्थावरजंगमादिभेदभिन्नं। स च
क्षेत्रज्ञः यः यत्स्वरूपः। वअन्यत् यत्प्रभावः अचिंत्यैश्वर्ययोगेन यैः प्रभावैः सं
पन्नः। तत्संक्षेपतो मत्तः शृणु।३ क्षेत्रक्षेत्रज्ञयाथात्म्यस्य अत्र संक्षिप्तस्य अन्य
त्र विस्तरेणोक्तिस्थानं दर्शयन् तथा याथात्म्यं विविक्तं श्रोतृबुद्धिप्ररोचनाय स्तौति॥
ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक्। ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनि
श्चितैः। ऋषिभिर्वसिष्ठादिभिः विविधैः नानाप्रकारैः छंदोभिः ऋगादिभिः हेतु
मद्भिर्युक्तियुक्तैः विनिश्चितैः निःसंदिग्धैः ब्रह्मसूत्रपदैः ब्रह्मसूचकैः प

दिः। तदुक्तं। क्षेत्रक्षेत्रज्ञयाथात्म्यं बहुधा पृथक् विवेकेन गीतं।४ सुख्यात्मनिर्मुखी
भूताय अर्जुनाय तावत् क्षेत्रस्वरूपमाह। महाभूतानीति द्वाभ्यां॥ महाभूतान्य
हंकारो बुद्धिरव्यक्तमेव च। इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः।५ महाभूतानि
महाभूतारंभकाणि पंचतन्मात्राणि पृथ्व्यादितन्मात्रादीनि। अहंकारो अहंभावः। बुद्धिः
महत्तत्त्वं। अव्यक्तं अव्याकृतं। इंद्रियाणि दश। पंच बुद्धींद्रियाणि पंच कर्मेंद्रियाणि
एकं मनः। पंच इंद्रियगोचराः। पृथिव्यादयः पंच महाभूतानि तल्लक्षणाः। गंधादि
धर्मा एते ताः विषयाः।५ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः। एतत्क्षेत्रं स
मासेन सविकारमुदाहृतं।६ किं च। अनुभूतपूर्वजातीयसुखे तत्साधने वा यो
अभिलाषः सा इच्छा। अनिष्टविषये यो द्वेषः स द्वेषः। सुखं आल्हादः। दुःख ६२४
परितापः। संघातः देहेंद्रियाणां संहतिः। तस्यां संहतौ अभिव्यक्ता अंतःक

ज्ञानवृत्तिः। तप्ते लोहपिंडे अग्निरिव चैतन्याभासव्याप्ता ज्ञानशक्ति चेतना उच्यते। धृतिः य
या अवसादं प्राप्तानि देहेंद्रियाणि ध्रियंते सा धृतिः। एते इच्छादयः ज्ञेयाः ज्ञेयत्वात् क्षेत्रधर्मा
प्रकृतिधर्मा एव न आत्मधर्माः। मया एतत् क्षेत्रं सविकारं समासेन संक्षेपेण उदाहृतं।६
इदानीं उक्तलक्षणात् क्षेत्रात् विविक्ततया ज्ञेयं क्षेत्रज्ञं विस्तरेण वर्णयिष्यन् तत्साध
नान्येव ज्ञानशब्देन ब्रुवन् निरूपयति। अमानित्वमिति पंचभिः॥ अमानित्वमदंभित्व
महिंसा क्षांतिरार्जवं। आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः।७ अमानित्वं आत्म
श्लाघाविरहः। अदंभित्वं स्वधर्मप्रकटीकरणाभावः। अहिंसा प्राणिनामपीडनं।
क्षांतिः परापराधप्राप्तौ अविक्रिया। आर्जवं ऋजुभावः। मोक्षसाधनोपदेशेषु आचार्य
स्य शुश्रूषादिप्रयोजनं। आचार्योपासनं। देहस्य उदकादिना एव अंतश्च
णस्य सद्भावनया रागादिमलानां क्षालनं। द्विविधं शौचं। सन्मार्गे स्थितनिश्च
यत्वं स्थैर्यं॥ आत्मविनिग्रहः। आत्मोपकारितया आत्मशब्दवाच्यस्य देहं

द्रियसंघातविनिग्रहः सन्मार्गे स्थापनं॥७॥ इंद्रियार्थेषु वैराग्यमनहंकार एव च॥ जन्ममृ-
त्युजराव्याधिदुःखदोषानुदर्शनं॥८॥ इंद्रियार्थेषु विषयेषु वैराग्यं विरक्तत्वं अनहंकारः अ-
हंकाराभावः। जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं। जन्मनि गर्भवासयोनिद्वारनिःस्स-
रणं दोषः। मृत्यौ मरणवेदनादिदुःखं दोषः जरायां प्रज्ञाशक्तितेज इंद्रियबलहानि-
रिति दोषः। व्याधौ शिरोरोगज्वरादिपीडा दोषः तथा दुःखेषु आध्यात्मिकादिषु दोषः ते-
षां सर्वेषां अनुदर्शनं आलोचनं॥८॥ ॥असक्तिरनभिष्वंगः पुत्रदारगृहादिषु॥
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥९॥ किं च॥ पुत्रदारगृहादिषु असक्तिः
प्रीत्यभावः अनभिष्वंगः एकत्वाभिमानाभावः। च पुनः इष्टानिष्टोपपत्तिषु इ- १२५
ष्टानिष्टप्राप्तौ नित्यं निरंतरं समचित्तत्वं तुल्यचित्तता॥९॥ किं च॥ मयि

चानन्ययोगेन भक्तिरव्यभिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि॥१०
च पुनः मयि विषये अनन्ययोगेन अपृथक्समाधिना अव्यभिचारिणी एकांत-
भक्तिः विविक्तदेशसेवित्वं एकांतसेवित्वं। जनसंसदि अरतिः अप्रीतिः॥१०॥ किं
च॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं। एतत् ज्ञानमिति प्रोक्तमज्ञा-
नं यदतोऽन्यथा॥११॥ अध्यात्मज्ञाननित्यत्वं आत्मादिज्ञाने नित्यभावः॥
तत्त्वज्ञानार्थदर्शनं एतत् अमानित्वादि तत्त्वज्ञानार्थदर्शनं॥ तं यदुक्तं तत्
ज्ञानहेतुत्वात् ज्ञानमिति प्रोक्तं। यत् अतः एतस्मात् ज्ञानात् अन्यथा विपरी-
तं मानित्वदंभित्वादि तत्। अज्ञानं संसारहेतुत्वात्॥११॥ एभिः साधनैः यत्

x ज्ञेयं।

ज्ञेयं तदाह।   ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते। अनादिमत्परं ब्रह्म
न सत्तन्नासदुच्यते।१२ यत् ज्ञेयं तत् अहं प्रवक्ष्यामि। यत् ज्ञात्वा अमृतं अश्नुते।
न पुनर्म्रियते इत्यर्थः। अनादिमत् उत्पत्तिरहितं। परं निरतिशयं ब्रह्म तत् ज्ञेयं।
न सत् न असत् उच्यते। सदसद्बुद्धिविषयो न भवति।१२ सदसत्शब्दप्रत्यया
विषयत्वे ज्ञेयस्य असत्त्वाशंकायां सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्रति
पादयन् तामाशंकां निवर्त्तयति। सर्वतइति पंचभिः।।   सर्वतः पाणिपा
दं तत् सर्वतोक्षिशिरोमुखं। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति।।१३
तत् ज्ञेयं ब्रह्म सार्वत्रं पाणिपादयोः अवयवाः आस्य वा। तत् सर्वतः पाणि   १२६
पादं। सर्वतः सर्वत्र अक्षीणि शिरांसि मुखानि यस्य तत् सर्वतोक्षिशिरोमुखं।

सर्वतः सर्वत्र श्रुतिमत्। लोके प्राणिसमूहे सर्वं आवृत्य तिष्ठति।।१३ उपाधिभूत पाणिपा
दादीन्द्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ताशंकामात्रनिवृत्त्यर्थमाह।।   सर्वेंद्रियगु
णाभासं सर्वेंद्रियविवर्जितं। असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च।।१४ सर्वेषां इंद्रि
याणां कर्मेंद्रियज्ञानेंद्रियमनोबुद्धीनां बहिःकरणानां गुणैः अध्यवसायसंकल्पश्रवण
वदनादिभिः अवभासत इति सर्वेंद्रियगुणाभासं। सर्वेंद्रियव्यापारैः व्यापृ
तमिव भासते सर्वेंद्रियैः अंतःकरणबहिःकरणैः रहितं। असक्तं सकलवस्तुसंश्ले
षवर्जितं। सर्वं बिभर्तीति सर्वभृत् नू रजतस्येव शुक्तिका। सत्त्वादिगुणैर्वर्जितं निर्गुणं। गु
णानां सत्त्वादीनां सुखदुःखमोहाकारपरिणतानां। भोक्तृ भवितृ गुणभोक्तृ।१४ ।।
बहिरंतश्च भूतानामचरं चरमेव च। सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत्।

बहुनः तत् ज्ञेयं भूतानां चक्रपर्यंतानां । देहानां बहिः व्यापकः चैतन्यरूपेण वर्त्तते । अंतः च
देहमध्ये जीवरूपेण वर्त्तते । अचरं स्थावरं चरं जंगमरूपं सर्वं ज्ञेयं ब्रह्मैव वर्त्त
ते । अविवेकिभिः तत् अतिसूक्ष्मत्वात् यथावत् स्वरूपेण अविज्ञेयं । अत एव तेषां दूर
स्थं विवेकिनां आत्मत्वेन सु लब्धत्वात् अंतिके निकटं ।१५ अविभक्तं च भूतेषु वि
भक्तमिव च स्थितं । भूतभर्तृ च तत् ज्ञेयं ग्रसिष्णु प्रभविष्णु च ।१६ बहुना भूतेषु स
र्व देहेषु अविभक्तं एक अभवत् सर्वगतं । एकमेव वस्तु प्रतिदेहं विभक्तमिव स्थितमिव
दृश्यते । तत् ज्ञेयं भूतभर्तृ । स्थितिकाले भूतानि बिभर्ति । ग्रसिष्णु प्रलयकाले
ग्रसनशीलं । प्रभविष्णु सृष्टिकाले प्रभवनशीलं ।१६ सर्वत्र विद्यमानमपि नोपल
भ्यते चेत् । तर्हि तत् ज्ञेयं तमोरूपं स्यात् इत्याह ॥ ज्योतिषामपि तज्ज्योतिस् १२७
तमसः परमुच्यते । ~~[illegible]~~ ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितं ।१७

ज्योतिषां आदित्यादीनामपि तत् ज्ञेयं ज्योतिः । चैतन्यरूपेण प्रकाशकं । तमसः अज्ञा
नात् परं असंस्पृष्टं उच्यते । ज्ञानं अमानित्वमदंभित्वादि ज्ञानसाधनं । ज्ञेयं परं ब्रह्म ।
तदेव ज्ञेयं अमत्वात् परमानंदरूपं ज्ञानं तत्फलं भवति । एतत् सर्वस्य हृदि वि
शेषेण स्थितं ।१७ यथोक्तार्थं उपसंहरति ॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समा
सतः । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ।१८ इत्येवं क्षेत्रं महाभूतादि धृत्यंतं त
था ज्ञानं अमानित्वादि तत्त्वज्ञानार्थदर्शनपर्यंतं । तथा ज्ञेयं यत् तत् प्रवक्ष्यामीत्यादि
ना तमसः परमुच्यते इत्येवमंतं । एतत् त्रयं समासतः संक्षेपतः उक्तं । मद्भक्तः एतत्त्रयं वि
ज्ञाय मद्भावाय मोक्षाय उपपद्यते । योग्यो भवति ।१८ इदानीं प्रकृतिद्वयस्य प्रकृतिपुरुषल
क्षणस्य जगद्धेतुत्वं विषयविभागेन निरूपयन् यद्विकारि यतश्च यदित्यादि प्र
वीक्षामेव प्रपंचयति ॥ प्रकृतिमिति पंचभिः ॥ प्रकृतिं पुरुषं चैव विद्ध्यना

नादी उभावपि। विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्॥१९॥ प्रकृतिं अपरां क्षेत्रल
क्षणां। पुरुषं च परां प्रकृतिं जीवरूपां। तौ उभौ अनादी विद्धि। विकारान् बुद्ध्यादिदेहें
द्रियांतान्। गुणान् सुखदुःखमोहप्रत्ययाकारपरिणतान् प्रकृतिसंभवान्। प्रकृ
तिस्त्रिगुणात्मिका माया तत्संभवान् विद्धि॥१९॥ इदानीं विकाराणां गुणानां च
स्वरूपं दर्शयन् तेषां प्रकृतिसंभवकथनेन पुरुषस्य संसारहेतुत्वं दर्शयति।

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्य
ते॥२०॥ कार्यकरणकर्तृत्वे कार्यं शरीरं करणानि इंद्रियाणि। तेषां कर्तृत्वं उत्पाद
कत्वे प्रकृतिः माया हेतुः कारणं। पुरुषः क्षेत्रज्ञः सुखदुःखानां भोक्तृत्वे
हेतुः कारणं उच्यते॥२०॥ पुरुषस्य असंगस्य कथं सुखदुःखानां भोक्तृत्वं इ १२८
त्यत्राह॥ पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान्। कारणं गुण

संगोऽस्य सदसद्योनिजन्मसु॥२१॥ यस्मात् पुरुषः भोक्ता प्रकृतिस्थः प्रकृतौ अवि
द्यायां स्थितः। प्रकृतिजान् प्रकृतितो जातान् गुणान् सुखदुःखादीन् भुंक्ते उपलभते
अस्य भोक्तुः पुरुषस्य सदसद्योनिजन्मसु। सद्योनयः देवादीनां सृष्टिः। असद्योन
यः तिर्यगादीनां सृष्टिः। तत्र जन्मानि तेषु सदसद्योनिजन्मसु गुणसंगः। गुणेषु
सत्वादिषु सुखदुःखमोहाद्याकारपरिणतेषु संगः तदात्मभावः। अस्मिता
त्मा वा कारणं हेतुः॥२१॥ इदानीं च एवं विवेकादेव पुरुषस्य संसारः न तु स्वरूपे
ण इत्याशयेन तस्य स्वरूपमाह॥ उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः। परमा
त्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः॥२२॥ अस्मिन् देहे अध्यक्षतरः पुरुषः दे
हेंद्रियव्यापाराणां साक्षी उपद्रष्टा। देहेंद्रियादीनि स्वव्यापारेषु प्रवर्त्त
मानानि न निवारयति। स्वयं अप्रवर्त्तमानोऽपि प्रवृत्त इव दृश्यते। तेन अनुमंता॥

दृष्टादीनामात्माधीनास्थितिः। तेन नेत्ती। अंतःकरणप्रविष्टः सुखदुःखाद्यनुभव
ति। अ॰ विवेकः अतः सोक्ता। सर्वात्मत्वात् स्वतंत्रत्वात् महेश्वरः। सर्वीतरतमः। आत्माप
रमात्मा इत्युक्तः॥२२ एवं प्रकृतिपुरुषज्ञानं स्तौति॥ य एवं वेत्ति पुरुषं प्रकृतिं च गु
णैः सह। सर्वथा वर्त्तमानोपि न स भूयोभिजायते॥२३ यः एवं प्रकारेण पुरु
षं साक्षात् अहमिति वेत्ति। च अन्यत् गुणैः स्वविकारैः सह प्रकृतिं अविद्याल
क्षणां वेत्ति। स सर्वथा सर्वप्रकारेण वर्त्तमानोपि भूयः पुनः पतिते अस्मिन् श
रीरे न अभिजायते॥२३ एवं भूतविविक्तात्मज्ञाने साधनविकल्पानाह॥
ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना। अन्ये सांख्येन योगेन कर्म
योगेन चापरे॥२४ केचिद्योगिनः ध्यानेन एकाग्रतया आत्मचिंतनेन आत्मनि बुद्धौ १२७

आत्मना ध्यानसंस्कृतेन अंतःकरणेन आत्मानं परमात्मस्वरूपं पश्यंति। अन्ये सांख्येन
योगेन सत्त्वादिगुणा नो द्रष्टा तेभ्यः पृथक् नित्यो गुणविलक्षणः आत्मेति सांख्ययोगः
तेन परमेश्वरतुष्ट्या अनुष्ठीयमानं कर्मैव योगः तेन कर्मयोगेन॥२४ अतिमंदाधि
कारिणो निस्तारोपायमाह॥ अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते। तेपि
चातितरंत्येव मृत्युं श्रुतिपरायणाः॥२५ तु पुनः अन्ये एषु विकल्पेषु अन्यतरेणापि यथो
क्तं आत्मानं अजानंतः अन्येभ्यः आचार्येभ्यः श्रुत्वा उपासते चिंतयंति। तेपि च श्रुतिप
रायणाः श्रवणपरायणाः तत्र कृतविश्वासाः मृत्युं संसारं अतितरंति। अतिक्रमंत्ये
व॥२५ कर्मयोगस्य तृतीयचतुर्थपंचमाध्यायेषु प्रपंचितत्वात् ध्यानयोगस्य ष
ष्ठाष्टमयोः प्रपंचितत्वात् ध्यानादस्य सांख्यविविक्तात्मविषयत्वात् सांख्य
... यावदिति यावत्समाप्तिः॥ यावत्संजाय
ते सम्यक्दर्शनं प्रपंचयन्नाह॥

त्तं किंचित्सत्त्वं स्थावरजंगमं। क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ॥२६ हे भरतर्ष
भ। यावत् किंचित् स्थावरजंगमं रूपं सत्त्वं वस्तु संजायते समुत्पद्यते। तत्सर्वं क्षेत्र
क्षेत्रज्ञसंयोगात् क्षेत्रक्षेत्रज्ञयोः मिथ्याध्यारोपितसंयोगात् समुत्पन्नं विद्धि जा
नीहि।२६ अविवेककृतं संसारोद्भवं उक्त्वा तन्निवृत्तये विविक्तात्मविषयं सम्यक् द
र्शनमाह॥ समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं। विनश्यत्स्वविनश्यंतं यः पश्य
ति स पश्यति।२७ यः सर्वेषु ब्रह्मादिस्थावरांतेषु भूतेषु समं निर्विशेषं तिष्ठंतं
देहादिभ्यः परमं ईशितारं परमेश्वरं तेषु ब्रह्मादिषु नश्यत्सु अविनश्यंतं एवं
यथोक्तं परमेश्वरं पश्यति स पश्यति।२७ सम्यक् दर्शनस्य फलवचनेन त
त् स्तौति॥ समं पश्यन् हि सर्वत्र समवस्थितमीश्वरं। न हिनस्त्यात्मनात्मा १३०

नं ततो याति परां गतिं।२८ हि यस्मात् सर्वत्र सर्वभूतेषु समवस्थितं तुल्यतया अवस्थि
तं ईश्वरं समं समतया स्थितं पश्यन् आत्मना आत्मानं न हिनस्ति। तत एव आत्मनो अ
हिंसनात् परां प्रकृष्टां मोक्षाख्यां गतिं याति।२८ ननु शुभाशुभकर्मकर्तृत्वेन वैषम्ये
दृश्यमाने कथं आत्मनः समत्वमित्याशंक्याह॥ प्रकृत्यैव च कर्माणि क्रियमा
णानि सर्वशः। यः पश्यति तथात्मानमकर्तारं स पश्यति॥२९ च पुनः यः सर्वशः सर्व
प्रकारैः प्रकृत्या त्रिगुणात्मिकया पारमेश्वर्या माययैव देहेंद्रियादिव्यापाररूपाणि
कर्माणि क्रियमाणानि पश्यति। तथा आत्मानं अकर्तारं सर्वोपाधिरहितं पश्यति।
स पश्यति स सर्वदृक् इति।२९ इदानीं भूतानामपि प्रकृतिमात्रत्वेन अभेदात्
भूतभेदकृतमपि आत्मनो भेदं अपश्यन् ब्रह्मत्वं उपैति इत्याह॥ यदा

भूतपृथग्भावमेकस्थमनुपश्यति। तत एव च विस्तारं ब्रह्म संपद्यते तदा॥ ३०
यदा यस्मिन् काले भूतपृथग्भावं भूतानां पृथग्भावं एकस्मिन् आत्मनि स्थितं ए
कस्थं पश्यति। ततः आत्मन एव आविर्भावतिरोभावादि विस्तारं च यदा पश्यति।
तदा तस्मिन् काले ब्रह्म संपद्यते। ब्रह्मैव भवति॥ ३० एकस्य आत्मनः सर्वदेह
स्थत्वे तथापि संसारावस्थायां देहसंबंधिनिमित्तैः कर्मभिः तत्फलैः सुख
दुःखादिभिः वैषम्यं स्यात् इति तर्कः समदर्शनमिति तत्राह॥ अनादि
त्वान्निर्गुणत्वात् परमात्मायमव्ययः। शरीरस्थोऽपि कौन्तेय न करोति न
लिप्यते॥ ३१ हे कौन्तेय अयं परमात्मा अनादित्वात् कारणरहित १३१
त्वात् निरवयवत्वात् न स्वरूपतः व्येति। तत् अव्ययः। तथा नि

र्गुणत्वात् गुणक्षयेनापि न व्येति। तत् न अव्ययः। शरीरे उपलभ्यमानत्वात् श
रीरस्थः उच्यते। शरीरस्थोऽपि निष्क्रियत्वात् न करोति। अकारणात् कर्मफलेन न
लिप्यते। यः कर्ता स कर्मफलेन लिप्यते। अयं आत्मा तथा न॥ ३१ अकर्तृत्वे अ
लेपत्वे च दृष्टान्तमाह॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥ ३२ यथा सर्वगतमपि आका
शं सौक्ष्म्यात् सूक्ष्मभावात् न उपलिप्यते। केनापि पङ्केन संबध्यते
तथा सर्वत्र सर्वस्मिन् देहे अवस्थितोऽपि आत्मा अतिसौक्ष्म्यात् नोप
लिप्यते॥ ३२ असंगत्वात् लेपो नास्तीत्यत्र आकाशं दृष्टान्तः। प्रकाशत्वात्
प्रकाश्यधर्मैर्न युज्यत इति रविदृष्टान्तमाह॥ यथा प्रका

शयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥३३
हे भारत यथा रविः एकः सन् इमं कृत्स्नं लोकं युगपत् प्रकाशयति। तथा रविवत् क्षे-
त्री आत्मा एकः सन् कृत्स्नं क्षेत्रं सादाकार्थं युगपत् प्रकाशयति॥३३ अध्यायार्थ-
मुपसंहरति॥ क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा। भूतप्रकृतिमोक्षं च ये
विदुर्यान्ति ते परं॥३४॥ ये क्षेत्रक्षेत्रज्ञयोः यथाप्रदर्शितप्रकारेण अन्तरं इत-
रेतरं असादृश्यविशेषं ज्ञानचक्षुषा शास्त्राचार्योपदेशजनितज्ञा-
नचक्षुषा पुनः भूतप्रकृतिमोक्षं भूतानां प्रकृतिः अविद्या
अव्यक्ताख्या तस्याः मोक्षणं अभावगमनं च विदुः ते परं ब्रह्मस्वरू-
पं यान्ति प्राप्नुवन्ति॥३४ इति श्रीभगवद्गीताभाष्ये क्षेत्रनिदर्शनो नाम त्रयो- १३२
दशोऽध्यायः॥

॥ ईश्वराधीनयोः क्षेत्रक्षेत्रज्ञयोः जगत्कारणत्वं न तु सांख्यानामिव स्वतन्त्रयोः कारणं गु-
णसंगोऽस्य चानेन गुणसंगस्य संसारकारणत्वमुक्तं। तत्र कस्मिन् गुणे कथं संगः के
वा गुणाः कथं बध्नन्तीति गुणेभ्यश्च मोक्षणं कथं स्यात्। मुक्तस्य किं लक्षणमित्येवमर्थं प्र-
ध्यायारम्भे प्राप्नेस्तति पूर्वं वक्ष्यमाणमर्थं स्तौति। परं भूय इति द्वाभ्यां॥ श्रीभगवा-
नुवाच॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं। यत् ज्ञात्वा मुनयः सर्वे परां सि-
द्धिमितो गताः॥१ भूयः पुनरपि ज्ञानानां यज्ञादिज्ञेयवस्तुविषयाणां परं वस्तुवि-
षयत्वात् परं उत्तमफलत्वात् उत्तमं ज्ञानं प्रवक्ष्यामि। यत् ज्ञानं ज्ञात्वा प्राप्य म-
र्वे मुनयः इतो अस्मात् देहबन्धनात् परां सिद्धिं गताः॥१ इदं ज्ञानमुपा-
श्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥२ ज्ञान-
साधनानुष्ठानात् इदं यथोक्तं ज्ञानं उपाश्रित्य प्राप्य मम साधर्म्यमा-

गतां मत्स्वरूपतां प्राप्ताः सर्गेऽपि सृष्टिकालेऽपि नोपजायंते न जन्यंते । पुनः प्रल
यब्रह्मणः नाशकाले न व्यथंति न चलंति । रदेत्रदे संयोगाद् ईश्वराधीन
एव जगत्कारणं न स्वतंत्र इत्याह ॥ मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्य
हं । संभवः सर्वभूतानां ततो भवति भारत ॥३॥ मदीयं महद्ब्रह्म स्वविकारा
णां भरणात् सर्वकार्येभ्यो महत्त्वाच्च महद्ब्रह्म सर्वभूतानां योनिः त्रिगुणा
त्मिका माया । मम मदीयाः अहं तस्मिन् महति ब्रह्मणि स्था नो मायायां गर्भं
सर्वभूतानां ततः संभवो भवति । न केवलं सृष्ट्युपक्रम एव ततः क्षिप्तितो
प्रकृतिपुरुषौ भूतोत्पत्तिहेतू अपि तु सर्वदैवेत्याह ॥ सर्वयोनि
षु कौंतेय मूर्तयः संभवंति याः । तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता । १२३
४ । हे कौंतेय सर्वयोनिषु देवपितृमनुष्यपशुमृगादियोनिषु याः

मूर्तयः देहाकारविशेषाः संभवंति तासां मूर्तीनां महद्ब्रह्म माया त्रिगुणात्मि
का योनिः कारणं अहं बीजप्रदः गर्भाधानकर्ता अत एव पिता ॥४ तदेवं परमेश्वर
योनिभ्यां प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिं निरूप्य इदानीं ते गुणाः कथं बध्नंती
ति तमर्थं निरूपयन् प्रसंगेन पुरुषस्य संसारं प्रपंचयति सत्त्वमित्यष्टादश
भिः ॥ सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः । निबध्नंति महाबाहो देहे
देहिनमव्ययं ॥५ हे महाबाहो सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः भगवन्मा
यया संभूताः अव्ययं अपरि तं देहिनं आत्मानं देहे शरीरे निबध्नंति स्वाधी
नमिव कुर्वंति ॥५ तत्र सत्त्वस्य लक्षणं बंधकत्वप्रकारं चाह ॥ तत्र सत्त्वं निर्म
लत्वात् प्रकाशकमनामयं । सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥६
हे अनघ अव्यसन तत्र तेषां सत्त्वादीनां त्रयाणां मध्ये सत्त्वं स्फटिक

इव निर्मलत्वात् प्रकाशकं। अनामयं निरुपद्रवं। सुखसंगेन ज्ञानसंगेन च सुखी अहं ज्ञा
नी इति विषयभूतस्य सुखस्य ज्ञानस्य च विषयिण्या तन्निबध्नाति। मृषासंश्लेषं करो
ति।६ रजसो लक्षणं बंधकत्वं चाह॥ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं तन्नि
बध्नाति कौंतेय कर्मसंगेन देहिनं ७ हे कौंतेय तृष्णासंगसमुद्भवं रजः रंजनात् रागा
त्मकं जानीहि। तद्रजो देहिनं आत्मानं कर्मसंगेन दृष्टादृष्टार्थेषु कर्मसु संगेन उग
र तया निबध्नाति ७ तमसो लक्षणं बंधकत्वं चाह॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्व
देहिनां। प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ८ हे भारत तु पुनः तमः अ
ज्ञानजं अज्ञानाज्जातं सर्वदेहिनां मोहनं मोहकरं विद्धि जानीहि तत् तमः प्र
मादालस्यनिद्राभिः देहिनं निबध्नाति। ८ पुनः सत्वादीनां स्वस्वकार्यकर १३४
णसामर्थ्यातिशयं संक्षेपेनाह॥ सत्वं सुखे संजयति रजः कर्मणि

४५ द्वावपि अभिभूय सत्वं उद्भवति वर्द्धते तदा ज्ञानसुखादि स्वकार्यं करोति। सत्वं च अन्यत् तमः ५
भारत। ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत॥९ हे भारत सत्वं सुखे देहिनं
संजयति संश्लेषयति। रजो गुणः देहिनं कर्मणि संश्लेषयति। तु पुनः तमोपि ज्ञा
नं आवृत्य देहिनं प्रमादे संश्लेषयति। ९ गुणानां स्वस्वकार्यकरणे अवस्था
विशेषं दर्शयन्नाह॥ रजस्तमश्चाभिभूय सत्वं भवति भारत। रजः सत्वं त
मश्चैव तमः सत्वं रजस्तथा॥१० हे भारत रजः च अन्यत् तमः द्वावपि अभिभूय
रजः उद्भवति तदा कर्मतृष्णादि स्वकार्यं मारभ्यते। तथा सत्वं रजः उभावपि अभिभूय
तमः उद्भवति तदा ज्ञानावरण प्रमादादि स्वकार्यं मारभन्ते।१० इदानीं सत्वा
दीनां प्रवृद्धानां लिंगानि उपदिशन् तत्र प्रथमं सत्वस्य प्रवृद्धस्य लिंगमाह॥ ॥
सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते। ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमि
त्युत॥११ यदास्मिन् देहे सर्वद्वारेषु श्रोत्रादिषु बुद्ध्यर्थापारः प्रकाशरूपः

ज्ञानाख्य उपजायते। तदा एतेन प्रकाशलिंगेन सत्त्वं प्रवृद्धं इत्यपि विद्यात्॥११॥ रजसः उद्भूत
स्य प्रवृद्धस्य लिंगमाह॥ लोभः प्रवृत्तिः आरंभः कर्मणामशमः स्पृहा। रजस्येता
नि जायंते विवृद्धे भरतर्षभ॥१२॥ हे भरतर्षभ रजसि विवृद्धे एतानि लिंगानि जा
यंते। लोभः परद्रव्यादीनां इच्छा। अबुद्धिपूर्विका चेष्टा प्रवृत्तिः। आरंभः कर्मविशेष
णोपक्रमः। अशमः हर्षरागादिप्रवृत्तिः। सर्वसामान्यवस्तुविषया तृष्णा स्पृ
हा॥१२॥ तमसः प्रवृद्धस्य लिंगमाह॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव
च। तमस्येतानि जायंते विवृद्धे कुरुनंदन॥१३॥ हे कुरुनंदन तमसि प्रवृद्धे एतानि लिं
गानि जायंते। अप्रकाशः अविवेकः। अस्थैर्यं अप्रवृत्तिश्च। प्रमादः प्रस्ताना
वः। मोहो मूढता॥१३॥ मरणकालेऽपि सत्त्वादीनां प्रवृद्धानां फलविशेषमाह॥ य १३५
दा सत्त्वे इति द्वाभ्यां॥ यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्। तदो

त्तमविदां लोकान् अमलान् प्रतिपद्यते। तु पुनः देहभृत् आत्मा सत्त्वे प्रवृद्धे यदा प्रल
यं मरणं प्रयाति तदा उत्तमविदां हिरण्यगर्भादिविदां अमलान् लोकान् प्रतिपद्य
ते प्राप्नोति॥१४॥ रजसि प्रलयं गत्वा कर्मसंगिषु जायते। तथा प्रलीनस्तम
सि मूढयोनिषु जायते। रजसि प्रवृद्धे प्रलयं मरणं गत्वा कर्मसंगिषु कर्मासक्ति
युक्तेषु मनुष्येषु जायते। उत्पद्यते। तथा तमसि प्रलीनो मृतः मूढयोनिषु पश्वादि
षु जायते॥१५॥ सत्त्वादीनां स्वानुरूपकर्मद्वारेण विचित्रफलदत्वमाह॥ क
र्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलं। रजसस्तु फलं दुःखमज्ञानं तमसः
फलं॥१६॥ सुकृतस्य सात्त्विकस्य कर्मणः सात्त्विकं निर्मलं फलमाहुः॥ रजसः राज
सस्य कर्मणः दुःखं फलमाहुः॥ तमसः तामसस्य कर्मणः अज्ञानं फलमा
हुः॥१६॥ इदानीं सत्त्वादीनां कार्यविशेषं दर्शयति॥ सत्त्वात्संजाय

ते ज्ञाने रजसो लोभ एव च। प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥१७ सत्वा
त् प्रवृद्धात् ज्ञानं संजायते उत्पद्यते। रजसः प्रवृद्धात् लोभः उत्पद्यते
तमसः प्रवृद्धात् प्रमादमोहौ भवतः। अज्ञानं च भवति।१७ इदानीं सत्वादिगुण
विशेषदर्शिनां पारलौकिकं फलविशेषमाह॥ ऊर्ध्वं गच्छंति सत्वस्था
मध्ये तिष्ठंति राजसाः। जघन्यगुणवृत्तस्था अधो गच्छंति तामसाः॥१८ सत्वस्थाः
सत्वगुणवृत्तस्थाः ऊर्ध्वं देवलोकादिषु गच्छंति जायंते। राजसाः रजो
गुणवृत्तस्थाः मनुष्येषु जायंते। जघन्यगुणस्तमः तस्य वृत्ते प्रमादा
लस्यादि तत्र स्थिताः मूढास्तामसाः अधो गच्छंति पश्वादिषु जायंते।१८
॥सत्वं रजस्तम इत्याख्यागुणस्वरूपं गुणवृत्तं स्ववृत्तेन गुणानां बंधक १२६

त्वं गुणवृत्तिनिबद्धस्य पुरुषगतिविशेषाः इत्येतत्सर्वं अज्ञानमूलं बंधकारणं विस्तरे
णोक्त्वा इदानीं तद्विवेकेन सम्यक्दर्शनात् मोक्षं दर्शयति॥ नान्यं गुणेभ्यः
कर्तारं यदा द्रष्टाऽनुपश्यति। गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति।१९ यदा द्र
ष्टा कर्तारं गुणेभ्यः सत्वादिभ्यः देहेंद्रियविषयाकारपरिणतेभ्यः अन्यं न प
श्यति। वकुनः गुणेभ्यः परं देहेंद्रियादिव्यापाराणां साक्षिणं वेत्ति स द्रष्टा म
द्भावं अधिगच्छति।१९ ब्रह्मभावाधिगमप्रकारमाह॥ गुणानेतानती
त्य त्रीन् देही देहसमुद्भवान्। जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते
२० देही विद्वान् एतान् मायोपाधिभूतान् त्रीन् सत्वादीन् गुणान् देहसमुद्भवान्
देहोत्पत्तिबीजभूतान् अतीत्य जीवन्नेव अतिक्रम्य जन्ममृत्युजरा

दुःखैः। जन्ममृत्युजरादुःखैर्विमुक्तः सन् अमृतं मोक्षं अश्नुते प्राप्नोति॥२०॥ जीवन्नेव गुणा-
नतीत्य अमृतं अश्नुते इति श्रुत्वा गुणातीतलक्षणं स्वगुणात्ययोपायस्य च बु-
बुत्सया अर्जुन आह। कैर्लिंगैरिति। पूर्वार्द्धेन गुणातीतस्य लक्षणं पृच्छति।
उत्तरार्द्धेन गुणातीतस्याचारं पृच्छति। अर्जुन उवाच॥ कैर्लिंगैस्त्रीन् गुणानेतान्
अतीतो भवति प्रभो। किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते॥२१॥ हे प्र-
भो कैर्लिंगैश्चिह्नैः एतान् त्रीन् गुणान् अतीतो भवति गुणातीतो लक्ष्यते।
किमाचारः केन आचारेण कथं च केन प्रकारेण एतान् त्रीन् गुणान् अतिव-
र्तते गुणातीतत्वं प्राप्नोति॥२१॥ द्वितीयस्य आद्यप्रश्नस्य कान्ताभ्यां याह
...प्रकाशं चेत्यादिना द्वितीयस्यापि पुनर्विशेषबुभुत्सया पृ- १३
च्छतीति ज्ञात्वा प्रकारान्तरेण तस्य लक्षणादिकमाह। भगवान्

प्रकाशं चेत्यादि सप्तभिः। यद्वा यत् कैर्लिंगैर्युक्तो गुणातीतो भवतीति पृष्टं तस्यो-
त्तरं प्रकाशं चेति॥ श्रीभगवानुवाच॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव। न द्वे-
ष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति॥ हे पाण्डव। प्रकाशं सत्त्वस्य कार्यं प्रवृत्तिं
रजसः कार्यं। मोहं तमसः कार्यं। एतानि त्रीणि सत्त्वादिकार्याणि संप्रवृत्तानि न
द्वेष्टि निवृत्तानि अप्राप्तानि न कांक्षति स गुणातीतः॥२२॥ तस्य लक्षणमुक्त्वा
किमाचार इति द्वितीयप्रश्नस्योत्तरमाह॥ उदासीनवदासीनो गुणैर्यो
न विचाल्यते। गुणा वर्तन्त इत्येव योऽवतिष्ठति नेंगते॥२३॥ यः संन्यासी उदासी-
नवत् यथा उदासीनः कस्यापि पक्षं न भजते तद्वदासीनः गुणातीतत्वोपा-
यमार्गे अवस्थितः गुणैर्न विचाल्यते गुणाः देहेन्द्रियविषयाद्याकार-

परिणतानां अन्योन्यस्मिन्नुवर्त्तंते इति योऽवतिष्ठति नेंगते न चलति॥२३
समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः। तुल्यप्रियाप्रियो धीरस्तुल्यनिंदा
त्मसंस्तुतिः॥२४ समदुःखसुखः। समे दुःखसुखे यस्य सः। स्वात्मनि स्थितः
स्वस्थः। समलोष्टाश्मकांचनः समानि तुल्यानि लोष्टाश्मकांचनानि यस्य सः। तुल्य
प्रियाप्रियः। तुल्ये प्रियाप्रिये यस्य सः। धीरः धीमान्। तुल्य आत्मनिंदा आत्मस्तुति
र्यस्य स तुल्यनिंदात्मसंस्तुतिः॥२४ मानापमानयोस्तुल्यस्तुल्यो मित्रारिप
क्षयोः। सर्वारंभपरित्यागी गुणातीतः स उच्यते॥२५ यः मानापमानयोस्तुल्यः।
समः निर्विकारः मित्रारिपक्षयोः समः तुल्यः समः। सर्वारंभपरित्यागी दृष्टा
दृष्टार्थ कर्मारंभपरित्यागी स गुणातीतः उच्यते॥२५ अधुना कथं त्रीन् गु

णान् अतिवर्त्तते इति प्रश्नस्य प्रतिवचनमाह। मां च योऽव्यभि[illegible]योगेन
सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥२६ स जनः
यः यतिः कर्मी वा मां ईश्वरं सर्वभूतहृदिस्थितं नारायणं भक्तिः सेवयोगः तेन
भक्तियोगेन विवेकविज्ञानरूपेण अव्यभिचारेण अनन्यविषयत्वेन सेव
ते। स एतान् गुणान् समतीत्य ब्रह्मभूयाय ब्रह्मभावाय मोक्षाय कल्पते
समर्थो भवति॥२६ भगवति अव्यभिचरित भक्तियोगेन ब्रह्मभावप्राप्तौ
हेतुमाह॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च। शाश्व
तस्य च धर्मस्य सुखस्यैकांतिकस्य च॥२७ हि यस्मात् अहं ब्रह्मणः
परमात्मनः प्रतिष्ठा। अमृतादिप्रयोजनायं यथा ईश्व

रुश्चतया ब्रह्म प्रतिष्ठते प्रवर्त्तते सा शक्तिः प्रतिष्ठाहं। अथवा ब्रह्मणः ब्रह्म
शब्दवाच्यस्य सगुणब्रह्मणः प्रपंचस्य प्रतिष्ठा आश्रयः। निर्गुणस्य वो
पाधिरहितं परं ब्रह्म अहं। किं लक्षणस्य ब्रह्मणः अमृतस्य अमरणधर्म
कस्य। अव्ययस्य व्ययधर्मरहितस्य। चत्र अन्यत् शाश्वतस्य नित्यस्य
धर्मस्य ज्ञाननिष्ठा लक्षणस्य च पुनः शाश्वतधर्म ऊनितस्य सुख
स्य। ऐकांतिकस्य एकांतनियतस्य अहं प्रतिष्ठा। आश्रयः॥२७
इतिश्री भगवद्गीतान्नाष्टे प्रकृतिगुणभेदे नाम चतुर्दशोऽध्यायः॥ १३७

यस्मात् मदधीनं ज्ञानिनां कर्मिणां च ज्ञानफलं कर्मफलं च। अतो ये मां भक्तियो
गेन सेवंते। ते मत्प्रसादात् ज्ञानप्राप्तिक्रमेण गुणातीता मोक्षं लभंते। परमा
र्थतत्त्वं सम्यक् विजानंतः मोक्षं लभंते इत्यत्र किं वक्तव्यमित्याशयवान् अर्जु
नेनापृष्टमपि पंचदशाध्याये परमार्थतत्त्वं दिदर्शयिषुः अविरक्तस्या
तत्त्वज्ञानाधिकारात् विराग्यं जननार्थं प्रथमं तावत् सार्द्धश्लोकाभ्यां संसार
स्वरूपं वृक्षरूपकालंकारेण दर्शयन्नाह॥ श्रीभगवानुवाच॥ ऊर्द्ध
मूलमधःशाखमश्वत्थं प्राहुरव्ययं छंदांसि यस्य पर्णानि यस्तं वेद स वेद
वित्॥१ ऊर्द्धं उपरि काले वर्त्तमानो अथवा स्वदेश[illegible]त् कारणत्वात् नित्यत्वा
त् महत्त्वाच्च। ऊर्द्धं उत्कृष्टं अव्यक्तं ब्रह्म मूलं कारणं अस्येति ऊ तं

ऊर्ध्वमूलो संसारवृक्षो। अधःशाखं महदहंकारपंचतन्मात्राणि पंचमहाभूतानि
एकादशेंद्रियाणि एते चतुर्विंशति प्रकृतिविकाराः। अस्य संसारवृक्षस्य शाखा
इव मूलकारणापेक्षया अर्वाक्कृतानि सृष्टानि वर्त्तत इति अधःशाखः तं
अधःशाखं। अश्वत्थं। श्वोपि न स्थाता क्षणविध्वंसी इति अश्वत्थः तं। अव्ययं
कारणस्य अनादित्वात् ब्रह्मज्ञानपर्यंतं अविच्छेदात् देहादिसंतान
स्य इति अव्ययः तं। छंदांसि ऋग्यजुःसामाथर्वलक्षणानि वचांसि वेदाः
यस्य संसारवृक्षस्य पर्णानीव धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात् संसार
वृक्षं परिरक्षंतीति पर्णानि यथा वृक्षस्य पर्णानि। यस्तं संसारवृक्षं वेद स १५॥
वेदवित् वेदार्थवित्। नहि समूलात् संसारवृक्षात् अन्यत् ज्ञातव्यं विद्य
ते। अतः सर्ववित् इ०॥१॥ तस्यैव संसारवृक्षस्य अवयवकल्पना

मामाह। अधश्चेति। पूर्वोक्तस्य पूर्वपरममूलकारणमुक्तं ऊर्ध्वमूलमिति इदा
नीं अवांतरीयकर्मफलजनितरागद्वेषादिवासनाअवांतरकारणत्वेनाह अध
अधश्च मूलेति। अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्र
वालाः। अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके। तस्य सं
सारवृक्षस्य पूर्वोक्ताः शाखाः अधः मनुष्यलोकमारभ्य स्थावरपर्यंतं। ऊर्ध्वं
मनुष्यलोकादारभ्य हिरण्यगर्भलोकपर्यंतं स्वकर्मज्ञानानुसारेण ज्ञान
कर्मफलभूताः शाखा इव प्रसृताः गुणैः सत्वरजस्तमोभिः प्रवृद्धाः स्थू
लीकृताः। विषयप्रवालाः विषयाः शब्दादयः कर्मफलेभ्यः देहादिभ्यः
संसारवृक्षस्य अंकुरीभवंतीति विषयप्रवालाः शाखाः। अधश्च म

लानि वर्त्तमानदेहापेक्षया पश्चाद्भावीनि यथाकर्म फलवासनाप्रधः अथवा मूला
वर्त्तमानदेहारंभक धर्माधर्मप्रवृत्तिहेतुत्वात्। मूलानि वर्त्तमानसंसारव
स्य कारणानि मनुष्यलोके अनुसंततानि मनुष्यदेहोपार्जितानि क
र्मानुबंधीनि कर्म धर्माधर्मलक्षणं अनुबंधः पश्चाद्भावि येषां तानि वा
सनानुरूपं कर्म आरभ्यते पुनः मानुषं रूपमस्येह तथोपलभ्यते नां
तो न चादिर्न च संप्रतिष्ठा। अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण
दृढेन छित्वा। २। योयं संसारवृक्षो वर्णितः अस्य इह लोके यथा वर्णितं
रूपं नोपलभ्यते वस्तुतः नांतः न आदिः। न संप्रतिष्ठा स्थितिः। मध्यं न १५३
केनचिन्नोपलभ्यते। एनं संसारवृक्षं असंगशस्त्रेण पुत्रवित्तलोके

षणाभ्यो व्युत्थानेन वैराग्येण दृढेन परमात्माभिमुख्यनिश्चयदृढीकृतेन पुनःपु
नः विवेकाभ्यासाश्मनि शितेन शस्त्रेण एनं सुविरूढमूलं नानाप्ररोहगाढ
मूलं संसारवृक्षं छित्वा समूलमुन्मूल्य। २ ततः पदं तत्परिमार्गितव्यं यस्मिन्
गता न निवर्त्तंति भूयः। तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पु
राणी। ४ ततः पश्चात् तत् वैष्णवं पदं परिमार्गितव्यं ज्ञातव्यं यस्मिन् गताः प्रवि
ष्टाः भूयः पुनरपि संसाराय न निवर्त्तंते परिमार्गणप्रकारमाह। तं पदशब्द
वाच्यं आद्यं पुरुषं अहं प्रपद्ये तच्छरणं व्रजामीति ज्ञेयं। यतः संसारवृक्षस्य
प्रवृत्तिः चिरंतनी प्रसृता निःसृता। ४ अथ च पदप्राप्तौ साधनान्युपदिशति
निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः। द्वंद्वैर्विमुक्ताः

सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत्॥ निर्मानमोहाः मानमोहान्त्यां नि
र्जिताः जितसंगदोषाः संग एव दोषः जितः यैः ते जितसंगदोषाः अध्यात्मनित्याः
परमात्मस्वरूपालोचनपराः अध्यात्मनित्याः विनिवृत्तकामाः विनिवृत्तः कामो
येषां ते। सुखदुःखसंज्ञैः द्वंद्वैः विमुक्ताः अमूढाः ज्ञानिनः तत् अव्ययं विष्णोः प
दं गच्छंति॥५ तदेव पदं विशिनष्टि विशेषतो दर्शयति। न तद्भासयते सूर्यो न
शशांको न पावकः॥ यद्गत्वा न निवर्त्तंते तद्धाम परमं मम॥६ सर्वावभासकोऽ
पि सूर्यः तद्धाम वैष्णवं तेजोरूपं पदं भासयितुं न समर्थः॥ आदित्यास्तम
ये रात्रौ सर्वावभासकः पूर्णचंद्रोऽपि तद्भासयितुं असमर्थः। तद्धाम वैष्णवं
पदं गत्वा प्राप्य न निवर्त्तंते। पुनः संसारिणो न भवंति। यत् सूर्यादिभिर्न भास्य १४२
ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ त्वात् तद्धाम परमं प्रकृष्टं पदं मम विष्णोः॥६ ऽऽऽ
योरभ वनिविडांधकारे सर्वविषयप्रकाशकोऽग्निरपि तद्धाम भासयितुं असमर्थः॥ तद्धामेत्यके

ननु सर्वोद्विर्गतिरागमनांता। कथं तद्धामगतानां नास्ति निवृत्तिरित्यत्र संसा
रिस्वरूपं दर्शयन् कारणमाह। ममैवांशो जीवलोके जीवभूतः सना
तनः॥ मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति॥७ मम परमात्मनः अंशो
भागः अवयवः एकदेशः जीवलोके संसारे जीवभूतः कर्त्ता भोक्तेति प्रसि
द्धः सनातनः चिरंतनः मनःषष्ठानि श्रोत्रादीनि इंद्रियाणि पंच प्रकृतिस्था
नि स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि संसारे व्यक्रामन् कर्षति आ
कर्षयति यथा जलसूर्यकः सूर्यांशो जलस्य निमित्तस्य अपाये सूर्य
मेवागच्छति न निवरूपेण पुनरागच्छति यथा वा घटाद्युपाधिपरिच्छिन्नो
घटाकाशः सुखाकाशांशः घटादेर्निमित्तस्यापाये मुख्याकाशं प्रा
प्य न निवर्त्तते। एवं मायालिंगवशाज्जीवः छिन्नपरमात्मनः अंशः। तयोः मा

या लिंगशरीरयोरपाये परमात्मस्वरूपं ज्ञानाय न निवर्त्तत इत्युक्तं। लिंग
शरीरं। एकादशेंद्रियाणि पंचवायवः बुद्धिरहंकारश्च। एतावल्लिंगशरीरं। पंच
तन्मात्राण्यपि लिंगशरीरमिति केचित्॥७ कदाकर्षति आकृष्य च किं करोती
त्याह॥ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः। गृहीत्वैतानि संयाति
वायुर्गंधानिवाशयात्॥८ ईश्वरो देहादिसंघातस्वामी जीवः। यच्चापि अपि च
यदा शरीरात् उत्क्रामति। यत् यदा पूर्वस्मात् शरीरात् शरीरांतरं प्राप्नोति।
तदा एतानि मनःषष्ठानि इंद्रियाणि गृहीत्वा सम्यक् याति गच्छति। तत्र दृ
ष्टांतः। वायुः आशयात् पुष्पादेः गंधानिव॥ पूर्वोक्तानि इंद्रियाणि ते
दनदर्शयन् यदर्थं गृहीत्वा याति जीवः। तदपि दर्शयति॥ श्रोत्रं चक्षुः १५३
स्पर्शनं च रसनं घ्राणमेव च। अधिष्ठाय मनश्चायं विषयानुपसेवते॥९

अयं जीवः देहस्थः श्रोत्रं चक्षुः स्पर्शनं। त्वक् पुनः रसनं घ्राणं एतानि पंच श्रोत्रादी
नि इंद्रियाणि मनस्सार्द्धं षट् प्रत्येकं इंद्रियमधिष्ठाय विषयान् शब्दादीन् उप
सेवते भुंक्ते॥९ ननु देहेंद्रियादिसंघातव्यतिरेकेण एवंभूतमात्मानं सर्वे किं
न पश्यंति तत्राह॥ उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं। विमूढा नानु
पश्यंति पश्यंति ज्ञानचक्षुषः॥१० एवं देहगतं जीवं पूर्वदेहादुत्क्रामंतं अपि वा स्थितं
तस्मिन् वर्त्तमाने अथवा शब्दादीन् विषयान् भुंजानं उपलभमानं गुणान्वितं गु
णकार्यैः सुखदुःखमोहाद्यैः अन्वितं युक्तं। एवंभूतं अत्यंतदर्शनगोचरप्राप्तम
पि विमूढाः दृष्टादृष्टविषयभोगवासनाकृष्टचित्ततया अनेकधा मूढाः न
अनुपश्यंति। अहो कष्टमिति आक्रोशति भगवान्। ये पुनः प्रमाणजनितज्ञानचक्षु

नः विविक्तदृष्टयः ते एनं न पश्यंति ॥१०॥ अतिदुर्विज्ञेयत्वात् आत्मनः विवेकिष्वपि केचि-
द् वस्तुतत्त्ववितिनः पश्यंति नेतरे इत्याह ॥ यतंतो योगिनश्चैनं पश्यंत्यात्मन्य-
वस्थितं यतंतोप्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥११॥ च पुनः योगिनः समाहि-
तचित्ताः यतंतः यत्नं कुर्वंतः एनं प्रकृतं आत्मानं स्वात्मनि स्वस्वबुद्धौ अवस्थि-
तं पश्यंति अनुभवंति अकृतात्मानः अयतेंद्रियाः अशांतदर्पाः अचेतसः
अविवेकिनः शास्त्रादिप्रमाणैः आत्मविचारं कुर्वंतोपि एनं आत्मानं स्वबु-
द्धौ स्थितमपि न पश्यंति ॥१०॥ संसारिणो अन्तावमर्शकाः संसारिस्वरू-
पं देहादिव्यतिरिक्तं दर्शितं इदानीं तमेव परमेश्वरं रूपं यत्सर्वस्यावभास-
कं यन्न केनचिद्वभास्यते यत्प्राप्य न निवर्त्तते तत् अनंतशक्तिश्चेन सर्वा- १४४

त्मत्वेन निरूपयति ॥ यदादित्येति चतुर्भिः ॥ यदादित्यगतं तेजो जगद्भासयते-
ऽखिलं । यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं ॥१२॥ यत् आदित्यगतं तेजः अखिलं अशे-
षं समस्तं जगत् भासयते । यत् चंद्रमसि यत् अग्नौ तत् तेजः मामकं मदीयं त्वं विद्धि
अथवा यत् आदित्यादिगतं तेजः चैतन्यरूपं येन चैतन्येन आदित्यादयो ज्ञा-
यंते अथवा येन चैतन्येन सूर्यादयः सर्वे अनुभवंति तत् चैतन्यं ज्ञानं मदी-
यं मम विष्णोः विद्धि जानीहि ॥१२॥ किंच ॥ गामाविश्य च भूतानि धारयाम्य-
हमोजसा । पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥ च पुनः अहं गां
पृथ्वीं आविश्य ओजसा तेजः बलं कामरागविवर्जितं ऐश्वरं यत् जगद्धारणार्थं प्र-
विष्टं मामाविष्टं । येन गुर्वी पृथ्वी नाधः पतति न विशीर्यते । तेन ओजसा बलेन
ऐश्वर्यरूपेण भूतानि चराचराणि धारयामि । किंच रसात्मकः रस-

स्वभावः। सर्वरसानामाकरः सोमः सन् पृथिव्यां जाताः सर्वाः ओषधीः व्रीहियवा
द्याः पुष्णामि पुष्टिमतीः रसस्वादुमतीश्च करोमि। स्वात्मरसानुप्रवेशेन॥१३॥ किंच

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्य
न्नं चतुर्विधं॥१४॥ अहमेव वैश्वानरः औदर्यः अग्निर्भूत्वा प्राणिनां प्राणवतां
देहं आश्रितः प्रविष्टः सन् प्राणापानाभ्यां संयुक्तः चतुर्विधं अन्नं। भोज्यं ले
ह्यं चोष्यं भक्ष्यं चेति चतुर्विधं पचामि। तस्य पाकं करोमि॥१४॥ किंच स
र्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च। वेदैश्च सर्वैरह
मेव वेद्यो वेदांतकृद्वेदविदेव चाहं॥१५॥ च पुनः अहं सर्वस्य प्राणिजात
स्य [illegible] सन् हृदि बुद्धौ संनिविष्टो वर्ते। अतः मत्तः आत्मनः सका १५५
शात् सर्वप्राणिनां ज्ञानस्मृती भवतः। तयोः अपोहनं अभावश्च भवति।

तत्र [illegible] ये पुण्यकर्माणः तेषां पुण्यकर्मानुरोधेन ज्ञानस्मृती भवतः। तथा ये
पापकर्माणः तेषां पापकर्मानुरूपेण स्मृतिज्ञानयोः अपोहनं अपगमः अभा
वो भवति। च पुनः सर्वैः वेदैः अहमेव परमात्मा वेद्यो वेदितव्यः। तथा वेदांत
कृत् वेदांतार्थसंप्रदायकृत्। च पुनः वेदवित् वेदार्थवित् अहमेव नान्यः॥१५॥
यदादित्यगतमित्यादिभिः भगवतो नारायणस्य विभूतिसंक्षेप उक्तः।
इदानीं सर्वमेव अतीतानागतार्थं यार्थं जातं त्रिधा राशीकृत्य दूरादक्षरोपाधि प्र
विभक्त तया निरुपाधिस्वरूपं निर्दिधारयिषया भगवत उत्कृष्टतमत्वं प्रतिपाद
नाय आहो उत्तरो ग्रंथः द्वाविमाविति त्रयः श्लोकाः॥ द्वाविमौ पुरुषौ लोके क्षरश्चा
क्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥१६॥ लोके संसारे क्षरो
विनाशी एको राशिः पुरुषः। अपरः तद्विपरीतः अविनाशी अक्षराख्यः कस्य

रूपस्य उत्पत्तिबीजं प्रलयावधि पुरुषने कर्मसारि जंतु कामकर्मादिसंस्काराश्रयः
राशिः पुरुषः। तौ इमौ पृथक् राशीकृतौ पुरुषौ व्यपदिश्येते। तास्वयमेव विविच्य दर्शय
ति। उत्तरार्द्धेन भगवान्। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। समस्तं वि
कारजातं जगत् क्षरः पुरुषः। कूटस्थः कूटो राशिः तद्भूतः स्थितः। अथवा कूटो माया
वंचनं तद्रूपेण स्थितं न क्षरतीत्यर्थः। संसारबीजं द्वितीयः पुरुषः। १६ यदर्थौ
क्षराक्षरौ लक्षितौ तमाह॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। १ यो लो
कत्रयमाविश्य बिभर्त्यव्यय ईश्वरः। १७ उत्तमः उत्तमः पुरुषः अन्यः। एताभ्यां क्षरा
क्षराभ्यां विलक्षणः। क्षराक्षरोपाधिद्वयदोषेण असंस्पृष्टः नित्यशुद्धबुद्धमुक्त
स्वभावः उत्तमः उत्कृष्टतमः पुरुषः अन्यः। एताभ्यां अत्यंतविलक्षणः। पुरुषद्वयात् १४६

॥ परम उत्कृष्टश्चासावात्मा च सर्वभूतानां प्रत्यगात्मा अतः वेदांतेषु परमात्मा इति उक्तः। यः ईश्वरः
सर्वज्ञः ईशनशीलः लोकत्रयं भूर्भुवः स्वराख्यं प्रविश्य स्वकीयबलशक्त्या स्वरूप
सद्भावमात्रेण धारयति। १७ स्वकीयपुरुषोत्तमनामनिर्वचनेन स्वात्मनि निरति
शयैश्वर्यं दर्शयति भगवान्। यस्मादिति। यस्मात्क्षरमतीतोऽहमक्षरादपि
चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः। १८ यस्मात् अहं क्षरं संसारमायावृ
क्षं अश्वत्थाख्यं अतीतः। अपि च अक्षरात् संसारबीजभूतादव्यक्तात्। अथास्य ता
दपि उत्तमः उत्कृष्टतमः ऊर्ध्वतमो वा। अतः क्षराक्षराभ्यां उत्तमत्वात् लोके वेदे च पुरुषो
त्तम इति विख्यातः। १८ इदानीं यथोक्तमात्मज्ञानस्य फलमाह॥ यो मामेवम
संमूढो जानाति पुरुषोत्तमं। स सर्वविद्भजति मां सर्वभावेन भारत। १९

हेतुत्वात्तयोः असंमूढः संमोहवर्जितः स मां ईश्वरं पुरुषोत्तमं एवं यथोक्तप्रका
रेण अहमस्मीति आत्मभावेन जानाति स सर्ववित् सर्वज्ञः सर्वभावेन सर्व
त्र आत्मवित्तया सर्वत्र आत्मभावेन भजति १९ अध्यायार्थं उपसंहरन् उक्त
स्य मोक्षफलस्य भगवत्तत्त्वज्ञानस्य स्तुतिमाह॥ इति गुह्यतमं शास्त्रमिद
मुक्तं मयानघ। एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत॥२० हे अनघ
मया इतीदं गुह्यतमं अत्यंतरहस्यं शास्त्रं सकलगीताशास्त्रार्थभू
तं अध्यायं पंचदशाध्यायरूपं तुभ्यं उक्तं। एतत् यथादर्शितार्थं ज्ञात्वा १४७
बुद्धिमान् स्यात्। भगवत्तत्त्वे ज्ञाते कर्तव्यं सर्वं परिसमाप्तं भवति॥२०
इति श्रीभगवद्गीताभाष्ये स्वरूपनिरूपणे पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः॥

× [illegible] ×

नवमे अध्याये दैवी आसुरी राक्षसी च इति प्राणिनां प्रकृतयः सूचिताः। तासां विस्तरेण
प्रदर्शनाय आत्मतत्त्वनिरूपणानंतरं अधिकारिणां दर्शयितुं दैवी मोक्षहेतुः इ
तरे बंधहेतू इति विवेचयन् दैवीं संपदमाह॥ भगवानुवाच॥ अभयमिति त्रिभिः॥
श्रीभगवानुवाच॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञ
श्च स्वाध्यायस्तप आर्जवं॥१ अभयं अभीरुता परवंचनमाया अनृतादिवर्ज
नं सत्त्वसंशुद्धिः शास्त्राचार्याभ्यां आत्मादिपदार्थानामवगमः ज्ञानं अवग
तानां आत्मादीनां इंद्रियादिभ्यः पृथक्करणे एकाग्रतया प्रत्यक्षकरणं योगः तयोः
ज्ञानयोगयोः विषये व्यवस्थितिः तन्निष्ठता। यथाशक्ति अन्नादिदानं बाह्येंद्रिया
णां निग्रहो दमः यज्ञः श्रौतो अग्निहोत्रादिः स्मार्तः पंचयज्ञादिः स्वगृह्योक्ताध्ययनं ब्रह्म

ध्यै स्वाध्यायः तपः शारीरादि वक्ष्यमाणं आर्जवं सर्वदा आर्जवं । अहिंसा सत्यमक्रोध
स्त्यागः शांतिरपैशुनं । दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलं ॥२॥ अहिंसेति अहिंसा ।
अनृतवर्जनं यथार्थभूतार्थवचनं सत्यं आप्तक्रोधस्य उपशमनं अक्रोधः । त्यागः स
र्वकर्मसंन्यासः । अंतःकरणस्य निग्रहः शांतिः । परस्य प्रकटीकरणं तदभावः अपैशु
नं । दुःखितेषु कृपा दया । विषयसन्निधावपि इंद्रियाणां अलोलत्वं । मार्दवं अक्रौर्यं ।
ह्री लज्जा । असति प्रयोजने वाक्पाणिपादादीनां अचंचलत्वं अचापलं ॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवंति संपदं दैवीमभिजातस्य भा
रत ॥३॥ वगतादीप्तिः तेजः । आक्रुष्टस्य ताडितस्य वाऽन्तर्विक्रियाभावः क्षमा । देहें
द्रियादीनामवष्टंभिका धृतिः । शौचं बाह्याभ्यंतरं च । अंतरं मायारागादि १५५
कालुष्याभावः । अहिंसनं च अद्रोहः । आत्मनः पूज्यातिशयभावना अ

भावः नातिमानिता । हे भारत एतानि अहिंसादीनि नातिमानितांतानि दैवीं संपदं अ
भिजातस्य देवविभूत्यर्हस्य भवंति ॥ अथ आसुरीं संपदमाह ॥ दंभो दर्पोऽतिमान
श्च क्रोधः पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ॥४॥ दंभः धर्मध्वजि
त्वं धनस्वजनादिनिमित्तोऽभिमानो दर्पः । आत्मनः पूज्यातिशयभावना अतिमानः । क्रो
धः अमर्षः । परुषवचनं पारुष्यं । अविवेकतो जातं मिथ्याज्ञानं अज्ञानं । एतानि आसुरीं
संपदं अभिजातस्य भवंति ॥४॥ एतयोः संपदोः कार्यमाह ॥ दैवी संपद्विमोक्षाय नि
बंधायासुरी मता । मा शुचः संपदं दैवीमभिजातोऽसि पांडव ॥५॥ हे पांडव यस्मात् दै
वी संपत् विमोक्षाय आसुरी संपत् निबंधाय संसाराय मता । त्वं दैवीं संपदं अ
भिलक्ष्य जातोऽसि अतः त्वं मा शुचः । शोकं मा कार्षीः ॥५॥ सर्वात्मना वर्जनीय
ति बुद्ध्या आसुरीं संपदं प्रपंचयति ॥ द्वौ भूतसर्गौ लोकेऽस्मिन्

देवआसुरएव च । देवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ॥६॥ हे पार्थ अस्मिन्लो
के द्वौ भूतसर्गौ । देवः च पुनः आसुरः । मया देवो भूतसर्गः विस्तरशः विस्तारे
ण प्रोक्तः । आसुरं भूतसर्गं मम सकाशात् शृणु ॥६॥ आसुरीं विस्तरतो निरूपयति ।
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न शौचं नापि चाचारो न सत्यं ते
षु विद्यते ॥७॥ आसुराः जनाः प्रवृत्तिं च पुनः निवृत्तिं पुरुषार्थसाधने कर्त्तव्यप्रवृ
त्तिः अनर्थहेतोः कर्त्तव्यानिवृत्तिः तन्न विदुः । तेषु न शौचं न चापि आचारः ।
न च सत्यं विद्यते । अशौचाः अनाचाराः अनृतवादिनः ॥७॥ एषां चाधर्मा
नुष्ठाने कारणमाह । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं । अपरस्प १४७
रसंभूतं किमन्यत्कामहैतुकं ॥८॥ ते आसुराः जनाः इदं जगत् असत्यं
अनृतप्रायं अप्रतिष्ठं धर्माधर्मप्रतिष्ठारहितं अनीश्वरं ईश्वररहितं ।

अपरस्परसंभूतं स्त्रीपुरुषयोः अन्योन्यसंयोगात् जातं कामहेतुकं कामएव हेतुः
अन्यत् किं कारणं नरं किमपीत्यर्थः इत्याहुः ॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्प
बुद्धयः । प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥ नष्टात्मानः विनष्टस्वभावाः
नष्टपरलोकसाधनाः । अल्पबुद्धयः विषयबुद्धयः । एतां दृष्टिं पूर्वोक्तां बुद्धिं अ
वष्टभ्य आश्रित्य उग्रकर्माणः क्रूरकर्माणः । जगतः अहिताः शत्रवः । क्षया
य प्रभवंति ॥९॥ काममाश्रित्य दुःपूरं दंभमानमदान्विताः । मोहाद्गृही
त्वासद्ग्राहान् प्रवर्त्तंतेऽशुचिव्रताः ॥१०॥ दंभमानमदान्विताः अशुचिव्रताः
पापव्रताः । दुःपूरं अलंभावरहितं कामं आश्रित्य मोहात्
अविवेकतः असद्ग्राहान् अशुचिनिश्चयान् गृहीत्वा लोके प्रवर्त्तंते ॥१०॥

चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः। कामोपभोगपरमाः एतावदिति निश्चि-
ताः।११ व्याख्या: अपरिमेयां अगणनीयां प्रलयांतां मरणांतां चिंतां अपाश्रिताः आश्रि-
ताः कामोपभोगपरमाः शब्दादिविषयोपभोगपरमाः विषयोपभोग एव परमा-
र्थः एतावदिति निश्चिताः।११ अतएव आशा इति॥ आशापाशशतैर्बद्धाः का-
मक्रोधपरायणाः। ईहंते कामभोगार्थमन्यायेनार्थसंचयान्।१२ आशापाशश-
तैर्बद्धाः आशा एव पाशाः तेषां शतैर्बद्धाः। कामक्रोधपरायणाः। सर्वदा कामक्रोधप-
राः। कामभोगार्थं कामोपभोगप्रयोजनार्थं अन्यायेन परस्वापहरणादिना
र्थसंचयान् ईहंते प्रार्थयंते।१२ तेषां मनोराज्यं कथयन् नरकप्राप्तिमा-
ह [illegible] इति चतुर्भिः॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं। इदमस्ती-
दमपि मे भविष्यति पुनर्धनं।१३ मया अद्य इदं धनं लब्धं इदं अन्यत् धनं मनोरथं

म[illegible] प्राप्स्ये इदं धनं अस्ति इदमपि पुनः मम आगामिकाले भविष्य-
ति [illegible] असौ मया हतः शत्रुर्हनिष्ये चापरानपि। ईश्वरोऽहमहं भोगी सिद्धोऽहं ब-
लवान् सुखी।१४ मया असौ दुर्जयः शत्रुर्हतः। अपरानपि वराकान् हनिष्ये। अहं ई-
श्वरः मम तुल्यः अन्यो नास्ति। अहं भोगवान् सर्वप्रकारेण सिद्धः संपन्नः। पुत्रै-
र्भृत्यैश्च बलवान् सुखी च अहमेव।१४ आढ्योऽभिजनवानस्मि कोऽन्यो-
ऽस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः।१५ अहं आढ्यः
धनेन संपन्नः। अभिजनवान् सत्पुरुषश्रोत्रियवान् अतिसंपन्नः। अहमस्मि।
मया सदृशः अन्यः कोऽपि नास्ति। अहं यक्ष्ये यज्ञेनापि अन्यान् अभिभवि-
ष्यामि। नटादिभ्यः दास्यामि। मोदिष्ये अतिशयेन हर्षं च प्राप्स्यामि। इत्ये-
वं अज्ञानविमोहिताः अविवेकतामापन्नाः।१५ एवंभूताः यत्प्राप्नु-

वंति तदाह॥ अनेकचित्तविभ्रांता मोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतंति
नरकेऽशुचौ॥१६ अनेकचित्तविभ्रांताः पूर्वोक्तप्रकारैः अनेकधा चित्तसंकल्पैः विविधं
भ्रांताः मोहजालसमावृताः मोहो अविवेकः अज्ञानं तदेव आवरणात्मकत्वात् जाल
मिव जालं तेन समावृताः कामभोगेषु कामोपभोगेषु प्रसक्ताः तत्रैव आसक्ताः संतः
तेन उपचितकल्मषाः अशुचौ वैतरण्यादौ नरके पतंति॥१६ यक्ष्ये इति यस्ते
षामभिमानयुक्तः स केवलं दंभाहंकारादिप्रधानएवेति तं भक्तिनयेनाह॥ आत्म
संभाविता इति द्वाभ्यां॥ आत्मसंभाविताः स्तब्धाः धनमानमदान्विताः। यजंते नाम
यज्ञैस्ते दंभेनाविधिपूर्वकं॥१७ आत्मसंभाविताः सर्वगुणविशिष्टतया आत्मनैव सं १५९
भाविताः स्तब्धाः अप्रणताः आनः धनमानमदान्विताः धनजनितो मानः मदश्च ताभ्यां

अन्विताः ते दंभेन धर्मध्वजितया अविधिपूर्वकं नामयज्ञैः नाममात्रैः यागैर्ना
पूर्वकैः यज्ञैः यजंते॥१७ अविधिपूर्वकत्वमेव प्रपंचयति॥ अहंकारं ब
लं दर्पं कामं क्रोधं च संश्रिताः। मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः॥१८
विद्यमानैः अविद्यमानैर्गुणैः आत्मन्यध्यारोपितैः विशिष्टं आत्मा
नं मन्यमानोऽहमिति मन्यते सोऽहंकारः परानिभवनिमित्तं कामरागान्वितं साम
र्थ्यं बलं यस्योद्भवे धर्मं अतिक्रामति सोऽयं अंतःकरणाश्रयो दोषो दर्पः। कामं
स्त्र्यादिविषयं। क्रोधं अनिष्टविषयं एतान् अन्यांश्च महतो दोषान् संश्रिताः
ते आसुराः मां ईश्वरं आत्मपरदेहेषु तद्बुद्धिकर्मसाक्षीभूतं प्रद्विषंतः मत्
शासनातिवर्तित्वं प्रद्वेषः तं कुर्वंतः अभ्यसूयकाः सन्मार्ग

स्वानां गुलेषु असदसमानाः॥१८   तानहं द्विषतः क्रूरान् संसारेषु नराधमान्
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥१९ अहं एतान् सन्मार्ग प्रतिपक्ष
भूतान् साधुद्वेषिणः मां द्विषतश्च क्रूरान् नराधमान् अशुभकर्मकारिणः
संसारेषु-संसारमार्गेषु आसुरीषु एषु क्रूरकर्मप्रायासु व्याघ्रादि
योनिषु अजस्रं सततं क्षिपामि॥१९   आसुरीं योनिमापन्ना मूढा ज
न्मनि जन्मनि। मामप्राप्यैव कौंतेय ततो यान्त्यधमां गतिं॥२० हे कौंतेय
मूढाः अविवेकिनः आसुरीं तमोबहुलां योनिं आपन्नाः प्राप्ताः जन्मनि
जन्मनि मां अप्राप्य मदुपदिष्टं साधुमार्गमपि अप्राप्य ततः तस्याः अपि
योनेः निकृष्टतमां यान्ति प्राप्नुवंति॥२० उक्तानां आसुरदोषाणां मध्ये सक १५२
लदोषमूलभूतं दोषत्रयं सर्वथा वर्जनीयमित्याह॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं
त्यजेत्॥२१ इदं आत्मनः नाशनं त्रिविधं नरकस्य द्वारं नरकप्राप्तिमार्गः। कामः
क्रोधः तथा लोभः। तस्मात् एतत्त्रयं कामक्रोधलोभात्मकं। त्रिविधं नरकद्वारं त्य
जेत्॥२१ त्यागे (विशेष) फलमाह॥   एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः
आचरत्यात्मनः श्रेयस्ततो याति परां गतिं॥२२ हे कौंतेय एतैः त्रिभिः त
मोद्वारैः तमसः नरकस्य दुःखमोहात्मकस्य कामादिभिर्विमुक्तो नरः
आत्मनः श्रेयः आचरति। ततः श्रेयसः आचरणात् परां मोक्षाख्यां गतिं या
ति॥२२ कामक्रोधादित्यागस्य स्वधर्माचरणं विना न संभवतीत्याह॥
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः। न स सिद्धिमवाप्नोति

न सुखं न परां गतिं ।२३। यः शास्त्रविधिं शास्त्रस्य वेदस्य विधिं कर्त्तव्याकर्त्तव्यज्ञानका
रणं उत्सृज्य त्यक्त्वा कामकारतः कामप्रयुक्तः सन् वर्त्तते। स सिद्धिं पुरुषार्थयोग्य
तां न त्र वाप्नोति न प्राप्नोति। नापि अस्मिन् लोके सुखं प्राप्नोति नापि परां प्रकृ
ष्टां गतिं स्वर्गं मोक्षं वा प्राप्नोति।२३ फलितमिति। तस्मादिति। तस्माच्छा
स्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहा
र्हसि ।२४। तस्मात् ते तव कार्याकार्यव्यवस्थितौ कर्त्तव्याकर्त्तव्यव्यवस्था
यां शास्त्रं प्रमाणं ज्ञानसाधनं भवति। तस्मात् शास्त्रविधानोक्तं कर्म ज्ञात्वा क
र्तुमर्हसि ।२४। इति श्रीभगवद्गीताभाष्ये दैवासुरसंपत्तियोगो नाम षोड १५३
शोऽध्यायः ॥१६

५०॥ ज्ञानाधिकारहेतूनां सात्त्विकी श्रद्धा मुख्यो हेतुरिति निर्णेतुं त्रिविधश्रद्धा
स्वरूपं निरूप्यते। तत्र षोडशाध्याये कामकारेण प्रवर्त्तमानस्य ज्ञानेऽ
धिकारो नास्ति। यथाशास्त्रं प्रमाणस्य अधिकारोऽस्तीत्युक्ते तत्र शास्त्रविधिमुत्सृज्य
कामकारं विना श्रद्धया वर्त्तमानानां किं अधिकारोऽस्ति न वेति संदिहानोऽ
र्जुनः पृच्छति। अत्र च शास्त्रविधिमुत्सृज्य यजन्त इत्यनेन शास्त्रार्थमुक्तं बु
द्ध्वा तमुल्लंघ्य वर्त्तमाना न गृह्यन्ते। आस्तिकबुद्धिर्हि श्रद्धा। न च शास्त्रार्थमु
ल्लंघ्य वर्त्तमानस्यास्तिकत्वं भवतीत्यादौ। ये शास्त्रमिति॥ अर्जुन उवाच। ये
शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः। तेषां निष्ठा तु का कृष्ण सत्त्वमाहो
रजस्तमः। तस्मात् शास्त्रं प्रमाणमिति भगवद्वाक्यात् लब्धप्रश्नबीजोऽ

र्जुन उवाच। हे कृष्ण जनाः ये श्रुतिस्मृतिलक्षणं किंचितु शास्त्रविधिम् अपश्यंतः
वृद्धव्यवहारदर्शनादेव श्रद्धयान्वितया आस्तिक्यबुद्ध्या संयुक्ताः ये देवादीन्
पूजयंति। तेषाम् एवंभूतानां का निष्ठा। किं सत्वं अवस्थानं उत रजः उत तमः।
देवादीनां पूजा किं सात्विकी। राजसी तामसी वेत्यर्थः॥१॥ श्रद्धा त्रिविधेति वक्तुं
श्रीभगवानत्रोत्तरमाह। श्रीभगवानुवाच। त्रिविधा भवति श्रद्धा देहि-
नां सा स्वभावजा। सात्विकी राजसी चैव तामसी चेति तां शृणु॥ यस्मात् श्र-
द्धायाः निष्ठाम् अपृच्छः त्वं पृच्छसि। सा श्रद्धा देहिनां त्रिविधा भवति। स्वभावजा।
जन्मांतरकृतधर्मादिसंस्कारो मरणकाले अभिव्यक्तः प्रादुर्भूतः स्वभाव १५४
स्तस्माज्जाता स्वभावजा सात्विकी। देवादिपूजाविषया। राज-
सी यक्षरक्षःपूजाविषया। तामसी प्रेतपिशाचादीनां पूजाविषया। एवं त्रि-

विधां श्रद्धां उच्यमानां शृणु॥२॥ श्रद्धायाः सत्वादित्रैविध्येपि अंतःकरणस्य रजस्तमोमि-
श्रत्वेन त्रिविधा तु श्रद्धायाम् अपि त्रिविधमाह॥ सत्वानुरूपा सर्वस्य श्रद्धा भ-
वति भारत। श्रद्धामयोयं पुरुषो यो यच्छ्रद्धः स एव सः॥ हे भारत। सर्वप्राणि-
जातस्य सत्वानुरूपा विशिष्टसंस्कारोपेतांतःकरणानुरूपा श्रद्धा आस्तिक्यबुद्धि-
र्भवति। अयं संसारी पुरुषो जीवः श्रद्धामयः श्रद्धाविकारः। यो यादृश्या श्र-
द्धया युक्तः स एव तत् श्रद्धानुरूप एव भवति॥३॥ देवपूजा कार्यलिंगेन सत्वा-
दिनिष्ठा अनुमेयेत्याह॥ यजंते सात्विका देवान् यक्षरक्षांसि राजसाः
प्रेतान् भूतगणांश्चान्ये यजंते तामसा जनाः॥४॥ सात्विकाः देवान् यजंते
पूजयंति। राजसाः यक्षरक्षांसि पूजयंति। अन्ये तामसाः जनाः प्रेतान् भूतग-

लोकश्चमत्कारादीन् यजन्ते ॥४॥ रजस्तमोनिष्ठानां लक्षणं वदन् तेषां विशेषमा
ह ॥ अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दम्भाहंकारसंयुक्ताः कामरा
गबलान्विताः ॥५॥ ये जनाः दम्भाहंकारसंयुक्ताः कामरागबलान्विताः कामरा
गजनितबलेन अन्विताः अशास्त्रविहितं घोरं प्राणिनां आत्मनश्च पीडाक
रं तपः तप्यन्ते ॥५॥ कर्षयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तःशरी
रस्थं तान् विद्ध्यासुरनिश्चयान् ॥६॥ अचेतसः अविवेकिनः शरीरस्थं भूत
ग्रामं इन्द्रियसमुदायं च अन्तर्यामिनं कर्मबुद्धिसाक्षिणं अन्तःशरीरस्थं
कर्षयन्तः वशीकुर्वन्तः यो वर्तते । तान् आसुरनिश्चयान् विद्धि जानीहि ।
६ आहारादिभेदादपि सात्त्विकादिभेदं दर्शयितुं सात्त्विकं च उत्पादयितुं १२५
आहारादित्रैविध्यमाह । आहारस्त्वपि इत्यादि त्रयोदशभिः ॥

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥ सर्वस्य जनस्य १२६
सर्वस्य जन्तोः आहारोपि प्रियः इष्टः त्रिविधो भवति । तथा यज्ञः तथा तपः तथा दानं च तत्रै
कमपि त्रिविधं भवति । तेषां आहारादीनां इमं भेदं वक्ष्यमाणं शृणु ॥ तत्र सात्त्विकं
आहारमाह ॥ आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः । रस्याः स्निग्धाः स्थिरा
हृद्याः आहाराः सात्त्विकप्रियाः ॥८॥ ये आहाराः उपभुक्ताः आयुःसत्त्वबलारोग्यसुखप्री
तीनां च एषां विवर्धनाः । रस्याः रसोपेताः । स्निग्धाः स्नेहवन्तः । स्थिराः देहे चिरका
लस्थायिनः । हृद्याः हृदयप्रियाः । सात्त्विकस्य ते प्रियाः ॥८॥ कट्वम्ललवणात्युष्णती
क्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥ कटुः अम्लः लवण
अत्युष्णतीक्ष्णरूक्षविदाहिनः । अतिकटु अत्यम्लं अति शब्दः प्रत्येकं संबध्यते ।

इति रसादि॥ आहारा राजसस्य इष्टाः प्रियाः एते च परंतु कोः अंतः दुःखशोकामयान्
प्रयच्छंति॥ तामसाहारमाह॥ यातयामं गतरसं पूति पर्युषितं च यत्॥ उच्छिष्टमपि
चामेध्यं भोजनं तामसप्रियं॥१०॥ यत् अन्नं भोजनं यातयामं मंदपक्वं गतरसं रसरहित
युक्तं पूति दुर्गंधि पर्युषितं पक्वं सत् रात्र्यंतरितं च अन्यत् यत् उच्छिष्ट
[illegible] भुक्तावशिष्टं अमेध्यं अयज्ञार्हं ईदृशं भोजनं तामसस्य प्रियं इष्टं॥१०॥
अथ यज्ञस्य त्रैविध्ये सात्विकं यज्ञमाह॥ अफलाकांक्षिभिर्यज्ञो विधि
दृष्टो य इज्यते॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः॥११॥ यो यज्ञः अ
फलाकांक्षिभिः फलकामनारहितैः पुरुषैः मनः समाधाय यष्टव्यमेवेति १५८
कृत्वा निश्चित्य विधिदृष्टः वेदवाक्यविहितं [illegible] तत्वात् इज्यते स सात्विको यज्ञः उच्यते॥

राजसं यज्ञमाह॥ अभिसंधाय तु फलं दंभार्थमपि चैव यत्॥ इज्यते भरतश्रे
ष्ठ तं यज्ञं विद्धि राजसं॥१२॥ हे भरतश्रेष्ठ तु पुनः फलं अभिसंधाय फलमुद्दिश्य अपि श्री
च दंभार्थं यत् इज्यते तं यज्ञं राजसं विद्धि॥१२॥ तामसं यज्ञमाह॥ विधिहीनमसृ
ष्टान्नं मंत्रहीनमदक्षिणं॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥१३॥ विधिहीनं यथा
शास्त्रविहितविपरीतं॥ असृष्टान्नं ब्राह्मणेभ्यो न दत्तं अन्नं प्रचुरं यस्मिन् यज्ञे स असृ
ष्टान्नः तं॥ मंत्रहीनं॥ मंत्रैः स्वरतो वर्णतश्च हीनं॥ अदक्षिणं उक्तदक्षिणारहि
तं॥ श्रद्धाविरहितं श्रद्धया आस्तिक्यबुद्ध्या रहितं॥ तं यज्ञं तामसं तमोगुणनिष्प
न्नं परिचक्षते॥१३॥ तपसः सात्विकादिभेदं दर्शयितुं प्रथमं शारीरादिभेदेन
तपस्य त्रिविधस्य शारीरं तप आह॥ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं॥ ब्र
ह्मचर्यमहिंसा च शारीरं तप उच्यते॥१४॥ देवद्विजगुरुप्राज्ञानां च पूजनं प्रज

नां शौचं बाह्यम् आभ्यंतरं च । आर्जवं ऋजुत्वं यथा ज्ञायाँ याँ ऋजुगामित्वं ब्रह्मचर्यं
प्राणिनाम् अहिंसा । एतत् सर्वं देहसुखैः इंद्रियात्ममनोभिः साध्यं शारीरं
तप उच्यते ।१४ वाचिकं तप आह । अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।१५ च पुनः यत् अनुद्वेगकरं प्रा
णिनाम् अदुःखकरं । सत्यं यथार्थवृत्तं । प्रियहितं । प्रियं श्रोतुः सुखकरं । हि
तं उपकारि दृष्टार्थे सुखकारि अदृष्टार्थे उपकारि एवंविधं अनुद्वेगकर
वादिचतुष्टयात्मिसितं वाक्यं वाङ्मयं तप उच्यते । न एकैकं । च पुनः स्वाध्याया
भ्यसनं वेदाध्ययनं । यथोक्ते द्वितीयं वाङ्मयं तप उच्यते ।१५ मानसं तप आ
ह । मनःप्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः । भावसंशुद्धिर् इत्य् एतत् तपो १५७
संशु

मानसम् उच्यते ।१६ मनःप्रसादः चित्तनैर्मल्यं । सौम्यत्वं सौमनस्यता । मौनं वाक्सं
यमः । मनःसंयमपूर्वकः सर्वतो मनोनिरोधः । आत्मविनिग्रहः । वाग्विषयस्य मन
सः निग्रहो मौनं । अन्यत्र सर्वतः सामान्यरूपः संकल्पविकल्पात्मकमनोनिग्रहः
आत्मविनिग्रहः इति भेदः । अन्यैः सह व्यवहारे क्रियमाणे अमायित्वं भावसंशुद्धिः ।
एतत् सर्वविधं तपो मानसम् उच्यते ।१६ तस्य शारीरादिभेदेन त्रिविधस्यापि तपसः सात्वि
कादिभेदेन त्रैविध्यं सात्विकं तप आह ॥ श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः ।
अफलाकांक्षिभिर् युक्तैः सात्विकं परिचक्षते ।१७ तद् यथोक्तं कायिकं वा
चिकं मानसं च त्रिविधं तपः अफलाकांक्षिभिः फलकामनारहितैः युक्तैः मनः
समाधानयुक्तैः नरैः अनुष्ठातृभिः परमया उत्कृष्टया श्रद्धया आस्ति
= क्यबुद्ध्या तप्तम् अनुष्ठितं सात्विकं सत्वगुणनिष्पन्नं

परिचर्क्ष्यते कथ्यते ॥१७ राजसं तप आह ॥ सत्कारमानपूजार्थं तपो दंभेन
चैव यत् क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं ॥१८ यत्तपः सत्कारः साधुवादः
मानो मननं प्रत्युत्थानाभिवादनादि पूजा तत्पर्या । एतत्त्रयार्थं । यत्पुनः दंभेन धर्म
ध्वजितया क्रियते तत् इह लोके राजसं चलं विनाशि फलं अध्रुवं क्षणिकफलं तपः
प्रोक्तं ॥१८ तामसं तप आह ॥ मूढग्राहेणात्मनो यत् पीडया क्रियते तपः परस्यो
त्सादनार्थं वा तत्तामसमुदाहृतं ॥१९ यत्तपः मूढग्राहेण अविवेकनिश्चयेन आत्
मनः पीडया स्वस्य अत्यंतक्लेशेन । अथ वा परस्य उत्सादनार्थं विनाशार्थं क्रिय
ते तत् तपः तामसं उदाहृतं ॥२० एवं प्रतिज्ञाने दानस्य त्रिविधत्वं वक्तव्ये सात्त्विकं दा १५८
नमाह ॥ दातव्यमिति यद्दानं दीयतेऽनुपकारिणे देशे काले च पात्रे च तद्दा
नं सात्त्विकं स्मृतं ॥२० यद्दानं देशे कुरुक्षेत्रादौ । कालेसंक्रांत्यादौ पात्रे विद्या तप

...विशिष्टे अनुपकारिणे प्रत्युपकारासमर्थाय निरपेक्षितया दातव्यमेवेति बुद्ध्या दी
यते तद्दानं सात्त्विकं स्मृतं ॥२० राजसं दानमाह ॥ यत्तु प्रत्युपकारार्थं फलमुद्दि
श्य वा पुनः दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतं ॥२१ यत्पुनः यद्दानं प्रत्युपकारा
र्थं प्रत्युपकारबुद्ध्या वा पुनः फलं कर्मफलं उद्दिश्य परिक्लिष्टं खेदसंयुक्तं दी
यते तद्दानं राजसं उदाहृतं ॥२१ तामसं दानमाह ॥ अदेशकाले यद्दानम
पात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतं ॥२२ यद्दानं अदेश
काले अदेशे अपुण्ये म्लेच्छादिसंकीर्णे अकाले संक्रांत्यादिपुण्यकालविशेषरहि
ते अपात्रेभ्यः मूर्खेभ्यः तस्करदुष्टेभ्यः चोरादिभ्यः दशादिसंपत्तावपि असत्कृतं प्रियवचन
पादप्रक्षालनपूजादिरहितं अवज्ञातं पात्रपरिभवयुक्तं दीयते तत्ता
मसं उदाहृतं ॥२२ यज्ञदानतपःप्रभृतीनां रजस्तमःप्रायाणां

मपि सद्गुणकरणाय उपदेशमाह॥ ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा। ॐ तत्सदिति ब्रह्मणः त्रिविधः त्रिःप्रका
रः निर्देशः निर्दिश्यते येन स निर्देशः वेदांतेषु ब्रह्मविद्भिः स्मृतः चिंतितः। तेन त्रि
विधेन निर्देशेन ब्राह्मणा वेदाश्च यज्ञाश्च पुरा पूर्वं निर्मिताः। २३ इदानीं प्रत्येकं
ॐ कारादीनां प्राशस्त्यं दर्शयिष्यन् ॐ कारस्य तावदाह॥ तस्मादों
मित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादि
नां। २४ तस्मात् ॐ इत्युदाहृत्य ब्रह्मवादिनो ब्रह्मवदनशीलानां यज्ञदा
न तपोरूपाः क्रियाः विधानोक्ताः यथाशास्त्रविहिताः सततं सर्वदा प्रवर्तन्ते
२४ द्वितीयं नाम स्तौति। तदिति॥ तदित्यनभिसंधाय फलं यज्ञतपः १५६
क्रियाः दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः॥ २५

मोक्षकांक्षिभिर्मुमुक्षुभिः यज्ञतपःक्रियाः तत्र अन्यत् विविधदानक्रियाः फलं अनभिसं
धाय तदिति ब्रह्माभिधानं उच्चार्य क्रियंते। २५ सच्छब्दस्य विनियोगमाह॥ सद्भावे
साधुभावे च सदित्येतत् प्रयुज्यते। प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते। २६ हे
पार्थ असतः विद्यमानस्य पुत्रादेः सद्भावे साधोः असद्वृत्तस्य सद्वृत्ततायां सत् एतत्
ब्रह्मणः अभिधानं प्रयुज्यते उच्यते। तथा प्रशस्ते कर्मणि विवाहादौ सच्छब्दः प्रयुज्य
ते। २६ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते। कर्म चैव तदर्थीयं सदित्येवाभि
धीयते। २७ यज्ञे यज्ञकर्मणि या स्थितिः तपसि च दाने च या स्थितिः सा सत् इति विद्वद्भिः
उच्यते। च अन्यत् तदर्थीयं यज्ञदानतपोर्थीयं कर्म सदित्येव अभिधीयते। अथवा
त्रयाणां शब्दानां ॐ तत्सदित्येषां शब्दानां यः अर्थः ब्रह्म लक्षणः तदर्थीयं ईश्व

तदर्थीयं कर्म तदपि सदित्येवोच्यते॥२७ इदानीं सर्वं कर्म श्रद्धयैव प्रवर्त्तनीयमित्यर्थं अ
श्रद्धयाकृतं सर्वं निंदति॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदि
त्युच्यते पार्थ न च तत्प्रेत्य नो इह॥२८ यत् अश्रद्धया अग्नौ हुतं दत्तं ब्राह्मणेभ्यः
तप्तं चांद्रायणादि तपः तथा कृतं च यत् यत् अन्यदपि अश्रद्धया स्तुतिनमस्का
रादिकृतं तत्सर्वं असदिति उच्यते यस्मात् तद्विगुणत्वात् प्रेत्य परलोके
फलाय न भवति। इहलोकार्थमपि न भवति। साधुभिर्निंदितत्वात्॥२८ इति श्रीभ
गवद्गीताभाष्ये कर्मगुणविभागदर्शनो नाम सप्तदशोऽध्यायः॥१७ १६०

श्रीगणेशायनमः॥ सकलवेदार्थ एवं सकलगीतार्थः सप्तदशभिरध्यायैर्निरूपितः स
एवार्थः संक्षेपेण अस्मिन् अष्टादशाध्याये निरूप्यते। तत्र सर्वकर्माणि मनसा संन्यस्य
संन्यासयोगयुक्तेत्यादिषु कर्मसंन्यास उपदिष्टः तथा त्यक्त्वा कर्मफलासंगं सर्वकर्म १६१
फलत्यागं ततः कुरु इत्यादिषु च फलमात्रत्यागेन कर्मानुष्ठानमुपदिष्टं तत्र संन्या
सत्यागशब्दार्थयोः परस्परविरुद्धयोरिव दृश्यमानयोः अविरुद्धतया अव
बोद्धुं तयोर्विशेषबुभुत्सुरर्जुन उवाच संन्यासस्येति। अर्जुन उवाच॥
संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं। त्यागस्य च हृषीकेश पृथक् केशिनिषू
दन॥१ हे महाबाहो हे हृषीकेश हे केशिनिषूदन संन्यासस्य संन्यासशब्दार्थस्य
तत्त्वं याथात्म्यं च त्यागस्य तत्त्वं याथात्म्यं पृथक् अन्योन्यविभागेन वे
दितुं इच्छामि॥ तन्निर्णयाय भगवानुवाच काम्यानामिति॥ श्रीभग

वाभुवाच॥ काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः। सर्वकर्मफलत्यागं प्राहुस्त्या
गं विचक्षणाः॥२ केचित् कवयः पंडिताः काम्यानामश्वमेधादीनां कर्मणां न्यासं कर्तव्यत्वे
नप्राप्तानामकरणं संन्यासशब्दार्थं विदुः। विचक्षणाः केचित्तमेधाविनः सर्वक
र्मफलत्यागं सर्वकर्मणां नित्यानैमित्तिकानां क्रियमाणानामात्मसंबंधितया प्राप्त
स्य फलस्य त्यागं त्यागशब्दार्थं प्राहुः॥ अविदुषः फलत्यागमात्रमेव त्यागशब्दः न कर्म
त्यागः इत्येतदेव मतांतरनिरासेन दृढीकर्तुं मतांतरं दर्शयति। पूर्वार्द्धेन सांख्यमतं
उत्तरार्द्धेन जैमीनीयकमतं त्याज्यमिति॥ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः
। यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥३ एके मनीषिणः सांख्याः सकलम १६१
पि ... दोषसंयुक्तं इति कारणात् त्याज्यं प्राहुः। अथवा दोषवदिति दृ

ष्टां तो ... दोषस्त्याज्यः। तथा फलं कर्म त्याज्यं सांख्याः एवं प्राहुः। अपरे मीमांसकाः य
ज्ञदानतपःकर्म न त्याज्यमित्याहुः॥३ एवं मतभेदेन उपन्यस्य स्वमतं दर्शयितुमाह
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम। त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः॥४
हे भरतसत्तम तत्र त्यागे त्यागसंन्यासविकल्पे मम निश्चयं शृणु। त्यागो हि त्या
एक गसंन्यासशब्दार्थो हि ... एक एव न तु ... वादि ... त्रिविधः संप्रकीर्तितः शा
स्त्रेषु कथितः॥४ प्रथमं तावन्नियममाह॥ यज्ञदानतपःकर्म न त्याज्यं कार्य
मेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥५ यज्ञो दानं तपः कर्म न
त्याज्यं तत्कार्यं करणीयमेव। तस्मात् यज्ञो दानं तपः एतानि मनीषिणां फलका
मनारहितानां पावनानि चित्तविशुद्धिकराणि॥५ तेषां पावनत्वप्रकारमाह॥
एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं म

मतमुत्तमं॥६॥ हे अर्जुन हे पार्थ यज्ञदानतपांसि कर्माणि तेषु कर्मसु संगं आसक्तिं प्रीतिं च
त्यक्त्वा अनुबन्धफलानि त्यक्त्वा कर्तव्यानि। एवमिति मे मम निश्चितं उत्तमं मतं॥६॥ प्रति
ज्ञातं त्यागं त्रिविधं आह कामिनः अहं त्यक्त्वा मुमुक्षोर्दर्शयति। नियतस्येति त्रिभिः॥

नियतस्य तु संन्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकी
र्तितः॥७॥ हे अर्जुन नियतस्य नित्यस्य कर्मणः संन्यासस्त्यागः न उपपद्यते न घ
टते तस्य पावनत्वेन इष्टत्वात्। तस्य मोहात् परित्यागस्तामसः परिकीर्तितः॥७॥
राजसं त्यागमाह॥ दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्। स कृत्वा
राजसं त्यागं नैव त्यागफलं लभेत्॥८॥ यत्कर्म दुःखं दुःखात्मकमित्येव बुद्ध्या १६२
कायक्लेशभयात् त्यजेत्। त्यागं करोति स राजसः त्यागः तु मानुतं राज

सं त्यागं कृत्वा त्यागफलं मोक्षाख्यं न लभते॥८॥ सात्त्विकं त्यागमाह॥ कार्यमित्ये
व यत्कर्म नियतं क्रियतेऽर्जुन। संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥९॥ हे अर्जुन
यत्कर्म कर्माणि संगं प्रीतिं फलं च त्यक्त्वा कार्यं कर्तव्यमित्येव बुद्ध्या नियतं नित्यं कर्म
क्रियते स त्यागः नित्यकर्मणि संगफलत्यागः सात्त्विको मतः॥९॥ एवं तस्यैव नि
त्यकर्मानुष्ठाने न विशुद्धान्तःकरणस्य आत्मज्ञानाभिमुखस्य कर्मणां यथा ज्ञा
ननिष्ठा स्यात् तं प्रकारमाह॥ न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्यते
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥१०॥ त्यागी कर्मसु संगफलत्याग
वान् सत्त्वसमाविष्टः सत्त्वेन आत्मानात्मविवेकज्ञानहेतुना समाविष्टः
संयुक्तः अत एव मेधावी मेधया आत्मलक्षणया प्रज्ञया युक्तः अत एव छिन्न १६३

अविद्याकृतः संशयो यस्य स छिन्नसंशयः। अकुशलं अशोभनं काम्यं कर्म स्व
स्वरूपकारणं न द्वेष्टि। कुशले शोभने नित्ये कर्मणि सत्त्वशुद्धिज्ञानोत्पत्तिद्वारेण मोक्ष
साधने न अनुषज्यते प्रीतिं न करोतीति। १० यस्तु देहाभिमानवान् तस्य कर्मफलत्या
गेन कर्मानुष्ठाने अधिकारो न कर्मत्यागे इत्येतमर्थं दर्शयितुमाह॥ न हि देहभृ
ता शक्यं त्यक्तुं कर्माण्यशेषतः। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते। ११ हि यस्मा
त् देहभृता देहाभिमानवता कर्माण्यशेषतः निःशेषेण त्यक्तुं न शक्यं तस्मात्
यः नित्यादि कर्माणि कुर्वन् कर्मफलत्यागी कर्मफलाभिसंधिमात्रसंन्यासी स कर्मी अपि १६३
सन् त्यागी इत्यभिधीयते। ११ एवंभूतस्य कर्मफलत्यागस्य फलमाह॥ अनि
ष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥१२

अनिष्टं नरकतिर्यगादि लक्षणं।
एवं त्रिविधं त्रिःप्रकारं कर्मफलं अत्यागिनां असंन्यासिनां कर्मिणां अपरमार्थसंन्यासि
नां प्रेत्य शरीरपातादूर्ध्वं एवंविधं तेषां भवति। संन्यासिनां केवलज्ञाननिष्ठानां अशुभं क्वचि
त् कदाचिन्न भवति। १२ कर्मफलत्यागिनां ... तत्त्वज्ञानस्य परमार्थदर्शिनः अधिष्ठा
नादीनि आत्मत्वेन जानतः कर्मलेपो नास्तीत्याह॥ पंचैतानि महाबाहो कारणा
नि निबोध मे। सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणां। १३ हे महाबाहो सर्वक
र्मणां सिद्धये निष्पत्तये सांख्ये वेदांते कृतान्ते कर्मसमाप्तिलक्षणे एतानि पंच
कारणानि प्रोक्तानि मे मत्तो निबोध जानीहि। १३ तान्येवोपदिशति॥ अधिष्ठानं
तथा कर्ता करणं च पृथग्विधं। विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमं। १४

इत्यादीनां अन्तिदा... अधिष्ठानं आश्रयः तथा ... कर्ता ... करणं च शब्दा
दीपलब्धिहेतुः श्रोत्रादि पृथग्विधं नाना प्रकारं एवं द्वादशसंख्यं च अन्यत् विविधाः
पृथक् चेष्टाः वायव्याः प्राणापानाद्याः एते चतुर्षु दैवं पंचमं आदित्यादि चक्षुरा
द्यनुग्राहकं आदित्यादि १४ एतेषामेव सर्वकर्महेतुत्वमाह॥ शरीरवाङ्मनो
भिर्यत्कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः॥१५ नरः यत्कर्म
एतैः शरीरवाङ्मनोभिस्त्रिभिः यत्कर्म न्याय्यं वा धर्म्यं वेदोक्तं वा एतद्विपरीतं अधर्म्यं अशा
स्त्रीयं उदासीनं वा निमिषितं अन्नादि जीवनहेतुः आरभते तत्र तेषु कर्मसु त्रिषु
एते पूर्वोक्ताः पंच अधिष्ठानाद्याः हेतवः कारणानि॥१५ ततः किं अत आह॥ त १६४
त्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥१६
एवं सति तत्र पूर्वश्लोके एवं अधिष्ठानादिभिः हेतुभिः निष्पाद्यमाने सर्वस्मिन् कर्मणि सति आ
त्मानं अकर्तारं केवलं विशुद्धं सन्तं अहं कर्तेति कर्तारं पश्यति मन्यते स दुर्मतिः

अकृतबुद्धित्वात् आचार्योपदेशन्यायैः असंस्कृतबुद्धित्वात् आत्मतत्त्वं न पश्यति॥१
...कुलैः स्रुतिभिः सम्यक् न पश्यति स इत्यर्थः॥ यस्य नाहंकृतो भावो
बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते॥१७ यस्य न्यायेन शा
स्त्राचार्योपदेशन्यायसंस्कृतात्मनः अहंकृतः अहं कर्ता इत्येवं लक्षणो भावो न
भवति यस्य बुद्धिः अन्तःकरणं मया कर्म कृतं अस्य कर्मणः फलं स्वर्गनरकादि अहं
हन्तो द्यो इति न मन्यते न लिप्यते स मुनिः इमान् लोकान् सर्वान् प्राणिनः
हत्वापि लोकदृष्ट्या हननं कृत्वापि परमार्थतो न हन्ति न निबध्यते न तस्य फले
न संबध्यते॥१७ अथेदानीं पूर्वोक्ताधिष्ठानादि पंच हेतुभिः आरभ्यमाणानां ज्ञानिनां
प्रवर्तकमाह॥ ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना। करणं कर्म
कर्तेति त्रिविधः कर्मसंग्रहः॥१८ ज्ञानं अविशेषेण सर्ववस्तुविषयं तथा

ज्ञेयं अविशेषेण सर्ववस्तु । परिज्ञाता उपाधिलक्षणः अविद्याकल्पितो भोक्ता । एतत्त्र-
यं त्रिविधा कर्मचोदना त्रिःप्रकारा कर्मवर्त्तना । करणं बाह्यं इंद्रियाणि दश । अंतः-
करणं मनोबुद्ध्यादि कर्मकारणं उत्पाद्यं १ आप्यं २ संस्कार्यं ३ विकार्यं ४ चेति च-
तुर्विधं कर्म । कर्ता करणानां इंद्रियाणां व्यापारयिता । एवं त्रिविधः कर्मसंग्रहः ।
सर्वं कर्म अस्मिन् संगृह्यते ॥१८॥ अथेदानीं क्रियाकारकफलानां सर्वेषां त्रि-
(दानीं)
गुणात्मकत्वात् सत्त्वादिगुणभेदतः त्रिविधो भेद उच्यते ॥ ज्ञानं कर्म च
कर्ता च त्रिधैव गुणभेदतः । प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥१९॥ ज्ञानं ज्ञ-
प्तिः कर्म क्रिया पुनः कर्ता । एतत् क्रियाकारकफलात्मकं गुणभेदतः सत्त्वा-
दिगुणभेदतः सत्त्वादिगुणभेदेन सर्वं त्रिधा विभक्तं गुणसंख्याने कापिले १६५
ऽपि शास्त्रे त्रिधैव त्रिःप्रकारमेव प्रोच्यते तान्यपि यथावत् शृणु ॥१९॥

तत्र सात्त्विकं ज्ञानमाह ॥ सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु
तत् ज्ञानं विद्धि सात्त्विकं ॥२०॥ येन ज्ञानेन सर्वभूतेषु अव्यक्तादिस्थावरांतेषु भूतेषु एकं भावमा-
काशवत् सर्वगतं अव्ययं कूटस्थं एकं भेदरहितं तत्त्वं वस्तु ईक्षते । तत् अद्वैतात्मदर्शनं
तत् ज्ञानं सात्त्विकं विद्धि ॥२०॥ राजसं ज्ञानमाह ॥ पृथक्त्वेन तु यत् ज्ञानं नानाभावान् पृ-
थग्विधान् । वेत्ति सर्वेषु भूतेषु तत् ज्ञानं विद्धि राजसं ॥२१॥ पुनः यत् ज्ञानं स-
र्वेषु भूतेषु पृथग्विधान् भिन्नप्रकारान् नानाभावान् भिन्नात्मनः पृथक्त्वेन प्रतिशरीरं
भेदेन वृत्ति येन ज्ञानेन जानाति तत् ज्ञानं राजसं विद्धि ॥२१॥ तामसं ज्ञानमा-
ह ॥ यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकं । अतत्त्वार्थवदल्पं च तत्ताम-
समुदाहृतं ॥२२॥ पुनः यत् ज्ञानं एकस्मिन् कार्ये देहे बहिः प्रतिमादौ वा
के कृत्स्नवत् समग्रवत् सर्वविषयमिव सक्तं एतावानेवात्मा ईश्वरो

वा नातः परमस्तीति भूत निश्चयं अहेतुकं अतत्वार्थ च तुच्छं किंवा डीतं अतत्वार्थवत्
यथाभूतार्थ विषयं न भवति। अल्पविषयत्वात् अल्पफलत्वात् च अल्पं। एवंविधं यत्
ज्ञानं तत् तामसं।२२ कर्मणस्त्रैविध्यमाह सात्विकं कर्माह। नियतं संगरहि
तमरागद्वेषतः कृतं। अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते।२३ यत्कर्म
अफलप्रेप्सुना फलाकांक्षारहितेन संगरहितं आसक्तिवर्जितं नियतं नित्यं
विहितं। अवश्यकर्तव्यं अरागद्वेषतः रागेण द्वेषेण च विना कृतं विहितं। तत्सा
त्विकं उच्यते।२३ राजसं कर्माह॥ यत्तु कामेप्सुना कर्म साहंकारेण वा पु
नः। क्रियते बहुलायासं तद्राजसमुदाहृतं।२४ पुनः यत्कर्म कामेप्सुना १६६
फलप्रेप्सुना वा पुनः साहंकारेण सात्विकमानेन बहुलायासं महतायासे
न क्रियते। तत् एवंविधं कर्म राजसं उदाहृतं।२४

तामसं कर्माह। अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं। मोहादारभ्यते
कर्म यत्तत्तामसमुच्यते।२५ यत्कर्म अनुबंधं पश्चाद्भावि वस्तु तं क्षयं तस्मिन् १६७
कर्मणि क्रियमाणे शक्तिक्षयः अर्थक्षयो यः तं हिंसां प्राणिपीडां च अनपेक्ष्य
पौरुषं स्वकीयसामर्थ्यं एतच्चतुष्टयं अनपेक्ष्य केवलं मोहात् अविवेकात् आरभ्य
ते तत्तामसं।२५॥ कर्तुस्त्रैविध्यमाह सात्विकं कर्तारमाह॥ मुक्तसंगोऽनहंवादी
धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते।२६ मु
क्तसंगः त्यक्तफलासंगः अनहंवादी न अहं वदनशीलः धृत्युत्साहसमन्वि
तः धैर्योद्यमाभ्यां समन्वितः सिद्ध्यसिद्ध्योः निर्विकारः फलसिद्धौ अ
सिद्धौ निर्विकारः प्रीतिद्वेषरहितः एवंविधः कर्ता सात्विक उच्यते।२६

राजसः कर्त्तोदाहृतः॥ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोका
न्वितः कर्ता राजसः परिकीर्त्तितः॥२७॥ रागी कर्म्मत्यागासक्तियुक्तः॥ कर्म्मफलप्रेप्सुः कर्म
फलेच्छुः। लुब्धः परद्रव्यादिषु संजाततृष्णः। तीर्थादौ द्रव्यापरित्यागी। हिंसात्मकः पर
पीडाकरस्वभावः। अशुचिः बाह्याभ्यांतरशौचवर्जितः। हर्षशोकान्वितः इष्टप्राप्तौ हर्षः
अनिष्टप्राप्तौ विषादः इष्टवियोगे शोकः ताभ्यां युक्तः। अथवा कर्मसंपत्तिविपत्त्योः
हर्षशोकयुक्तः। एवंविधः कर्ता राजसः परिकीर्त्तितः॥२७॥ तामसं कर्त्तारमा
ह॥ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च क १६७
र्ता तामस उच्यते॥२८॥ अयुक्तः असमाहितः। प्राकृतः अत्यंत [illegible] स्तब्ध
प्रति [illegible] स्तब्धः दंड इव कस्मै चिन्न नमति। शठः शक्तिगूहनकारी मायी

वी। नैष्कृतिकः परविच्छेदनपरः। अलसः कर्त्तव्येष्वपि कार्येष्वप्रवृत्तिशीलः। वि
षादी सर्वदा खिन्नस्वभावः। दीर्घसूत्री अल्पकालेन कर्त्तव्यं बहुकालेन करोति य ए
वंविधः कर्ता तामस उच्यते॥२८॥ इदानीं बुद्धेर्धृतेश्च त्रैविध्यं प्रतिजानीते॥ बुद्धेर्भे
दं धृतेश्चैव गुणतस्त्रिविधं शृणु। प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥२९॥ हे धनंजय
बुद्धेश्च धृतेश्च भेदं गुणतः सत्त्वादिगुणैः कृतं त्रिविधं अशेषेण
साकल्येन पृथक्त्वेन विवेकेन उच्यमानं शृणु॥२९॥ तत्र बुद्धेस्त्रैविध्यमाह सात्वि
कीं बुद्धिमाह॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये। बंधं मोक्षं च
या वेत्ति बुद्धिः सा पार्थ सात्विकी॥३०॥ हे पार्थ या बुद्धिः प्रवृत्तिं वेद विहित
[illegible] विषयां निवृत्तिं शास्त्रनिषिद्धविषयां। देशकाला

ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ द्यपेक्षया दृष्टादृष्टार्थानां कर्मणां करणाकरणे का
र्याकार्ये भित्ययस्मादिति भयं न भयं अभयं ते भयाभये। दृष्टादृष्टयोः भयाभ
ययोः कारणे दृष्टार्थे। बंधं आत्मनो दृढबंधं। सकारणं वेत्ति मोक्षं च दृढबंधया
ययोः कारणे। सकारणं वेत्ति सा बुद्धिः सात्त्विकी॥ ३० राजसीं बुद्धिमाह॥ यया धर्ममध
र्मं च कार्यं चाकार्यमेव च। अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥ ३१ हे पार्थ य
या बुद्ध्या धर्मं शास्त्रविहितं। च पुनः अधर्मं शास्त्रनिषिद्धं। कार्यं देशकालाद्यपेक्ष
याद्दृष्टादृष्टार्थानां कर्मणां करणं। च पुनः अकार्यं तदकरणं। अयथावत् निर्णयतां
यथावन्नैव प्रजानाति सा बुद्धिः राजसी मता। ३१ तामसीं बुद्धिमाह॥ अध
र्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥ १६५
३२ हे पार्थ या बुद्धिः तमसावृता सती अधर्मं प्रतिषिद्धं [illegible]

मिति मन्यते जानाति। च पुनः सर्वार्थान् सर्वानेव ज्ञेयपदार्थान् विपरीतानेव जानाति
सा बुद्धिः तामसी। ३२ धृतस्त्रिविधां सात्त्विकीं धृतिमाह॥ धृत्या यया धारयते मनः
प्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी। ३३ हे पार्थ य
याव्यभिचारिण्या निःसंशयमाद्यनुगतया धृत्या मनः प्राणेन्द्रियाणां क्रियाः
चेष्टाः उच्छास्त्रमार्गप्रवृत्तेः सकाशात् दार्ढ्यमाला योगेन चित्तसमाधानेन धा
रयति एवंविधा सात्त्विकी धृतिः। ३३ राजसीं धृतिमाह॥ यया तु धर्मकामार्थान्
धृत्या धारयतेऽर्जुन। प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी। ३४ हे पार्थ हे
अर्जुन तु पुनः यया धृत्या धर्मकामार्थान् त्रीन् पदार्थान् अवश्यकर्तव्यान्
धारयति। प्रसंगेन फलाकांक्षी। यस्य धर्मादिः अवश्यकर्तव्येन धारणप्रसंगः
यदा तदा तेन प्रसंगेन तस्य फलाकांक्षी भवति यः पुरुषः सा धृतिः राजसी। ३४

तामसीं धृतिमाह। यया स्वप्नं भयं शोकं विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा
पार्थ तामसी॥३५॥ हे पार्थ दुर्मेधाः यया धृत्या स्वप्नं निद्रां भयं त्रासं शोकं संतापं विषा
दं विषण्णतां यथेष्टविषयप्राप्त्या आत्मनो विषयस्य वा बहुमन्यमानत्वं स्मयो मदः
तं एतानि वस्तूनि मनसि नित्यकर्तव्यरूपतया एव न विमुञ्चति धारयत्येव सा
धृतिः तामसी॥३५॥ इदानीं फलस्य सुखस्य त्रैविध्यं प्रतिजानीते सुखमिति॥
सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ। अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति॥३६॥
हे भरतर्षभ अर्जुन इदानीं सत्त्वादिभेदेन त्रिविधं सुखं मत्तः शृणु। यत्र यस्मिन् सु
खानुभवे अभ्यासात् अतिपरिचयात् चित्तं रमते रतिं प्रतिपद्यते। च अन्यत् दुः
खान्तं दुःखनाशं निगच्छति प्राप्नोति॥३६॥ तत्र सात्त्विकं सुखमाह॥ यत्तदग्रे वि
षमिव परिणामेऽमृतोपमम्। तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥३७॥

...त्रिविधसुखमुद्दिश्य सुखं अग्रे पूर्वं प्रथमसंनिपाते विष
मिव दुःखसाध्यमपि परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखं
अमृतोपमं तत्सुखं सात्त्विकं। आत्मनो बुद्धिः आत्मबुद्धिः तस्याः प्रसादः
निर्मलत्वं तस्माज्जातं ततो अथवा आत्मविषया बुद्धिः आत्मबुद्धिः तस्याः प्रकर्षः त
स्माज्जातं॥३७॥ राजसं सुखमाह॥ विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमं
परिणामे विषमिव तत्सुखं राजसं स्मृतं॥३८॥ यत्सुखं विषयेन्द्रियसंयोगात्
जायमानं अग्रे प्रथमकाले अमृतोपमं अमृतसमानं परिणामे तदुपभोगान्ते
बलवीर्यरूपप्रज्ञामेधामनोत्साहहानिहेतुत्वात् अधर्मतज्जनितनर
कादिहेतुत्वाच्च परिणामे विषमिव तत्सुखं राजसं॥३८॥ तामसं सुखमाह॥

यदग्रे चानुबंधे च सुखं मोहनमात्मनः। निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं॥३९
यत्सुखं अग्रे प्रथमतः अनुबंधे अवसानोत्तरकाले च आत्मनो मोहनं मोहकरं।
निद्रालस्यप्रमादोत्थं। निद्रालस्यप्रमादेभ्यः समुत्पन्नं तत्सुखं तामसं॥३९
प्रकरणार्थमुपसंहरति॥ न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्वं
प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥४० यत् सत्वं पृथिव्यां मनुष्यादि
भूतजातं। अन्यद्वा दिवि स्वर्गलोके देवेषु मध्ये यद्वस्तु प्राणिजातं सत्वं एभिस्त्रि
र्गुणैर्मुक्तं गुणत्रयविरहितं स्यात् तन्नास्ति॥४० तर्हि सर्वस्य क्रियाकारकफ
लादिकस्य प्राणिजातस्य च त्रिगुणात्मकत्वात् कथं तस्य मोक्ष इत्यपेक्षायां
स्वस्वाधिकारविहितैः कर्मभिः परमेश्वरं प्रसाद्य तत्प्रसादलब्ध १७०
ज्ञानेन मोक्षो भवतीति सर्वगीतार्थसारं संगृह्य दर्शयितुं प्रकरणांतर

मारभ्यते। ब्राह्मणेत्यादि यावत्समाप्तिः॥ ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥४१ हे परंतप। ब्राह्मणक्षत्रियविशां च शू
द्राणां चतुर्णां कर्माणि स्वभावप्रभवैर्गुणैः प्रविभक्तानि विभागेन व्यवस्था(पिता)
पितानि। स्वभावप्रभवैः। स्वभावः ईश्वरस्य त्रिगुणात्मिका माया सा प्रभवः कार
णं येषां सत्वादीनां गुणानां ते स्वभावप्रभवाः तैः। अथवा स्वभावस्य प्रभवाः कार
णानि गुणाः स्वभावप्रभवाः तैः। ब्राह्मणस्य स्वभावस्य सत्वगुणः प्रभवः का
रणं। क्षत्रियस्य स्वभावस्य सत्वोपसर्जनं रजः प्रभवः। वैश्यस्य स्वभावस्य तम उप
सर्जनं रजः प्रभवः। शूद्रस्वभावस्य रज उपसर्जनं तमः प्रभवः। अथवा ज
न्मांतरसंस्कारः इह जन्मनि प्रादुर्भूतः स्वभावः स प्रभवो येषां ते तैः॥४१

शमो दमस्तपः शौचं क्षांतिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं॥
शमः बाह्येंद्रियनिग्रहः। दमः अंतःकरणसंयमः। तपः शारीरं वाचिकं मानसं
शौचं बाह्याभ्यंतरं क्षांतिः क्षमा। आर्जवं सरलत्वं ज्ञानं शास्त्र
जनितं तादृत् ज्ञानं अनुभवरूपं विज्ञानं आस्तिक्यं वेदार्थेषु श्रद्धा न ता ब्र
ह्मकर्म ब्राह्मणजाते एतत्कर्म स्व स्वभावप्रभावैः गुणैः विभागेन संजातं
४२ क्षत्रियस्य कर्म दर्शयति॥ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दान
मीश्वरभावश्च क्षात्रकर्म स्वभावजं॥४३ शौर्यं तेजः धृतिः धैर्यं दाक्ष्यं दक्षत्वं चेषु का
र्येषु अव्यामोहेन प्रतिपत्तिः दक्षभावः दाक्ष्यं युद्धे अपलायनं दानं ईश्वर १७१
भावश्च ईशितव्यान् स्ववश्यान् प्रति प्रभुशक्ति प्रकटीकरणं ४३ ईश्वरभावः

वैश्यशूद्रयोः दर्शयति॥ कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं। परिचर्यात्म
कं कर्म शूद्रस्यापि स्वभावजं॥४४ कृषिगोरक्ष्य वाणिज्यं स्वभावजं वैश्यकर्म गोर
क्ष्यं पाशुपाल्यं। शूद्रजातेरपि परिचर्यात्मकं द्विजशुश्रूषारूपं कर्म स्वभावजं॥४४
ब्राह्मणादिकर्मणां ज्ञानहेतुमाह॥ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ४५ नरः अधिकारी पुरुषः स्वे स्वे यथो
क्ते कर्मणि अभिरतः येन प्रकारेण सिद्धिं विंदति तच्छृणु संसिद्धिं स्वकर्मा
नुष्ठानात् देहेंद्रियाणां शुद्धौ सति ज्ञाननिष्ठायोग्यतां लक्षणां लभते
प्राप्नोति॥४५ कर्मणा ज्ञानप्राप्तिप्रकारमाह॥ यतः प्रवृत्तिर्भूतानां येन सर्वमि
दं ततं। स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः॥४६ यतः यस्मात् भूतानां प्रवृ
त्तिः अथवा चेष्टा यस्मात् अंतर्यामिणः ईश्वरात् भवति। येन ईश्वरेण इदं जग

ततं व्याप्तं। तं अंतर्यामिणं ईश्वरं स्वकर्मणा प्रतिवर्णं प्रोक्तेन शमशौर्यादिना अभ्य
र्च्य पूजयित्वा मानवः अधिकारी केवलज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं विंदति प्राप्नो
ति।४६ स्वकर्मणेति विप्रोक्तस्य फलमाह।। श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनु
ष्ठितात्। स्वधर्मे लिप्तस्य स्वस्वभावविहितं कर्म कुर्वन्नाप्नोति किल्बिषं।४७ स्वधर्मः
ब्राह्मणादीनां पूर्वोक्तः स्वकीयो धर्मः विगुणोपि निंदितोपि परधर्मात् वर्णांतरधर्मात्
स्वनुष्ठितात् श्रेयान् प्रशस्यः, ततः स्वभावनियतं स्वभावप्रभवैः गुणैः प्र
विभक्तं स्वकीयं पापरूपमपि कर्म कुर्वन् किल्बिषं पापं न आप्नोति। यथा विष
जातस्य कीटस्य विषं दोषकरं न भवति मरणरूपमपि जीवनहेतुः।।४७ १७२
यदि स्वधर्मे हिंसालक्षणं दोषं मत्वा परधर्मे श्रेष्ठं मन्यसे तर्हि परधर्मे पिप

दोषत्वं इत्याशंक्याह।। सहजं कर्म कौंतेय सदोषमपि न त्यजेत्। सर्वारं
भादि दोषेण धूमेनाग्निरिवावृताः।।४८ हे कौंतेय सहजं कर्म सदोषं दोषयुक्तम
पि न त्यजेत् हि यस्मात् सर्वारंभाः सर्वाणि कर्माणि वर्णानामपि कर्माणि स
गुणत्वात् दोषेणावृतानि। यथा अग्निः सहजेन धूमेनावृतः।।४८ स्वक
र्मणा तमभ्यर्च्येति यः कर्मजा ज्ञाननिष्ठायोग्यतालक्षणा सिद्धिरुक्ता तस्याः फ
लं ज्ञाननिष्ठामाह।। असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः। नैष्कर्म्य
सिद्धिं परमां संन्यासेनाधिगच्छति।४९ सर्वत्र पुत्रदारादिषु असक्ता बुद्धिर्य
स्य प्रीतिरहिता निष्करणः। जितात्मा जितेंद्रियः। विगतस्पृहः निःस्पृहः। एवं
विधः आत्मज्ञः स परमां कर्मजसिद्धिं विलक्षणां जीवन्मुक्तिलक्षणां

नैष्कर्म्यसिद्धिं निःकर्म्यस्य निःक्रियात्मस्वरूपावस्थानलक्षणस्य सिद्धिः निष्पत्तिः तां॰ सं
न्यासेन प्राप्नोति ४९ नैष्कर्म्यलक्षणकेवलज्ञाननिष्ठा अन्यश्चीत त्प्रसादजां शरीरेंद्रिया
णां ज्ञाननिष्ठायनक्रमेण च वेति तं क्रममाह ॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति
निबोध मे। समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ५० हे कौंतेय सिद्धिं प्राप्तः स्व
कर्मणा ईश्वरं अन्यर्च्य तत्प्रसादजां शरीरेंद्रियाणां ज्ञाननिष्ठालक्षणां सिद्धिं प्राप्तः
सन् यथा येन प्रकारेण ज्ञाननिष्ठास्वरूपेण ब्रह्म परमात्मानं प्राप्नोति तं ज्ञाननि
ष्ठाप्राप्तिक्रमं मे मम वचनात् निबोध जानीहि या ब्रह्मप्राप्तिः ब्रह्मज्ञानस्य निष्ठा
परिसमाप्तिः समासेन संक्षेपेण तां निबोध ५० तदेव दर्शयति ॥ बुद्ध्या
विशुद्धया युक्तो धृत्यात्मानं नियम्य च। शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ १७२
व्युदस्य च ५१ बुद्ध्या निश्चयात्मिकया विशुद्धया मायारहितया

युक्तः संपन्नो धृत्या धैर्येण आत्मानं देहेंद्रियसंघातं वशीकृत्य सामर्थ्यान् विष
यान् त्यक्त्वा शरीरस्थितिमात्रान् मुक्त्वा रागद्वेषौ परित्यज्य ब्रह्मभूयाय मोक्षाय क
ल्पते समर्थो भवति ५१ किं च ॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२ विविक्तसेवी एकांतसेवी लघ्वाशी मि
तभोजनः जितवाक्कायमाऽऽऽऽऽऽऽऽनसः ध्यानयोगपरः ध्यानं आत्मस्वरूपचिंत
नं। योगः आत्मस्वरूपविषये एकाग्रीकरणं तयोः कर्त्तव्यतापरः ध्यानयोगपर
नित्यं अन्यत् मंत्रजपादि अकुर्वन् परं वैराग्यं समुपाश्रितो मुनिः ब्रह्म
भूयाय कल्पते ५२ किं च ॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं। वि
मुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ५३ देहादिषु अहंकरणं अ

दंकारः॥ ते। काम्यरागयुक्तं सामर्थ्यं बलं। दर्पो नं तन्नावीर्य्यमीति क्रमहेतुः दर्पः। तं। का
मं इच्छां क्रोधं द्वेषं। बाह्यतस्तु परिग्रहं विमुच्य परित्यज्य परमहंसपरिव्राजको
भूत्वा देहजीवनमात्रेपि निर्गतममता भावो निर्ममः। शांतः उपरत दर्पो यत्नः
ज्ञाननिष्ठः ब्रह्मभावाय कल्पते॥ ५३ ब्रह्मादिभ्योवं निःश्रेयस्यो नावस्थानस्य
फलमाह॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति। समः सर्वेषु भूतेषु
मद्भक्तिं लभते परां॥ ५४ अनेन क्रमेण ब्रह्मभूतः ब्रह्मप्राप्तः प्रसन्नात्मा लब्धा
ध्यात्मप्रसादस्वभावः न शोचति। किंचिदर्थं विकल्पं आत्मनो विगुणं च उद्दिश्य
न शोचति नष्टं तथा ति। अप्राप्तं विषयं न कांक्षति। आत्मौपम्येन सर्वभूते
षु सुखं दुःखं वा सममेव पश्यतीय। एवंभूतो ज्ञाननिष्ठः समायि परमेश्वरे भ १७४
क्तिं परां उत्तमां ज्ञानलक्षणां चतुर्थीं लभते॥ ५४

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं॥ ५५
ततो ज्ञानलक्षणया भक्त्या अहं यावान् उपाधिकृत विस्तारभेदः यश्च अहं विध्वस्तसर्वोपा
धिभेदः उत्तमः पुरुषः आकाशकल्पः तं मां अद्वितीयचैतन्यमात्रैकरसं अजमजरम
रमभयमनिधनं तत्त्वतो अभिजानाति। तदनंतरं तमीतत्त्वतो ज्ञात्वा मामेव विश
ते॥ ५५ स्वकर्मभिः परमेश्वराराधनादुक्तं मोक्षप्रकारं उपसंहरति॥ सर्वकर्मा
ण्यपि सदा कुर्वाणो मद्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं॥ × मद्व्यपाश्रयः
सर्वकर्माण्यपि प्रतिषिद्धान्यपि सदा कुर्वाणः अनुतिष्ठन् मय्यर्पितसर्वात्म यक्तं
स्वभावः सोपि मत्प्रसादात् शाश्वतं वैष्णवं पदं प्राप्नोति॥ ५६ यस्मादेवं तस्मात्॥ चेतसे
सा सर्वकर्माणि मयि संन्यस्य मत्परः। बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥
५७ चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयि ईश्वरे संन्यस्य

मत्परः मच्छरणः सन् बुद्धियोगं मयि समाहितबुद्धित्वं अपाश्रित्य मच्चित्तः सततं स
र्वदा भव।५७ यतोयद्भविष्यति तच्छृणु। मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरि
ष्यसि। अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि।५८ मच्चित्तः सर्वदुर्गाणि संसा
र हेतूनि मत्प्रसादात्तरिष्यसि अतिक्रमिष्यसि अथ चेत्तु त्वं मदुक्तं अ स्ययदि४
हंकारात् पंडितंमन्यः सन् न श्रोष्यसि ततः त्वं विनंक्ष्यसि नाशं गमिष्यसि।५८
बंधुभिः सह युद्धं न करिष्यामि अपराधी नोऽहं त्वदुक्तं किमर्थं करोमीति चेत्त
त्राह॥ यदहंकारमाश्रित्य न योत्स्य इति मन्यसे। मिथ्यैष व्यवसाय
स्ते प्रकृतिस्त्वां नियोक्ष्यति।५९ यत् यदि त्वं अहंकारं आश्रित्य न योत्स्य इति १७५
युद्धं न करिष्यामीति मन्यसे तर्हि तेतव एष व्यवसायो मिथ्या यतः प्रकृति

स्त्वत्स्वभावः त्वां नियोक्ष्यति प्रेरयिष्यति।५९ तत्र हेतुमाह॥ स्वभावजेन कौं
तेय निबद्धः स्वेन कर्मणा। कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोपि तत्।६०
हे कौंतेय स्वभावजेन शौर्यादिना यथोक्तेन स्वेन आत्मीयेन कर्मणा नि
बद्धो निश्चयेन बद्धः सन् मोहात् अविवेकतः यत् कर्म कर्तुं नेच्छसि तत्क
र्म अवशोपि परवश एव सन् करिष्यसि।६० तदेव श्लोकद्वयेन सांख्यादि
मतेन प्रकृतिपारतंत्र्यं स्वभावपारतंत्र्यं चोक्त्वेदानीं स्वमतमाह॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यंत्रारू
ढानि मायया।६१ हे अर्जुन ईश्वरः ईशनशीलः सर्वभूतानां सर्वप्रा
णिनां हृद्देशे हृदयदेशे विशुद्धांतःकरणे तिष्ठति। किं कुर्वन् सर्व

भूतानि मायया भ्रामयन् यंत्रारूढानीव। यथा दारुयंत्रारूढानि दारुनिर्मितपुरु
षादीनि भ्रामयन् कश्चित् तथा सर्वभूतानि भ्रामयन्नीश्वरः तिष्ठति। ६१ यस्मात् स
र्वजीवः परमेश्वरपरतंत्रस्तस्मात्॥ तमेव शरणं गच्छ सर्वभावेन भारत। त
त्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं। ६२ हे भारत तमेव ईश्वरं शर
णं आश्रय संसारार्त्तिहरणार्थं गच्छ आश्रय। सर्वभावेन सर्वात्मना। तत्प्र
सादात् ईश्वरानुग्रहात् परां प्रकृष्टां शांतिं उपरतिं च प्राप्स्यसि स्थानं च मम
विष्णोः परमं पदं शाश्वतं नित्यं प्राप्स्यसि॥ ६२ अर्जुनीतार्थमुप
संहरति॥ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया। विमृश्यै
तदशेषेण यथेच्छसि तथा कुरु। ६३ हे अर्जुन इ[illegible]या सर्वज्ञेन ते तु १७६
भ्यं इति एतत् गुह्यात् गुह्यतरं रहस्यं ज्ञानं आख्यातं उक्तं।

एतत् त्वयोक्तं शास्त्रं अशेषेण समस्तं यथोक्तं च अर्थजातं विमृश्य विमर्शनं आलो
चनं कृत्वा यथा इच्छसि तथा कुरु। ६३ अतिगंभीरं गीताशास्त्रं अशेषतः पर्या
लोचयितुं अशक्नुवतः कृपया स्वयमेव तत्सारं संगृह्य कथयति॥ स
र्वगुह्यतमं भूयः शृणु मे परमं वचः। इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते
हितं। ६४ सर्वगुह्य [illegible] सर्वगुह्येभ्योऽप्यंतरतमं रहस्यं भूयः [illegible]
[illegible] उक्तमपि पुनः मे मम परमं प्रकृष्टं वचः वाक्यं शृणु न भयात् नाप्यर्थकारणात्।
वक्ष्यामि। किं तर्हि। मे मम दृढं अत्यन्तिकारेण इष्टोऽसि प्रियोऽसि। इति कृत्वा ततः तेन
कारणेन ते तव हितं परं ज्ञानप्राप्तिसाधनं वक्ष्यामि। ६४ किं तदित्याह। मन्म
ना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥ ६५

हे अर्जुन त्वं मन्मनाः मद्भक्तः मद्याजी मद्यजनशीलो भव मां नमस्कुरु।
एवं वर्तमानः मां एष्यसि। असि त्वयैतत् तव सत्यं प्रतिजाने सत्यां प्रतिज्ञां करो
मि। यतस्त्वं मम प्रियोऽसि॥६५ इदानीं तत्तो पिगुह्यतमं कर्मयोगनिष्ठाफलं
सम्यग्दर्शनं सर्ववेदान्तविहितं सर्वकर्मत्यागरूपं हितं उपदिशति॥ सर्वध
र्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥
सर्वधर्मान् सर्वान् अधर्मांश्च सर्वान् नित्यनैमित्तिककाम्यनिषिद्धानि प
रित्यज्य संन्यस्य मां एकं सर्वात्मानं सर्वं तत्स्वं आत्मत्वेन शरणं व्रज।
न मत्तो अन्यदस्तीत्यवधारय। अहं त्वां एवं निश्चितबुद्धिं सर्वपापेभ्यः स १११
र्वधर्माधर्मबंधनरूपेभ्यः स्वात्मभावप्रकाशीकरणेन मोक्षयिष्यामि अतः मा शु
चः। शोकं मा कार्षीः॥६६

सर्वगीताशास्त्रार्थं अस्मिन्नध्याये उपसंहृत्य विशेषतश्चान्ते इह शास्त्रार्थदार्ढ्यं
संक्षेपतः उपसंहारं कृत्वा अधुना शास्त्रसंप्रदायविधिमाह॥ इदं
ते नातपस्काय नाभक्ताय कदाचन न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति
॥६७ इदं शास्त्रं यत् मया संसारविच्छित्तये उक्तं। तत् अतपस्काय तपोरहि
ताय न वाच्यं। तपस्विनेऽपि अभक्ताय गुरौ देवे च भक्तिरहिताय कदाचन कस्यांचि
दवस्थायां न वाच्यं। तपस्विनेऽपि भक्तायापि अशुश्रूषवे न च वाच्यं। तस्मैऽपि न
वाच्यं यो मां वासुदेवं मनुष्यं प्राकृतं मत्वा अभ्यसूयति। आत्मप्रशंसादि
दोषाध्यारोपणेन ईश्वरत्वं अजानन्॥६७ संप्रदायकर्तुः फलमाह। य इ
मं परमं गुह्यं मद्भक्तेष्वभिधास्यति। भक्तिं मयि परां कृत्वा मामेवैष्य
त्यसंशयः॥६८ य इमं परमं गुह्यं मत्संबंधि मद्भक्तेषु ते अभिधास्यति। यथोक्तं
अपि न वाच्यं तपस्विने भक्ति शुश्रूषा अनसूयावते वाच्यं युक्ताय वाच्यमिति।

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ष्यत्यसंशयः॥६८॥ यः मद्भक्तेषु मद्भक्तेभ्यः इमं परमं गुह्यं अभिधास्यति। वक्ष्यति। स
मयि परो भक्तिं करोति। ततो निःसंशयः सन् मामेव प्राप्नोतीत्यर्थः॥६८॥ किंच। न च
तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः। भविता न च मे तस्मादन्यः प्रियतरो
भुवि॥६९॥ तस्मान्मद्भक्तेभ्यो गीताशास्त्रव्याख्यातुः सकाशात् अन्येषु मनुष्येषु
मध्ये कश्चिदपि मम प्रियकृत्तमः अत्यंतं परितोषकर्ता नास्ति। न च कालांतरेऽपि भ
विता भविष्यति। मम अपि तस्मादन्यः प्रियतरो भुवि अधुना नास्ति। न च
कालांतरे भविष्यतीत्यर्थः॥६९॥ एवं गतः फलमाह॥ अध्येष्यते च य इमं धर्म्यं सं
वादमावयोः। ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥७०॥ वक्तुर्नियमेनाव १७८
प्यः तत्त्वार्जुनायाः इमं धर्म्यं धर्मादनपेतं संवादं अध्येष्यते उपकर्ता पठिष्य
ति। तेन वृंदाः स्वर्गयज्ञेभ्यः श्रेष्ठेन ज्ञानयज्ञेन अहं इष्टः स्यां भवेयं इति